Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवराज-विजयः

(निश्वासचतुष्टयात्मकः)

॥ श्रीहरिः ॥

धर्मनियन्त्रिताया भारतीयराजनीतेस्तत्प्रसङ्गेन भारतीयसंस्कृतेः शौर्य्यवीर्य्याध्यवसायादिलोकोपयुक्तकल्याणगुणगणानाञ्च शिवराजविज-[illegible]शोभनं सङ्कलनमती-[illegible] चैतस्मिन् विषमेऽ-[illegible]

करपात्रिस्वामिनः

0152,3 M48,1
J4

प्रणेता

महाकवि—श्रीमदम्बिकादत्त—व्यासः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

0152,3M48,1 8387
J4
Ambikadutt Vyas
Shivraj vijaya

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

0152,3M48,L 8387
संस्कृत 1-स्न
J4

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

0152,3M48,1 8387
J4

Ambikadutt Vyas
Shivraj vijaya

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवराज-विजयः

(निश्वासचतुष्टयात्मकः)

व्याकरण-साहित्य-मीमांसाद्याचार्येण
पं० श्रीरामजीपाण्डेयशास्त्रिणा
विरचितया वैजयन्त्या

साहित्याचार्य-
पं० श्रीश्रीकृष्णपन्तविरचित-निश्वासद्वय-
सुधावर्षक
भाषानुवा[illegible]काव्या[illegible]विभूषितः।

संशोधक[illegible]
पं० श्रीजितेन्द्र[illegible]

LIBRARY

प्रकाशकः—
प्रणेतृ-पौत्रः स्वर्गीय-श्री राधाकुमार-व्यास-तनयः
श्रीकृष्णकुमारव्यासः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राप्तिस्थानम्—
व्यास-पुस्तकालयः,
मानमन्दिरम्, काशी ।

0152,3M48,1
J4

All Rights Reserved by the Publisher

अस्य खण्डस्य पञ्चमं संस्करणम्
१९५४

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8387

मुद्रक—
दुर्गा प्रेस,
बनारस ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीः ॥

विश्वविश्रुतयशसमखिलभारतीयजनमनोमन्दिरविलासरसिकं सनातनधर्मविजयध्वजोत्तोलनलब्धप्रतिष्ठाबाहुबलं श्रीमन्तं शतावधानचमत्कृतलोकं व्यासमम्बिकादत्तं को वा न जानाति लब्धवर्णः ? स हि महानुभावो न केवलं धर्मविध्वंसिदर्पदलनेन, नवा केवलमासेतुहिमाचलं महितमाहात्म्येन वाक्पाटवेन, नवा केवलं समुदीयमानराष्ट्रभाषाभाण्डागारसमर्द्धनसपर्यया, नवा केवलं सम्प्रदायलब्धस्तवेन सदाचारेण; अपितु सर्वैरेतैरतुलनीयैर्गुणगणैः सहैव प्राक्तनकविप्रतिभास्मारकेण लोकोत्तरचमत्कारकारिणा कवितविरचनचातुर्येणापि जगति विद्योतितः। अल्प एव वयसि भगवदाराधनवशीकृतं वैकुण्ठमुपेयुषोऽपि यस्य सनातनधर्मसमर्थनदृढतरयुक्तिकदम्बवासिता निबन्धा यथाऽद्यापि जनमनांसि वासयन्ति, यथा वा सुप्रसिद्धानि प्रकीर्णकानि संस्कृतहिन्दीपद्यानि रसिकैर्जोघुष्यन्ते, यथा च हिन्दीभाषायां सुग्रथिताः 'आश्चर्यवृत्तान्त' प्रभृतय उपन्यासाः, गद्यकाव्यमीमांसाद्या लक्षणग्रन्थाश्च चेतश्चमत्कुर्वन्ति, 'पण्डितपञ्चाङ्ग-गुणाशुद्धिप्रदर्शन'-विघाश्च लघवोऽपि सारसंदृब्धा ग्रन्थाः पाण्डित्यं प्रख्यापयन्ति, तथैव तदीययशोमन्दिरसुवर्णकलशायमानं 'शिवराजविजयाभिधं' संस्कृतगद्यकाव्यं तत्रैव मन्दिरे वलभीभूतं च 'सामवतं' नाम संस्कृतनाटकं विदुषां दृशोरासेचनं मनसि सुधावर्षकं च न कस्यापि संस्कृतप्रणयिनः सचेतसोऽविदितम्। गद्यकाव्यानां संस्कृतभाषायामतिविरलता संस्कृतभारत्याः सर्वसमृद्धाया अपि शिरसि कलङ्क इवाऽऽसीत्। नहि व्युत्पत्तिलिप्सुच्छात्रजनमनस्तोषकरं किमपि गद्यकाव्यमुपलभ्यते स्म संस्कृतवाङ्मये इत्युक्तिरपि न सर्वथा वितथीभूता, वासवदत्तादीनामतिक्लिष्टतया हर्षचरितस्यापि हर्षवर्धकत्वेऽपि कठिनतया, अतिमधुराया अपि कादम्बर्या अतिरञ्जितवर्णनसरसीभूतत्वेन दुरवगाहतया, दशकुमारचरिते चरित्रचित्रणस्यातीव हेयतया, हितोपदेशपञ्चतन्त्रयोः केवलं बालोपयोगितया च गद्यकाव्याभाव एव यो विदुषां मनस्सु क्लेशमादधाति स्म, तस्योन्मूलनं व्यासमहोदयेनैव सम्यगकारि। शिवराजविजयः प्रौढोऽपि सुप्रसन्नः, अनुकरणीयैतिहासिकचरितचित्रणचणः, अन्यैरस्पृष्टचरीमाधुनिकशैलया वर्णन-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नैपुणीं च सम्यगादधानः, लोकव्यवहारोपयोगिशब्दव्युत्पत्तिं समर्पयन्, कथाप्रसङ्गेन प्रतिपदं चित्तं समाकर्षन्, सर्वतोऽधिकं च चिरदास्यानुभवेन म्लानतां गते हिन्दूजातीयानां मानसकुसुमे देशभक्तिसौन्दर्यमात्माभिमान-सौरभं च समाचिन्वन्नतीव स्पृहणीयः। 'सामवत'मपि च प्राक्तननाटकल-क्षणान्यजहत्, रसपरिपोषं च विदधद्, अश्रुतचरकथावस्तुसंदृब्धमतिर-मणीयम्। उभयत्रैव गुणालङ्कारविन्यासाय रससमुद्रेकाय च श्लाघनीयः सफलो ग्रन्थकर्तुः प्रयत्नः। अहमनयोर्ग्रन्थरत्नयोरालोकनेनातितरां परितु-ष्यामि, हृष्यामि च। सर्वत्र प्रसृत्वरं च प्रचारमनयोरभिवाञ्छामि। एवं-विधग्रन्थरत्नानां पाठनयोजनाहारलतायां यथोचितसन्निवेशेऽपि यद्युदा-सीना विद्वन्मूर्धन्याः, तर्हि सुरभारत्यास्तदीयच्छात्राणां च दुर्दैवमेवाद्यापि जागर्तीत्यनुशोचनमन्तरेण किमन्यद्वक्तव्यं स्यात्। आशासे च व्यासमहा-नुभावग्रन्थानां सर्वेषामेव जगति प्रचारो गुणग्राहिषु सम्पत्स्यतैव जगदीश्व-रानुग्रहेणेति—

भाद्रकृष्ण, १ भौमे २०१०
हिन्दूविश्वविद्यालये, काश्याम्।

गिरिधरशर्मा चतुर्वेदः

विश्रुतयशसो महाकवेः श्रीमदम्बिकादत्तव्यासमहोदयस्य सरस-लेखनीप्रसूतस्य श्रीशिवराजविजयाभिधस्य संस्कृतगद्यकाव्यस्य पुस्तक-मालोकयतः कस्य नाम सचेतसो विदुषः स्वान्तमानन्दतुन्दिलं न भव-तीति न विद्मः।

भाषासौष्ठवेन भावगाम्भीर्येण महत्या च काव्यसमृद्ध्या पुस्तकमे-तदर्वाचीनेषु समुन्नतं स्थानमभजदिति निःशङ्कमङ्गीकर्तुं महामः।

एकेनैव प्रयासेन संस्कृतभाषामधिजिगांसूनामन्तेसदामितिहासज्ञानं काव्यरसास्वादनं च भवत इत्यतो भारतवर्षस्याखिलेषु विद्याकेन्द्रेषु पुस्तकस्यास्य पाठ्यत्वेन निर्धारणं सर्वथा समुचितमिति वाराणसीवासिनः साहित्याचार्य**श्रीताराचरणशर्मभट्टाचार्य**स्याभिमतमेतत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीसाम्बशिवाय नमः ॥

शिवराजविजयं नाम नव्यभव्यं काव्यं ह्यानवद्यगद्यं समुज्ज्वलश्लेषं मनीषाविशेषसमुन्मेषं निभालयतां लब्धवर्णानां कादम्बरीकारं सचमत्कारं सपुरस्कारं वितनोति, वासवदत्ताप्रतिभं प्रभावितप्रभं विभावितं संपादितं विदधाति। ऐतिहासिकमपि सरसं, प्रसन्नमपि गभीरं, मधुरमपि सलावण्यं, नूतनमपि प्राक्तनपरम्परं सरोवरमिव सरस्वतीसमृद्धं, नवयौवनमिव स्पृहणीयं, सत्पुण्यफलमिव श्लाघनीयं, वसन्तवैभवमिव कोकिलमञ्जुलालापं, वर्धमानमयूखमण्डलमिवानुदिनजायमानाभ्युदयं कान् नावर्जयति सचेतसो न वशीकरोति विज्ञमनोज्ञान् न पदमादधाति न वा विलसति सतां महोत्सवेषु। मान्या मनीषिमतज्ञजा, यत्सत्यं प्रियं हितं च न हीदृशं भारतीयगौरवागूरणं, कविसमाजासेचनकं, विमृशतां प्रमोदप्रवर्धनं, पठतां शिशूनां लोकोत्तरं शौर्यसम्पादनं, विदुषामपि व्युत्पत्तिशक्तिसन्धुक्षणं, क्षणक्षणविलक्षणविचक्षणानां वाग्वैदग्ध्यदक्षत्वं प्रोद्भावयितुं गवेष्यमाणा अपि सुप्रतिपदाः। अस्य सरसस्य, सालङ्कारस्य, सूपदेशस्य, सचमत्कारस्य, प्रसारं यशोधवलितदिगन्तरालं, सम्यगध्ययनाध्यापनं सबहुमानं प्रतिसंस्थं, प्रतिपाठशालं, प्रतिवीथि, प्रतिचत्वरं, प्रतिचर्चं समुपबृंहितं साद्यस्कं श्रीविश्वेश्वरादन्नपूर्णाजानेः प्रार्थयमानाः कामयमानाश्चानतिशयमेतदीयमभ्युदयं प्रमोदामहे। *महादेवपाण्डेयः*

काशी हिन्दूविश्वविद्यालयीयसंस्कृतकालेजाध्यक्षः।

विश्वविख्यातवैदुषीवैभवान् श्रीमदम्बिकादत्तव्यासमहोदयान् संस्कृतज्ञेषु को नाम न जानाति? गद्यकाव्येषु तदीयं शिवराजविजयं गद्यकाव्यं प्रकृतसमयोपयोगितया सर्वातिशायि विराजते। पठनपाठनादिषु तस्य प्रचारः परमावश्यकः। काव्यदृष्ट्या वस्तुवृत्तदृष्ट्या च नैतेन सदृशमपरं गद्यकाव्यमस्तीति पाठ्यग्रन्थेषु तत्संग्रहणं परमोचितं प्रतीयते।

यथोक्तमुपरिष्टात् स्वामिकरपात्रिमहाभागैस्तत्तथैवेति बाढमहं सम्मन्ये।
नारायणशास्त्री खिस्ते, काशिकराजकीयसंस्कृतकालेजभूतपूर्वाध्यक्षः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रद्धेय डाक्टर भगवान्दास

श्री अम्बिकादत्तव्यासजी का रचा 'शिवराज विजयः' नाम का गद्यकाव्य, बहुत वर्ष हुए, मैंने आद्योपान्त पढ़ा—कुछ वर्षों के पीछे पुनः आद्योपान्त पढ़ा—इधर उसका छठवाँ संस्करण निकला—इस नये संस्करण की एक प्रति में इस काव्य को तीसरी बार पढ़ रहा हूँ—प्रत्येक आवृत्ति में आनन्द अधिक आया—

संस्कृत के, पण्डित-मण्डली में, प्रायः तीन गद्यकाव्यों की चर्चा अधिक होती रही है, सुबन्धु की 'वासवदत्ता', बाण की 'कादम्बरी', दण्डी का 'दश-कुमार चरित'—दण्डी का गद्यकाव्य तो निश्चयेन, अन्य दोनों की अपेक्षा से अच्छा कहा जा सकता है,—यद्यपि 'अ-लौकिक' अ-सम्भाव्य-सी घटनाएँ उसमें कई बेर आई हैं, तथापि भाषा, ओजस्विनी होती हुई भी कुछ अर्थ रखती है, और राजनीति, लोकचातुरी, ललितकला आदि विषयक ज्ञान भी उसमें रक्खा है—पर वासवदत्ता और कादम्बरी के शब्दों की अरण्यानी में तो बेचारा अर्थ-पथिक सर्वथा भूलभटक कर खो जाता है; उसका पता ही नहीं लगता—कविता के गुणोंमें प्रसाद गुण एक मुख्य गुण है; वह इन दो काव्याभासोंमें मिलता नहीं—

विपरीत इसके, शिवराजविजय में, भाषा उत्तमोत्तम, ओजस्विनी भी, अर्थपूर्ण भी, सुबोध्य भी; यथास्थान, यथावसर, उद्दाम भी, कोमल भी। नवो रस भी इसमें बहुत औचिती और दक्षता से रक्खे हैं; वीररस, जिसका अर्वाचीन संस्कृत-साहित्य में प्रायः अभाव ही है, वह इस ग्रन्थ में प्रधान है; शृङ्गार भी है, और सर्वथा सात्त्विक, सुश्लील, कोमल, प्रीति रूप, कहीं भी अश्लीलता आने नहीं पाई है; युद्धों के प्रसंग में रौद्र, भयानक, बीभत्स का, और वीर के सम्बन्ध में अद्भुत का, रूप बहुत पर्याप्त मात्रा में दिखा दिया है। राजनीति और चार-चातुर्य और रणकौशल का भी निरूपण बहुत सुन्दर है। सर्वोपरि गुण इसका यह है कि विषय ऐतिहासिक, अधिकांश वास्तविक है; कपोल-कल्पित नहीं; और देशभक्ति, जन्म-भूमि-भक्ति, प्रजा की राज-भक्ति, राजा की प्रजा-भक्ति, दोनों की धर्म भक्ति, और भारतीय-राष्ट्रीय-भाव से भरा है; जिन भावों का अर्वाचीन संस्कृत ग्रन्थों में सर्वथा अभाव है।

मैं नहीं जान सकता कि क्यों पण्डित मण्डली में अश्लीलतापूर्ण, 'हठाद्-आकृष्ट-पद-पूर्ण' माघ किरात आदि काव्यों की इतनी महिमा है; और इस रत्नभूत ग्रन्थ से ईर्ष्या नहीं तो विमुखता है। इसका जितना अधिक प्रचार हो उतना अच्छा है—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीः ॥

निर्माणहेतुः

"गद्यं कवीनां निकषं वदन्ति"

श्लोक एकस्याप्यंशस्य चमत्कार-विशेषाधायकत्वे सर्वोऽपि श्लोकः प्रशस्यते, न च गद्ये तथा सुलभं सौष्ठवम्। गद्ये तु सर्वाङ्गीण–सौन्दर्यमुपलभ्येत चेत्; तदैव तत् प्रशंसा-भाजनं भवेद् भव्यानाम्। पद्ये छन्दःपारवश्यात् स्वच्छन्द-पदप्रयोगो न भवतीत्यनिच्छताऽपि कविता-प्रसङ्गप्राप्तं स्वाभाविकं स्वल्पमपि वचनीयं क्वचिद् विस्तार्यते, क्वचिद् बह्वपि नियताक्षरैः संक्षिप्य चोद्दिष्टं विधीयते, क्वचिच्च छिन्न–स्वाभाविक–पद–प्रयोग–समापनीयान्यपि पारस्परिकालाप–संसक्त–प्राप्त–वाक्यानि जटिलीक्रियन्ते। गद्ये तु यदि किमपि तादृशमस्वाभाविकं स्यात्; तत् कवेरेव निर्वक्ति महदवद्यम्—इत्यादिकारणैः पद्यापेक्षया गद्यमेव महामान्यं भवति, भवति च दुष्करमपि गद्य-काव्यमेव। अत एव शुद्ध–पद्यात्मकेषु बहुषु महाकाव्येष्वपि खण्डकाव्येष्वपि च प्राप्येष्वपि गद्यपद्यात्मकेषु चम्पू-नाटकादिषु चानेकेषूपलभ्यमानेष्वपि, शुद्ध-गद्य-काव्यानि तथा नाऽऽसाद्यन्ते। अस्माकं महामान्या धन्याः सुबन्धु-बाण-दण्डिनो महाकवयो ये वासवदत्ता–कादम्बरी–दशकुमारचरितानि सुधामधुराणि सदा सदनुभाव्यानि गद्यकाव्यानि विरचय्य भारत-वर्षं सबहु–प्रमोद–वर्षं व्यधिपत; येषां चोक्ति–पर्य्यालोचन–प्राप्त-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पर्य्याप्त–व्युत्पत्तयोऽसङ्ख्याश्छात्रा अद्यापि वर्तन्ते, वर्तिष्यन्ते च चिराय । पूर्वैर्भट्टार–हरिचन्द्र–प्रभृतिभिरेतैर्महाकविभिश्च प्रचारितोऽपि महाकाव्य–सञ्चारो न चिराय स्थितिमकलयत् । भारताभिजनभाषा–कविभिरपि च प्रायः पद्य–प्रकृतिकैरेव समभावि–इति जगत्प्रसिद्धैः सूरदास–प्रभृतिभिरपि पद्यान्येव निबद्धानि । साम्प्रतन्तु समय–महिम्ना भारतीय–वर्तमान–भाषासु बहुधा गद्यकाव्यानि विरच्यन्ते । वङ्ग–गुर्जरादि–भाषासूपन्यासैरेव व्याप्ता विपणयः । हिन्दीभाषापि च प्रत्यहमतिशयमासादयति गद्यसोपानेष्वेव पदाधाने । परं न केवलं प्राकृतिक–गिरां गुरवो गीर्वाणगिरि व्युत्पत्तिगरीयांस उपलभ्यन्ते, न वा कांश्चिद् धन्य–धन्यान् विहाय संस्कृतसाहित्य-व्युत्पन्ना एव, इतर-भाषानुरक्ता विशेषतोऽवलोक्यन्ते । अत एव भारताभिजन-भाषा-कवयः प्रायः स्वभ्रमान् साक्षात्संस्कृतसाहाय्येन शोधयितुं न पारयन्ति, न वा भाषाकविसमादृतान् नवान् नवान् मनोरमान् चमत्कारविशेषाधायकान् पथोऽनुसर्तुं संस्कृत–साहित्य-वैभवेषु च निधीन् वर्द्धयितुं संस्कृतज्ञा एव प्रायशः पारयन्ति । कदाचिद् वृन्दारक-वृन्द-वाण्यां गद्यकाव्य-प्रचार-दौर्बल्यस्येदमेव प्रधानं कारणं स्यात् । महदिदमुपहासास्पदं विडम्बनं यद्—मण्डूक इव महापारावार–पारमासादयितुं यतमानस्तादृशं कवि–कौशल–निकषायितं गद्यकाव्यं मादृशः क्षोदीयान् जनो रिरचयिषुः संवृत्त इति । काव्यमिदं मा स्म भूत् तादृगभाव–विघट्टकम् । मा स्म वा पुषत् कस्यापि मोद-विशेषम्, परं मया—तु सनातनधर्म–धूर्वह–शिवराज–वर्णनेन रसना पावितैव, प्रसङ्गतः सदुपदेश–निर्देशैः स्व-ग्राह्मण्यै सफलितमेव, ऐतिहासिककाव्यरुचीनि स्वमित्राणि रञ्जितान्येव; चिरमस्मत्पूर्वजैः पराशरपाराशरादिभिरुपासिता संस्कृतभाषा सेवितैव, चक्षुषी निमील्य सविशेषं साक्षात्कृता पीयूष–पूर–पूर्णैरिव दृक्पातैरुज्जीवयन्ती पारिजात–कुसुम–वर्षिभिरिव वचनैरुपदिशन्ती जननी सरस्वती समारा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धितैव, सद्यः परनिर्वृतिश्च समासादितैव। भवभूतिजगन्नाथादीनां राजमान्यानां कवि-मण्डल-चक्रवर्तिनान्तु द्वेषविशेषैर्वा स्वग्रन्थ-मार्मिकजनालाभेन वा कारणान्तर—कलापैर्वा महानेव शोक-सङ्घात आसीत्। "कोऽस्मद्ग्रन्थानवलोकयिष्यति? को वाऽस्माकं गूढ-तात्पर्यं भोत्स्यति?"—इति चिन्ता-सन्तान—वितान—झञ्झावातोद्धूत-संशय-घनघनाडम्बर एव तथा समरौत्सीद् हृदयाकाशम्; यथा ध्रुवं सद्यः परनिर्वृति-रूप-चन्द्रिका-प्रसरेणापि न रञ्जितमेव तदन्तःकरण-कुमुद—वनम्।

तथा च तैरेवोक्तम्—

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥"

"विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधर-माधुरीं विधुरयन् वाचां विलासो मम॥"

अहन्तु तादृशानां महाकवीनां चरण-रजो-विमर्श-भाजनमपि तदपेक्षयाऽधिकं भाग्यवत्तरोऽस्मीति निश्चिनोमि, यतो मद्ग्रन्थ-मार्मिकस्तु मिथिला-मही-महेन्द्रः, भारत-साम्राज्य-व्यवस्थापक-समाज—सञ्जीवनः, महामान्यः, वदान्यः, धन्य-धन्यः, विविध-बिरुदावली—विराजमानः, राजमानोन्नतः, नतोन्नतिदायकः, महा-राजश्रीरमेश्वरसिंहवीरवर एवास्ति। माद्यन्ति च परश्शता वाराण-स्यादि—पण्डित—मण्डल—मण्डना रसास्वादानुकूल—वासना वासिता-न्तःकरणा विबुध-जनाः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सोऽयं स्वलेखनी-कण्डूमुपशमयितुं लिखितः प्रकाण्ड-लेखो यदि केषाञ्चित् पण्डित-प्रकाण्डानां कर्ण-कण्डूं खण्डयेत्, तत् कृत-कृत्यः संवर्त्तेय। ये तु पुरोभागिनो निगीर्यापि प्रबन्धममुं तुण्ड-मुण्ड-गण्ड-कण्डूयनैः, ताण्डव-करण्डीकृत-भ्रभङ्गैश्चास्मानास्मा-कांश्च हासयिष्यन्ति, तेऽप्यसङ्ख्य-प्रणति-पात्राण्येवास्माकम्। ये तु जोषं जोषमालोक्यापि काव्यानि, समासाद्यापि च तोषम्, सरो-षमुज्जृम्भिताभिर्जाठरज्वालाभिरेव तं जारयन्ति, जारयन्ति ते ग्राव्णोऽपि लौहमपि विषमपि दाधीचास्थीन्यपि चेति विलक्षण-कुक्षयस्ते न कस्य नमस्याः?

—अम्बिकादत्तव्यासः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

922B.

* श्रीः *

शिवराजविजयः

गद्यकाव्यम्

"विष्णोर्माया भगवती यया सम्मोहितञ्जगत्"
"हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते।"
—भागवतम्।

वागीश्वर्यै नमः।

शिवाङ्के खेलन्ती शिवशिरसि गङ्गालहरिकां
समुद्यद्गम्भीरध्वनिभरसमुद्दीपितमदाम् ।
निरीक्ष्योत्का वामा सरलहृदया ऽऽघूर्णितवती
यमासेव्यं देवं तमिह कलये चित्तनिलये ॥

तत्रभवान् कविकुलचूडामणिः सिद्धसरस्वतीकोऽम्बिकादत्तव्यासो वीररसप्रधानं गद्यकाव्यं चिकीर्षुर्महनीययशसो भारतभागधेयस्य दुर्दान्तोरगजिह्वजिह्वोत्पाटनकुशलस्य शिववीरस्य चरितचयनेनैव भारती कृतार्थयितव्येति विहितमनोरथ उपक्षिपति वेदव्यासोक्तिं श्रीमद्भागवतादुद्धृताम्-विष्णोर्मायेति। वेवेष्टि व्याप्नोति चराचरात्मकं प्रपञ्चमिति विष्णुर्ब्रह्म, तस्य माया=सत्त्वप्रधानः शक्तिविशेषः। सा चैषा भगवती=समग्रषड्गुणसम्पन्ना।

शिवराज-विजय का हिन्दी अनुवाद

"भगवान् विष्णु की माया (दैवी शक्ति) सकल-ऐश्वर्यशालिनी है, जिसने सम्पूर्ण जगत् को मोह में डाल रक्खा है, कर्तव्याकर्तव्यविमूढ़ कर रक्खा है।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

इति प्रसिद्धो भगपदार्थः—तद्वत्त्वञ्च भगवत्त्वम्। यया=मायया। गच्छतीति जगत् स्थावरस्याप्युपलक्षणम्। सम्मोहितम् = सम्यग्रूपेण मोहितम्।

हिंस्रः = घातुकः। खलः = दुष्टः। स्वस्यैव पापेन विहिंसितो भवति, नतु तत्र निमित्तान्तरापेक्षा। साध्नोति परकार्यमिति साधुः। तथाभूतश्च समत्वेन = विवेचकत्वेन। भयाद्विमुच्यते = अपगतभयो भवति। तत्रापि तस्य समत्वमेव हेतुर्न बीजान्तरापेक्षा—तदुक्तम् "न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" इति। एतेनाऽऽद्यनिश्वासे पापिनामशोभनाः साधूनाञ्च शोभना आचाराः प्रदर्शिता भवेयुरित्युपक्षिप्तम्। सर्वञ्चेदं सर्वतन्त्रस्वतन्त्रस्य भगवतो मायया त्रिगुणात्मिकया निबद्धैरेव समास्थीयत इति, काचन हिन्दुकन्या केनचन दुष्टेन हृता रक्षिता च सा साधुना, दुष्टनाशश्च स्वपापेनैव संवृत्त इति कथाभागश्च। विष्णुनामग्रहणेन मङ्गलमपि शिष्टाचारानुमितश्रुतिबोधितेतिकर्त्तव्यताकं सूचितम्।

कथाभागं प्रारभमाणो भगवदादित्यप्रकाशात्मवस्तुनिर्देशरूपमपि मङ्गलं समाचरति—अरुण एष इति। पूर्वस्यामिति—"दिशि" इति विशेष्यम्। मरीचीनां मालाऽस्यास्तीति मरीचिमाली = दीधितिपतिः। बहुव्रीहीतरसमासोपलक्षककर्मधारयपदघटितमपि "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर" इति वचनं न सार्वत्रिकम्, "असुव्रत" इति भाष्यप्रयोगादिति ध्येयम्। अरुणः = ईषल्लोहितः। "ज्योतिषां रविरंशुमान्" इति भगवद्विभूतिसमूहपातित्वेन भगवत्त्वं सर्वथा स्फुटम्। अथाऽऽदित्यं विशिनष्टि-

"हिंसा करनेवाला दुर्जन अपने ही पाप से विनाश को प्राप्त होता है और परोपकारी पुरुष कर्तव्याकर्तव्यविवेक से भयविमुक्त हो जाता है।"

पूर्व दिशा में भगवान् सूर्य की यह आरक्त आभा है। ये भगवान्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, कुण्डल-माखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीक-पटलस्य, शोक-विमोकः कोक-लोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति,

एष भगवान्निति। "दिनस्य" इत्यन्ते मालारूपकालङ्कारः वैदर्भी रीतिः प्रसादाख्यश्च गुणः। मणिः = रत्नम्। यथा हीरकादिरन्धकारं वारयति प्रकाशयति च पदार्थसार्थं तथाऽयमपि बाह्याभ्यन्तरतमोऽपवार्य प्रकाशयति सकलानर्थानिति मणित्वेन रूपणम्। खे नभसि चरन्ति गच्छन्तीति खेचराः = भगणाः, तेषां चक्रस्य = समूहस्य। चक्रवर्ती = सम्राट्। सैन्यं प्रवर्त्तयति सम्राट्, दिनाधिपोऽपि सर्वं ग्रहगणमिति रूपणम्। आखण्डल-दिशः = इन्द्रसम्बधिन्याः प्राच्या नायिकायमानायाः। कुण्डलम् = कर्णा-भरणविशेषः। वर्त्तुलत्वमारोपबीजम्। ब्रह्माण्डमेव भाण्डम् = सदनम्, तस्य दीपकः। प्रकाशकत्वमत्राऽऽरोपहेतुः। पुण्डरीकाणाम् = कमलानाम्, "पुण्डरीकं सिताम्भोजम्" इति विशेषग्रहणन्तु नात्र, श्वेतत्वस्याविवक्षित-त्वात्, पटलस्य = समूहस्य। प्रेयान् = अतिशयेन प्रियः। कोकानाम् = चक्रवाकाणाम्, लोकस्य = समुदायस्य। शोकस्य विमोकः = मोक्षः। रूपकम्। कोकमिथुनानां रात्रिविरहः कविसमयख्यातः। अत्र बहुव्रीहिप्रदर्शनं टीकाकृतामनपेक्षितमसाम्प्रदायिकञ्च, बहुव्रीहिसंग्राह्याभिधेयस्य समारोपणादेवोप-पत्तेः। रोलम्बानाम् = भ्रमराणाम्, कदम्बस्य = समूहस्य। अवलम्बः= आश्रयः। सवश्चासौ व्यवहारः = ऐहिकामुष्मिकलक्षणो व्यापारः, तस्य, सूत्रधारः = प्रवर्त्तयिता। दिनस्य, इनः = स्वामी। "इनः सूर्ये प्रभावि"

(सूर्य) अन्तरिक्षमण्डल के रत्न हैं, नक्षत्रराशि के सम्राट् हैं, प्राची दिशारूपी नायिका के कुण्डल हैं, ब्रह्माण्डरूपी गृह के दीपक हैं, कमल-कदम्ब के (विकासक होने से) प्रियतम हैं, चक्रवाकों के शोक-विमोचन हैं, भ्रमरों के आश्रय हैं, ऐहिक और पारलौकिक सकल व्यवहारोंके प्रवर्तक हैं, और हैं दिन के स्वामी। ये ही दिन और रात के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एतेनैव सम्पादिता युगभेदाः, एतेनैव कृताः कल्पभेदाः, एतमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्त्ति वर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति,

त्यमरः। इनपदस्य स्वामिसूर्योभयवाचित्वेऽप्यत्राऽऽद्यपर्यायत्वमेवेति ध्येयम्। अथ स्वभावोक्त्याऽलङ्करोति तमेव भगवन्तम्—अयमेवेति। अहश्च रात्रिश्चाहोरात्रस्तम्। शशधरेऽपि किरणानुप्रवेशद्वारा विकाशकत्वमेतदीयमेवेति भवति द्वितयजनकत्वमेवकारसार्थक्यश्चेति विवेचनापटवः। जनयति = प्रादुर्भावयति। वत्सरम् = हायनम्। द्वादशसु भागेषु = मेषादिमासरूपेषु। विभनक्ति = विभजते। "भञ्जो आमर्दने" इत्यस्य रूपम्। भवति चात्र मानवं शासनम् 'अहोरात्रे विभजते सूर्यो मानुषदैविके' इति। षण्णामृतूनाम्= वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराणाम्। कारणम् = हेतुः। अयनम् = सूर्यमार्गः। युगानाम् = कृतत्रेताद्वापरकलीनाम्। भेदाः = विभागाः। एतेनैव सूर्येणैव, अन्वादेशत्वादेनादेशः। कल्पभेदाः, षष्ठीतत्पुरुषः। कल्पश्चैकसहस्रमहायुगात्मकः ख्यातः कालविदाम्। परमेष्ठिनः = विधातुः। परार्द्धसंख्या = अन्तिमा परार्द्धनाम्ना ख्याता संख्या। चर्कर्ति = पुनः पुनः करोति। यङ्लुगन्तम्। यङ्लुकश्छान्दसत्वं तु न वैयाकरणसम्प्रदायसिद्धं न वा महाकविजनानुमोदितमिति भूयो भूयः प्रयोगान् प्रदर्शयति। यङ्लुगन्तत्रितयेनोत्पत्ति-स्थिति-लयकर्तृत्वं निवेदितम्। वन्दिनः = स्तुतिपाठकाः। वेदाः

जनक हैं, ये ही वर्ष को बारह भागों में बाँटते हैं, ये ही छः ऋतुओं के जन्मदाता हैं, ये ही दक्षिणायन और उत्तरायण (दक्षिण और उत्तर मार्ग) का अवलम्बन करते हैं, इन्हीं ने सत्य, त्रेता, द्वापर और कलियुग का भेद किया है, इन्हीं ने कल्प का विभाग किया है, इन्हीं के सहारे ब्रह्मा की परार्द्ध नाम की सबसे बड़ी (अन्तिम) संख्या (ब्रह्मा की आयु का आधा काल) पूरी होती है, ये ही बार बार जगत् की सृष्टि, पालन और संहार करते हैं, वेद इन्हीं की स्तुति करते हैं,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामिति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चित् गुरुसेवन-पटुर्विप्रबटुः।

"अहो-! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान्

=ऋग्यजुःसामाथर्वाभिधाः। एतेन सूर्ये ब्रह्मदृष्टिरिति सूचितम्। "अन्तस्तद्धर्मोपदेशात्" इत्यधिकरणे हि निर्णीतमादित्योपाधिब्रह्मस्तूयमानत्वम्। अत एव "गायत्र्यमुमेव गायती" त्येवकारसहितं वाक्यं स्वरसतः सङ्गच्छते। गायत्र्याश्च मुख्यं वाच्यं ब्रह्मैवेति बृहदारण्यकादिषु सुनिरूपितम्। "गायन्तं त्रायत" इति तद्व्युत्पत्तिरप्यत एवोपपद्यते। ब्रह्मणि निष्ठा येषां ते, वेदपारगा इत्यर्थः। उपतिष्ठन्ते=उपासते। "उपाद्देवपूजा-सङ्गतिकरण-मित्रकरणपथिष्वि" त्यात्मनेपदम्। भास्वन्तम् = सूर्यम्। "भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय" इत्यमरः। भास्वत्त्वं प्रणतिहेतुः। प्रणामो हि स्वापकृष्टत्वबोधनम्, तच्च प्रणम्ये गुणेषु सत्स्वेवेति न तिरोहितम्। ह्रस्वा कुटी कुटीरः। "कुटीशमीशुण्डाभ्यो रः"। गुरुसेवने पटुः=कुशलः। विप्रश्चासौ बटुर्विप्रबटुः=ब्राह्मणब्रह्मचारी।

अहो=साश्चर्यखेदे नैत्यिककर्मानुष्ठानकाललोपोत्थे।

> नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
> स शूद्रवद्बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥

इत्यादिभिः सन्ध्यावन्दनादिनित्यकर्माननुष्ठाने प्रत्यवाय-स्मरणेन शयनादिना तत्कालातिवाहने स्वाभाविको हि क्षोभः सताम्। चिररात्राय=चिरम्। "चिराय चिररात्राय चिरस्याद्याश्चिरार्थका" इत्यमरः। स्वप्नः=निद्रा, स एव

गायत्री इन्हीं का गुणगान करती है, वेदपारंगत ब्राह्मण प्रतिदिन इन्हीं की उपासना करते हैं, ये ही धन्यात्मा श्रीरामचन्द्रजी के कुल के मूल पुरुष हैं, ये सबके अभिवन्दनीय हैं—यह सोच कर उदयाचल पर आरूढ़ होनेवाले भगवान् सूर्य को प्रणाम करता हुआ गुरुसेवा में दक्ष एक बालक अपनी पर्णकुटी से बाहर निकला।

"ओह! मैं बहुत देर सोया रहा, निद्रारूपी जाल में फँसकर मैंने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत्सपदि अवचिनोमि कुसुमानि" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे ।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत् ।

जालम्=आनायः, तत्परतन्त्रेण=तदायत्तेन । पुण्यमयः, "ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिन्तयेदि"ति मनूक्त्या । सपदि=सत्वरम् । अवचिनोमि=संकलयामि । कदली=रम्भा, तस्या दलम्=पत्रम् । आकुञ्च्य=भुग्नं विधाय । तृणानां शकलैः=खण्डैः । सन्धाय=संमेल्य । पुटमेव पुटकम्=समुद्गः । "दोना"इति हिन्दी । पुष्पाणाम्, अवचयः=संग्रहः, तम् ।

आकृत्या=आकारेण । "प्रकृत्यादिभ्य उपसंख्यानमि"ति तृतीया । वर्णेनेत्यत्रापि । जटाभिः=सटाभिः । "इत्थंभूतलक्षण"इति तृतीया । जटाज्ञाप्यब्रह्मचारित्वसंवलित इत्यर्थः । षोडशवर्षदेशीयः=ईषदसमाप्तषोडशवर्षः । "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" । कम्बुरिव कण्ठो यस्य सः शङ्खग्रीव इत्यर्थः ।

बड़ा पुण्यमय समय गवाँ डाला । यह हमारे गुरुजी के सन्ध्यावन्दन का समय है, इसलिए तुरन्त फूल तोड़ लाऊँ"—यह ठान कर उसने एक केले के पत्ते को मोड़ कर तिनकों से जोड़ा और दोना बना कर फूल तोड़ने लगा ।

उस बालक की आकृति रमणीय थी, रंग गोरा था, जटाओं से ब्रह्मचारी प्रतीत होता था, अवस्था लगभग १६ वर्ष की थी, उसकी गरदन शङ्ख की तरह थी, ललाट विस्तीर्ण था, भुजाएँ प्रशस्त एवं नेत्र विशाल थे ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रि-कुल-कूजित-पूजितं पयःपूरपूरितं सर आसीत् । दक्षिणतश्चै-को निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः फल-पटलाऽऽस्वाद-

---

कुञ्ज इव=लतादिपिहितोदर इव, आचारीदित्यकुञ्जायिष्ट । "कर्तुः क्यङ्सलोपश्चे"ति क्यङन्तात् क्ते कुञ्जायितम् । कदलीदलैः कुञ्जायितस्येति समासः । लुप्तोपमालङ्कारः । समन्तात्=परितः । पूर्वतः=पूर्वस्याम् । "तसिलादिष्वाकृत्वसुच" इति पुंवत्वम् । परस्सहस्राणाम्=सहस्राधिका-नाम्, पुण्डरीकाणाम् = सिताम्भोजानाम्, पटलेन=समूहेन, परितः = सर्वतः, लसितम् = शोभितम् । पतत्रिणाम्, = पक्षिणाम्, कुलस्य = गणस्य, कूजितेन = शब्देन, पूजितम् = विराजितम् । पयसां पूरेण = प्रवाहेण, पूरितम् = भरितम् । विशेषणानीमानि चत्वारि सरसो विशेष्य-भूतस्य । दक्षिणतः = दक्षिणस्यां दिशि । पर्वतखण्ड आसीदित्यन्वयः । पर्वतखण्डः = प्रत्यन्तपर्वतः । "टेकरी" इति हिन्दी । विशिनष्टि विशे-षणत्रयेण—निर्झरस्य = प्रवाहस्य, "वारिप्रवाहो निर्झरो झरः" इत्यमरः, झर्झ-रध्वनिना ध्वनितम् = नादितम्, दिगन्तरम् = दिक्प्रान्तभागो यस्य सः । झर्झर इति जलशब्दानुकृतिः । फलानां पटलस्य = समूहस्य, आस्वादेन = भक्षणेन, चपलिताः = चञ्चलाः, चञ्चवः=त्रोटयः, "चञ्चुस्त्रोटयां स्त्रियामि"

उसकी पर्णकुटी के, जो केले के पत्तों से निकुञ्ज-सी लगती थी, चारों ओर पुष्पवाटिका थी, पूर्व की ओर जलराशि से लवालब भरा हुआ तालाव था, उसका जल अत्यन्त निर्मल था, हजारों सफेद कमल उसकी शोभाभिवृद्धि करते थे, पक्षियों के कलरव से वह बहुत ही सुहावना लगता था । दक्षिण तरफ एक छोटा-सा पहाड़ था, झरने की झर-झर ध्वनि से उसकी सब दिशाएँ गूँजा करती थीं, फल खाने से चञ्चल चोंचवाले विविध पक्षियों के फुदुक-फुदुक कर बैठने से खूब झुकी हुई

२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चपलित-चञ्चु-पतङ्ग-कुलाऽऽक्रमणाधिक – विनत-शाख-शाखि-समूह-व्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत् ।

यावदेष ब्रह्मचारी बटुरलिपुञ्जमुद्धूय कुसुम-कोरकानवचिनोति; तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवया कस्तूरिका-रेणु-रूषित

त्यमरः, येषां, ते च ते पतङ्गाः = पक्षिणः, "पतङ्गौ पक्षिसूर्यौ च" इत्यमरः, तेषां कुलम् = समूहः । तस्याक्रमणेन, अधिकम् = अत्यन्तम्, विनताः = नम्रीभूताः, शाखाः = शिखाः, "शिखा शिफा लते" त्यमरः, येषां ते च ते शाखिनः = वृक्षाः, "वृक्षो महीरुहः शाखी विटपी पादपस्तरुरि" त्यमरः, तेषां समूहेन व्याप्तः = आवृतः । सुन्दराः = शोभनाः, कन्दराः = गुहाः, यस्य सः । "दरी तु कन्दरो वा स्त्री" त्यमरः । अत्रानुप्रासः शब्दालङ्कारो गौडी च रीतिः ।

ब्रह्म = वेदः, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी । "ब्रह्मचर्यमहिंसा चे" त्यादौ तु यमभेदविशेषस्य मैथुनत्यागस्यैव ब्रह्मचर्यपदवाच्यता । अलीनाम् = भ्रमराणाम्, पुञ्जः = राशिः, "स्यान्निकायः पुञ्जराशी" इत्यमरः, तम्, अवधूय = निवार्य । कुसुमानां कोरकाः = कलिकाः, "कलिका कोरकः पुमानि" त्यमरः, तान् । अवचिनोति = संकलयति । सतीर्थ्यः = सहाध्यायी । "समानतीर्थे वासी"ति यप्रत्यये "तीर्थे य" इति सादेशः । "सतीर्थ्याऽस्त्वेकगुरव" इत्यमरः । तेन समानं वयः = अवस्था, यस्य सः । सतीर्थ्यं विशिनष्टि चतुर्भिर्विशेषणैः । श्याम इत्याद्यं विशेषणम् । स्वभावतः कृष्णवर्णं तमुत्प्रेक्षते कस्तूरिकायाः = मृगनाभेः, रेणुभिः=रजोभिः, रूषितं

डालियोंवाले वृक्षों की श्रेणियों से वह भरा था और उस पर बहुत-सी सुन्दर गुफाएँ थीं ।

ज्योंही वह ब्रह्मचारी भौंरों को उड़ाकर पुष्प-कलियों को तोडने लगा त्योंही उसीका सहाध्यायी और समवयस्क दूसरा ब्रह्मचारी, जो कस्तूरी की बुकनी से सना हुआ-सा साँवले रंग का था, ललाट पर चन्दन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इव श्यामः, चन्दन-चर्चित-भालः, कर्पूरागुरु-क्षोद-च्छुरित-वक्षो-बाहु-दण्डः, सुगन्ध-पटलैरुन्निद्रयन्निव निद्रा-मन्थराणि कोरक-निकुरम्बकान्तराल-सुप्तानि मिलिन्द-वृन्दानि, झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्—

"अलं भो! अलम्, मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे

इव = छुरित इव । चन्दनेन = गन्धसारेण, चर्चितम् = लिप्तम्, भालम् = ललाटम्, यस्य सः । कर्पूरस्य = घनसारस्य, अगुरोः=नृपार्हकस्य, "अगर" इति हिन्दी, च क्षोदेन = चूर्णेन, छुरितम् = व्याप्तम्, वक्षोबाहु-दण्डम् = उरःस्थलभुजद्वयम्, यस्य सः । सुगन्धपटलैः = सौरभसमूहैः, निद्रया मन्थराणि = अलसानि । कोरकाणाम् = कलिकानाम्, निकुरम्बकाणि = वृन्दानि, "निकुरम्बं कदम्बकम्" इत्यमरः । तेषाम्, अन्तराले = अभ्यन्तरे, सुप्तानि = शयानानि । मिलिन्दानाम् = भ्रमराणाम्, वृन्दानि = समूहान् । उन्निद्रयन्निव = जागरयन्निव । अन्वयमनुसृत्यात्र व्याख्यातम् । सुगन्धलोलुपा द्विरेफाः श्यामवटुशरीरानुलिप्तचन्दन-घनसार-कस्तूरिका-परिमलमाघ्राय पुष्पेभ्य उड्डीय तच्छरीरनिपतनोत्सुकाः सञ्जाता इति स्वाभाविकवार्त्ताया जागरणमुखेनात्रोत्प्रेक्षणम् ।

अलं भो अलम्, पुष्पावचयं निषेधति । इतः परं कांश्चित्स्थलविशेषानपहाय वृत्तक नाम गद्यम् । "अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम्"

लगाये, छाती और भुजाओं पर कपूर और अगर की बुकनी रमाये था, सुगन्धि की गमक से कलियों के अन्दर सोये हुए निद्रा से अलस भ्रमरों के झुण्डों को जगाता हुआ-सा झटपट समीप में आकर मना करता हुआ गोरे ब्रह्मचारी से यों बोला—

"बस भाई बस, फूल मत तोड़ो, मैंने पहले ही फूल तोड़ लिये हैं, तुम रात्रि में बड़ी देर तक जागते रहे, इसलिए तुम्हें जल्दी नहीं जगाया, गुरुजी यहाँ तालाब के किनारे सध्यावन्दन कर रहे हैं, मैंने उनके

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust, Funding by MoE-IKS

सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्दं रुदतीम्, परम-सुन्दरीम्, कलित-मानव-देहामिव सरस्वतीं सान्त्वयन्, मरन्द-मधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया

इति तल्लक्षणात्, एतदेव "अनाविद्धपदं चूर्णम्" इति वामनसूत्रे चूर्णक-नाम्नाऽभिहितम्। अजागरीः, "जागृ" धातोर्लुङि सिपि रूपम्। सप्तवर्ष-कल्पाम् = असमाप्तसप्तवर्षाम्। यवनेभ्य आगतो यवनानां वाऽय यावनः, स चासौ त्रासस्तेन। यवनजवनशब्दौ संस्कृतसाहित्ये समायातौ। आद्यो वशिष्ठविश्वामित्रसंग्रामे धेनुस्तनसमुत्पन्नेषु रूढः, परश्च सगरसंग्रामे वशिष्ठ-परित्याजितार्यधर्मेषु सागरपारस्थक्षत्रियेष्विति त्यक्तमहामहोपाध्यायपदवीकाः शक्तिसम्प्रदायाचार्याः श्रीपञ्चाननतर्करत्नभट्टाचार्याः। तन्मतानुसरणे भारतसमागतेष्वेषु जवनशब्दप्रयोग एवोचित इति भाति। कलितः = धारितः, मानवो देहः, यया सा, ताम्, मानवरूपेणावतीर्णां सरस्वती-मिवेत्युत्प्रेक्षा। मरन्देन = पुष्परसेन, मधुराः = मिष्टाः। अपां विशेषणम्। "अयि दलदरविन्द! स्यन्दमानं मरन्दम्, तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गा" इति पण्डितराजपद्ये प्रयुक्तोऽयं मरन्दशब्दः। मरम् = भ्रमरमरणम्, द्यति = खण्डयतीति मरन्दः, भ्रमरजीवनम्, मकरन्द इति व्युत्पत्तिलभ्यत्वमर्थस्य। पाययन्, णिजन्ताच्छतरि। कन्दाः = ऋषीणां खाद्यविशेषाः। "शालूकं कन्दमौत्पलम्" "कन्दमस्त्री मूलसस्यम" इति च वैजयन्ती। त्रियामायाः = रात्रेः। "रात्रिस्त्रियामा क्षणदा क्षपे" त्यमरेण रूढत्वम्। अत एव यामत्रयमिति प्रहरत्रयार्थकं

समीप सब सामग्री प्रस्तुत कर दी है, यवन के त्रास से सिसकियाँ भर रही, परम सुन्दरी, मानुषदेह में अवतीर्ण हुई सरस्वती-सी लगभग सात वर्ष की जिस बालिका को ढाढस देते, फूलों के रस (मधु) से मीठा जल पिलाते और कन्दों के टुकड़े खिलाते तुमने रात के तीन पहर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यामत्रयमनैषीः; सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च—"

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद्वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः ।

तस्मिन् पर्वते आसीदेको महान्कन्दरः । तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म । कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति । ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च । तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म ।

सङ्गच्छते । परिमार्गणीयानि = अन्वेषणीयानि । नपुंसकमनपुंसकेनेत्येकशेषः ।

वक्तुमियेष = कथयितुमिच्छति स्म ।

समाधौ=चित्तवृत्तिनिरोधात्मके योगे । ग्रामण्यः=ग्रामाधिपाः, 'लम्बरदार' 'जमीन्दार' इति हिन्दी, ते च ते, ग्रामे भवा ग्रामीणाः = ग्रामवासिनः, तेषां ग्रामाः=समूहाः । श्रुत्यनुप्रासप्रदर्शनमात्र-फलकोऽयम् । सरसे रौद्रादिरसाभाववति प्रकृते दोषत्वमेतस्येति केचित् । तम् = समाधिनिरतम् । कपिल-लोमश-जैगीषव्य-मार्कण्डेयाश्चिरञ्जीविनो महर्षयः। "नारद इत्यबोधि स" इत्यादि-

---

बिताये, वह इस समय सोती है, जागकर फिर उसी तरह रोएगी, इसलिए उसके माता-पिता और घर का पता लगाना चाहिये ।"

यह सुन गरम सांस लेकर ज्योंही उसने भी कुछ कहना चाहा त्योंही अचानक उन दोनों की दृष्टि पर्वत-शिखर पर पड़ी ।

उस पर्वत में एक बड़ी गुफा थी, उसमें एक पहुँचे महात्मा समाधि लगाकर बैठे थे । कब उन्होंने समाधि लगाई थी, यह किसी को विदित न था । जमींदार, ग्रामवासी किसान आकर यदा कदा उनकी पूजा करते थे, प्रणाम करते थे और स्तुति करते थे । कोई उन्हें कपिल समझते थे, तो कोई लोमश समझते थे, कोई जैगीषव्य समझते थे, तो दूसरे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स एवायमधुना शिखरादवतरन् ब्रह्मचारि-वटुभ्यामदर्शि।

"अहो ! प्रबुद्धो मुनिः ! प्रबुद्धो मुनिः ! इत एवाऽऽगच्छति, इत एवाऽऽगच्छति, सत्कार्योऽयं सत्कार्योऽयम्" इति तौ सम्भ्रान्तौ बभूवतुः।

अथ समापित-सन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियम-सम्पादनाय प्रयाते गौरवटौ, छात्रगण-सहकारेण प्रस्तुतासु च स्वागत-सामग्रीषु, "इत आगम्यतां सनाथ्यतामेष आश्रमः"

बदितिना निपातेनाभिहितत्वान्न तेषां द्वितीयान्तता विश्वसन्तिक्रियाकर्मत्वेऽपीति बोध्यम्। गृहीतृभेदादेकस्यैवानेकधोल्लेखादुल्लेखालङ्कारः। अदर्शि = दृष्टः। कर्मणि लुङि रूपम्।

सत्कार्यः = आदरणीयः। सम्भ्रान्तौ = क्षुभितौ। बहोः कालात् कन्दरायां निवसन् मुनिरकस्माद्बहिरायात इति हर्षोद्रेकेण व्याकुलौ बभूवतुः। अत एव च तदुक्तिषु साम्रेडता।

समापिता सन्ध्यावन्दनादिक्रिया येन सः, तथाभूते। आदिना स्वेष्टदेवतापूजन-स्वेष्टगुरुमन्त्रजपादिः, नित्या ये नियमाः = सन्ध्यावन्दनादयः, तेषां सम्पादनाय। छात्रगणस्य, सहकारेण = साहाय्येन। स्वागतसामग्रीषु = उपचारद्रव्येषु। "यस्य च भावेन भावलक्षणमि" ति भावाधिकरणे सप्तमी। प्रस्तुतासु = सन्नद्धासु। सनाथ्यताम् = समलंक्रियताम्।

मार्कण्डेय समझते थे। इस समय ब्रह्मचारियों ने उन्हीं को पर्वत के शिखर से उतरते देखा।

"अहा ! मुनिजी समाधि से जाग गये ! मुनिजी समाधि से जाग गये ! इसी ओर आ रहे हैं ! इसी ओर आ रहे हैं ! इनका सत्कार करना चाहिये, इनका सत्कार करना चाहिये," यों वे उतावले हुए।

तदुपरान्त सन्ध्यावन्दन आदि कृत्य समाप्त कर गुरुजीके आने पर और उनकी आज्ञा से गोरे ब्रह्मचारी के स्नान, संध्यावन्दन आदि नित्य नियम करने के लिये चले जाने पर तथा छात्रों के सहयोग से स्वागतसामग्रियोंके प्रस्तुत होने पर "इधर पधारिये, इस आश्रम को अलंकृत

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्नि-र्दिष्ट-काष्ठ-पीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च ।

तस्मिन् पूज्यमाने, "योगिराडुत्थित इति, आयात इति च" आकर्ण्य कर्णपरम्परया, बहवो जनाः परितः स्थिताः । सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः ।

अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटोराद् अश्रूयत तस्या एव बालिकायाः सकरुण-रोदनम् ।

निखिलेषु=समुपस्थितेषु सर्वेषु । जनेष्विति शेषः । काष्ठपीठम् = दारुनि-र्मितां चतुष्पादिकाम् । "चौकी" इति हिन्दी । उदयगिरिमिव = उदयाचल-मिव । आरुरोह=अधिशिश्रिये । उपाविशत्=आसितवान् । न सूर्य इवाधि-श्रित्य दूरं गतोऽपि तु तत्रैव स्थित इति क्रियाद्वयमुपात्तम् । उपमालङ्कारः ।

सुघटितम्=यथावस्थित-शोभनाङ्ग-संस्थानम् । सान्द्राम् = घनाम् । अङ्गारप्रतिमे = अङ्गारसदृशे, प्रतिमाशब्दोऽत्रोपमावाचकः, दृष्टश्च तादृशेऽर्थे "न तस्य प्रतिमा अस्ति" इति वेदे, "गतः सुखान्यप्रतिमानि हित्वे"

कीजिये" यों पास जाकर प्रणामपूर्वक निवेदन करने पर योगिराज आकर जैसे सूर्य उदयाचल पर आरूढ़ होते हैं वैसे ही उनके द्वारा निर्दिष्ट चौकी पर आरूढ़ हुए और बैठ गये ।

इधर उनकी पूजा शुरू होने पर "योगिराज की समाधि भंग हो गई है और वे आये हैं" यह खबर एक दूसरे से सुनकर चारों ओर लोगों की बड़ी भीड़ लग गई । उनके सुसंगठित शरीर का, घनी जटाओं का, सुविस्तृत अङ्गों का, लालिमासे अंगारोंके समान चमकीले नेत्रों का और मधुर तथा धीर वाणी का बखान कर रहे लोग मन्त्रमुग्ध-से हो गये ।

तदनन्तर योगिराज का पूजन-सत्कार कर ज्योंही ब्रह्मचारी गुरुने उनसे कुछ पूछना चाहा त्योंही पर्णकुटी के भीतर से उसी बालिका का करुणक्रन्दन सुनाई दिया ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततः "किमिति ? कुत इति ? केयमिति ? कथमिति ?" पृच्छा-परवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामबटु-मादिश्य कथितम्—

भगवन् ! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादित-सायन्तन-कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्र-वर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनविन्दौ इव इन्दौ, कौमुदी-कपटेन

ति वाल्मीकीये च। पृच्छा = प्रश्नः, तत्परवशे = तत्परतन्त्रे।

कुतूहलम् = कौतुकम्। वृत्तान्त-ज्ञानोत्कण्ठेति यावत्। ह्यः=गतदिवसे। सम्पादितम् = विहितम्, सायन्तनम् = सायंभवम्, कृत्यम् = सन्ध्यादि येन तादृशे। कुशास्तरणम् = कुशासनम्। "कुश की चटाई" इति हिन्दी। 'अधिशीङ्' इति कर्मसंज्ञा। धीरः = मन्दगतिः, समीरः = वायुः, तस्य स्पर्शेन। आन्दोल्यमानासु = सञ्चाल्यमानासु। व्रततिषु = लतासु। 'वल्ली तु व्रततिर्लता' इत्यमरः।

इन्दौ = चन्द्रमसि। समुदिते = उदयं प्राप्ते। चन्द्रमसं रूपयति—यामिनी = निशीथिनी, सैव कामिनी = ललना, तस्याः, चन्दनविन्दौ = ललाट-तिलके इव कौमुदी = चन्द्रिका. "चन्द्रिका कौमुदी ज्योत्स्ने" त्यमरः,

'वह क्यों रोती है ? कहाँ से आई ? कौन है ? कैसे आई ?' योगिराज के यों प्रश्न करने पर ब्रह्मचारी गुरुने साँवले ब्रह्मचारी को बालिका को ढाढ़स बँधवाने के लिये आज्ञा दे कर योगिराज से कहा—

भगवन्, यदि इसका वृत्तान्त जानने की उत्कण्ठा हो, तो सुनिये। कल सायंकाल के नित्यकृत्य से निवृत्त होकर जब मैं यहीं पर कुशासन डाल कर बैठा था, चारों ओर छात्र-गण बैठे थे, मन्द-मन्द वायु के झोंकों से लताएँ धीरे-धीरे हिलोरें ले रही थीं। रात्रिरूपी नायिका का चन्दन-विन्दु-सा चन्द्रमण्डल उदित हो चुका था, आकाश चाँदनी के बहाने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुधाधारामिव वर्षति गगने; अस्मन्नीतिवार्ता शुश्रूषुषु इव मौनमाकलयत्सु पतग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम् । तत्क्षणमेव च "कुत इदम्, किमिदमिति दृश्यतां ज्ञायताम्" इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भय-

तस्याः कपटेन = व्याजेन । वर्षतीवेत्युत्प्रेक्षा । पतगकुलेषु = पक्षिसमूहेषु । मौनम् = निःशब्दताम्, आकलयत्सु = आश्रयत्सु । किमिति मौनावलम्बनमित्युत्प्रेक्षते—अस्मन्नीतीति । शुश्रूषुषु = श्रोतुमिच्छुषु । कैरवाणाम् = सिताम्भोजानाम्, यो विकाशः = प्रफुल्लनम्, तेन यो हर्षप्रकाशः = मोदाविर्भावः, तेन मुखरेषु = शब्दायमानेषु । चञ्चरीकेषु = द्विरेफेषु । "इन्दिन्दिरो मधुकरश्चञ्चरीको मधुव्रतः" इति वैजयन्ती । क्रन्दनम् = रोदनम् । अश्रौषम् = आकर्णितम् । सप्तभिर्विशेषणैः स्वभावोक्त्या क्रन्दनं विशिनष्टि—अस्पष्टानि अक्षराणि यस्मिंस्तत् । कम्पमाना निःश्वासाः यस्मिंस्तत् । श्लथन् = शिथिलः, कण्ठः यस्मिंस्तत् । अत्यवधानेन = विशेषध्यानेन, श्रव्यम् = श्रवणार्हम्, तस्य भावस्तत्त्वं तस्मात्, हेतौ पञ्चमी । अतिशयेन दूरं दविष्ठम्, तस्य भावो दविष्ठता, अनुमिता = विज्ञाता, दविष्ठता = अतिदूरता यस्य तत् । आदिश्य = आज्ञाप्य । व्याघ्रेण = शार्दूलेन

मानो अमृत-धारा बरसा रहा था, मानो हम लोगों की धार्मिक चर्चा सुनने की इच्छा से पक्षिगण मौन धारण किये थे और कुमुदों (सफेद कमलों) के विकाश से उत्पन्न आनन्दातिरेक से भौंरे गुन-गुना रहे थे, मुझे सिसकियों से भरा हुआ अस्पष्ट करुणक्रन्दन सुनाई पड़ा। गला रुँध जाने के कारण वह घर्घर शब्दमय तथा चीत्कारमय था एवं गौर करने पर सुनाई देने के कारण सहज में ही उसकी दूरता का अनुमान होता था। मैंने तुरन्त ही "यह कहाँ से आ रहा है? क्या बात है? जरा देखो, पता लगाओ," यों आज्ञा दे कर छात्रों को भेजा। क्षण भर के बाद एक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भीता सवेगमत्युष्णं दीर्घं निश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रुप्रवाहैः स्नाता, सवेपथुः, कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। ताञ्च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्द-कोरकाग्रदतीम्, सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयन-वाष्पाणि।

अथ "कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयि-

आघ्राता = आक्रान्ता। उपमालङ्कारः। सवेपथुः=सकम्पा। एकेनाङ्के निधाय कन्यका समानीतेति स्थले क्रियापदद्वयम्। प्रधानक्रियानिरूपितकर्मत्वाभिधानेऽप्रधानक्रियानिरूपितकर्मत्वमनभिहितमप्यभिहितवत्प्रकाशत इति महाभाष्ये ध्वनितम्।

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते॥

इत्यादिना वाक्यपदीये स्पष्टीकृतञ्च। नवनीतेनेव=हैयङ्गवीनेनेव। "मक्खन" इति हिन्दी। मृणालमिव = कमलदण्ड इव, गौरीम् = श्वेताम्। लुप्तोपमा। कुन्दकोरकाः = माध्यकालिकाः, तेषामग्राणीव दन्ता यस्याः सा ताम्। "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चे" ति दत्रादेशे, उगिदन्तत्वात् ङीप्। सक्षोभम् = ससाध्वसम्।

मा भैषीः, "माङि लुङ्" "न माङ्योग" इत्यडागमनिषेधः। मा वद, निषे-

---

छात्र भयभीत, जल्दी जल्दी गरम और लम्बी साँस ले रही, बाघ से आक्रान्त हरिणी-सी, आँसुओं की धाराओं से सराबोर, काँप रही एक कन्या को गोद में बैठा कर ले आया। बहुत खोज करने पर भी उसकी सखी या साथी का पता नहीं लगा। चन्द्रमा की कला से बनी हुई-सी नवनीत से रची हुई सी कमलकन्द के समान गोरी, कुन्दपुष्प के समान सुन्दर दन्तपंक्ति वाली उस बालिका को रोती देख कर हम लोग भी अपने आँसू न रोक सके। तत्पश्चात् "बेटी, मत डरो, बच्ची, तुम्हें माँ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ष्यामः, दुहितः ! खेदं मा वह, भगवति ! भुङ्क्ष्व किञ्चित्, पिव पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः" इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, "बालिके ! कथय क ते पितरौ ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता ? किं ते कष्टम् ? कथमरोदीः ? किं वाञ्छसि ? किं कुर्मः" इति पृष्टा मुग्धतया अपरिकलित-वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव

धार्थकोऽत्र माशब्दो न तु माङ्, अत एव लोट्। प्राणान् = असून् "पुंसि भूम्न्यसवः प्राणा" इत्यमरः। आरोपयः, "स्मोत्तरे लङ्चे" ति लङ्। शोकज्वालया = शोकाग्निना, अवलीढम् = व्याप्तम्। क्रोडे = अङ्के। मुग्धतया = बालस्वभावादज्ञतया। अपरिकलितम्=अविज्ञातम्, वाक्पाटवम्=भाषणचातुर्यं यया सा। भयेन=भीत्या। हेतौ तृतीया। विशिथिलः=अस्तव्यस्तः, वचनविन्यासः=भाषणम्, यस्याः सा। चकितचकितेव=अतिभी-

के निकट पहुँचा देंगे, बेटी ! दुःख मत करो, रानी बिटिया, कुछ खाओ, दूध पीओ, ये तुम्हारे भाई हैं, तुम जो कहोगी वही हम करेंगे। रोने से प्राणों को सन्देह में मत डालो, इस कोमल शरीर को शोकाग्नि की लपटों से मत झुलसाओ।" यों हजार तरह समझाने-बुझाने से किसी प्रकार उसे विश्वास हुआ, उसने थोड़ा दूध पीया। तदुपरान्त मैंने उसे गोद में लेकर पूछा, "बच्ची, बतलाओ तो तुम्हारे माता-पिता कहाँ रहते हैं ? तुम इस आश्रम के छोर पर कैसे आई ? तुम्हें क्या दुःख है ? तुम क्यों रोई ? क्या चाहती हो ? तुम्हारे लिए हम क्या करें ?" वह निरी बच्ची थी, भाषण चातुरी से बिलकुल अपरिचित थी, मारे डर के उसका बोलना अस्तव्यस्त था, लज्जा के कारण आवाज बहुत धीमी थी, शोक से गला रुँधा था, अत्यन्त चकित हुई-सी उसने किसी प्रकार

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कथं कथमपि अवोधयदस्मान् यद्-एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति। एनां च सुन्दरीमाकलय्य कोऽपि यवनतनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कश्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य विभीषिकयाऽस्याः क्रन्दन-कोलाहलं शमयितुमियेष; तावदकस्मात्कोऽपि काल-कम्बल इव भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन-तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश-पलाशि-श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत

तेव। नेदीयसि=अतिनिकटे। "अन्तिकवाढयोर्नेदसाधा" वित्यन्तिकस्य नेदादेशः। आकलय्य = निश्चित्य। इयं न ब्राह्मणतनया किन्तु क्षत्रियतनया स्नातुं च गता न मात्रा सह, अपि तु दास्या, पुरोहितं पितरं दासीं च मातरं मेन इत्यग्रेतनकथया स्पष्टीभविष्यति। असिधेनुकाम् = छुरिकाम्। "छुरिका चासिधेनुके" त्यमरः। विभीषिकया = भयप्रदर्शनेन। कालश्चासौ कम्बल इति कर्मधारयः। कृष्णवाची कालशब्दः। कालस्य = यमस्य कम्बल इवेति वा। शाल्मलितरुर्लोके "सेंमर" इति निगद्यते। पलाशाः = किंशुकाः, ते च ते पलाशिनः=तरवः, तेषां श्रेण्याम्=पङ्क्तौ। पलाशानि पत्राणि वा, "पत्रं पलाशं छदनम्" इत्यमरः। घुणाक्षरन्यायेन,

बड़ी कठिनाई से हमें समझाया कि यह इसी अतिनिकटवर्ती गाँव में रहने वाले किसी ब्राह्मण की कन्या है। सुन्दरी देख कर कोई मुसलमान का लड़का नदी के किनारे से माँ के हाथ से छीन कर रोती-बिलखती हुई इसे लेकर भागा। कुछ मार्ग तय कर जब उसने छूरा दिखा कर भय-प्रदर्शन द्वारा इसके रोने का हल्ला शान्त करना चाहा; तो इतने में एकाएक काला कम्बल-सा एक रीछ बन के छोर से आ निकला। उसे देखते ही वह मुसलमान का लड़का इस कन्या को वहीं पर छोड़ कर एक सेंमर के पेड़ पर चढ़ गया। और यह ब्राह्मण-बालिका ढाक के पेड़ों के झुरमुट में प्रवेश कर घुणाक्षर-न्याय से इधर ही आ निकली,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एव समायाता यावद्भयेन पुना रोदितुमारब्धवती ; तावदस्मच्छात्रेणैवाऽऽनीतेति।

—तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच—"विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः ?" ततः स उवाच—महात्मन्! क्वाधुना विक्रमराज्यम्? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजय-ध्वनिः? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः? क्वापि मठे मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुरा-

काऽऽवेधकैः कामिभिः काष्ठानुबधे क्रियमाण यथाऽकस्मादन्तरमिव प्रतीयत, तथा यत्रावितर्कित-कार्य-सिद्धस्तत्रेत्थमभिधीयते। पुना रोदितुम्, "रो रि" इति लोपे "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः।

विरहय्य = परित्यज्य। सप्तदशशतकानि, शिवराजसमयसूचनार्थमिदम्। शिवराजकालिकयवनदुराचारान्वर्णयति—क्वेत्यादि। मठे मठे = प्रतिच्छात्रालयम्। "मठश्छात्रादिनिलय" इत्यमरः। वेदाः=वेदपुस्तकानि। विच्छिद्य = विपाट्य, वीथीषु = पथिषु, उद्धूय = उत्ताल्य। धूम एव ध्वजो येषां ते तेषु = वह्निषु। ध्मायन्ते = ज्वाल्यन्ते। पुराणानि =

जब यह मारे भय के पुनः रोने लगी तब हमारा विद्यार्थी इसे ले आया।

यह सुन कर क्रोधाग्नि की लपटों से प्रदीप्त हुए-से योगिराज बोले—"विक्रम के राज्य में भी अत्याचारियों का यह पापमय उपद्रव कैसा ?"

तदनन्तर उन्होंने (ब्रह्मचारी गुरु ने) कहा—महात्मा जी, अब विक्रम राज्य कहाँ है? वीर विक्रमादित्य को तो भारत भूमि को छोड़ कर गये हुए सत्रह सौ वर्ष बीत गये हैं। अब प्रतिमन्दिर में जय-जयकार कहाँ? अब प्रत्येक तीर्थ में घण्टा-निनाद कहाँ? आज प्रत्येक पाठशाला में वेद-घोष कहाँ? आज तो वेद की पोथियाँ फाड़-फाड़ कर सड़कों पर बिखेरी जाती हैं, धर्मशास्त्र के ग्रन्थ अस्त-व्यस्त कर अग्नि में

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते। "क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद्दारा अपह्रियन्ते, क्वचिद्धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद्रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः" इत्येव श्रूयतेऽवलोक्यते च परितः।

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच—कथमेतत् ?

ब्रह्मवैवर्त्तादीनि। पिष्ट्वा = चूर्णीकृत्य। भाष्याणि = सूत्रव्याख्यानानि वात्स्यायनादिनिर्मितानि। भ्राष्ट्रेषु = भर्जनपात्रेषु। "क्लीवेऽम्बरीषं भ्राष्ट्रो ने" त्यमरः। "भाड" इति हिन्दी। दाराः = भार्याः। दृ विदारण इत्यस्माण्णिजन्तात् "दारजारौ कर्त्तरि णि लुक् चे" ति घञ्। "दाराक्षतलाजासूनां बहुत्वम्।"

क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्।
क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः॥

इति हेमचन्द्रानुसारेण टाबन्तोऽप्ययम्। यथा च "दारा त्रय" इति पद्ये दृश्यते तथा टाबन्तस्यैकवचनादिष्वपि प्रयोगस्तद्दिष्टोऽवधार्यते। क्वाधुनेत्यारभ्य परित इत्यन्ते समतानाम गुणो दण्डिमते। प्रसादस्तु सर्वसम्मतः। रीतिर्वैदर्भी।

झोंके जाते हैं, पुराण की पुस्तकें पीस कर पानी में फेंकी जाती हैं, भाष्य-ग्रन्थ तोड़-मरोड़ कर भाड़ों में झोंके जाते हैं। "कहीं पर मन्दिर तोड़े जाते हैं, तो कहीं पर तुलसीवन रौंदे जाते हैं; कहीं पर स्त्रियोंका अपहरण होता है, तो कहीं पर धन-सम्पत्ति लूटी जाती है; कहीं करुणाक्रन्दन है, तो कहीं रुधिर की धाराएँ हैं, कहीं आग लगाई जाती है और कहीं घर धराशायी किये जाते हैं।" चारों ओर यही सुनाई देता है और यह दिखाई देता है।

यह सुनकर खिन्न और विस्मित हुए योगिराज ने कहा—यह

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ह्य एव पर्वतीयाञ्छकान्विनिर्जित्य महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजय-पताका मम चक्षुषोरग्रत इव समुद्धूयन्ते, अधुनाऽपि तेषां पटह-गोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत्कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानीति ?

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम्—

भगवन्! बद्ध-सिद्धासनैर्निरुद्ध-निश्वासैः प्रबोधितकुण्डलिनी-

पर्वतीयान्=पर्वतप्रान्तस्थान्। स्वराजधानीम्=उज्जयिनीम्। आदित्य-पदलाञ्छनः=आदित्यपदविभूषितः। लक्ष्मवाची लाञ्छनशब्दः, "कलाङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणमि" त्यमरः। समुद्धूयन्ते=कम्पमाना विराजन्ते। पटह—गोमुखादीनाम्=वाद्यानाम्। पटह=नगारा, गोमुख=तुरही इति हिन्दी। भाविकालङ्कारोऽतीतस्य प्रत्यक्षायमाणत्वात्।

भवादृशैः=योगनिरतैः, कालस्य वेगः=गतिर्न ज्ञायत इत्यन्वयः। भवादृशान् विशिनष्टि—बद्धं सिद्धासनम्=योगशास्त्रीय आसनविशेषो यैस्तैः। निरुद्धाः = अन्तर्नियमिताः, निश्वासाः = प्राणा यैस्तैः। प्रबोधिता = उद्योतिता, कुण्डलिनी = पराशक्त्यभिधेया नाडीरूपा प्रधानव्यक्तिस्था-

---

कैसे ? श्रीमान् वीर विक्रमादित्य कल ही पर्वत प्रान्तनिवासी शकों को पराजित कर महान् जय-जयकार के साथ अपनी राजधानी उज्जयिनी में प्रविष्ट हुए। आज भी उनकी विजय वैजयन्ती मेरे नेत्र के सामने मानों लहरा रही है, इस समय भी उन नगाड़े, तुरही आदि बाजों की ध्वनि मानों मेरे कर्ण-विवरों को पूर्ण कर रही है, तो आज कैसे सत्रह सौ वर्ष बीत गए ?

मुनि के वचन सुनकर सबके स्तब्ध और विस्मत होने पर ब्रह्मचारी गुरु ने प्रणाम कर कहा—भगवन्, सिद्धासन बाँध कर, साँस रोक कर, कुण्डलिनी को जगा कर दसों इन्द्रियों पर विजय प्राप्त कर, अनाहत

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कैर्विजित-दशेन्द्रियैरनाहत-नाद-तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये

नम्, यैस्तैः। विजितानि = वशीकृतानि, दशेन्द्रियाणि यैस्तैः। वाक्-पाणि-पाद-पायूपस्थानि पञ्च कर्मेन्द्रियाणि, चक्षुः-श्रोत्र-घ्राण रसन-त्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि। अनाहतश्चासौ नादः, तस्य तन्तुं=तन्तुतुल्यां सूक्ष्मावस्थालतिकाम्। सुषुम्णामध्ये स्थित तुरीय पद्ममनाहतनाम्ना योगशास्त्रे प्रसिद्धम्, तदुत्थो नादोऽनाहतनादः। आज्ञाचक्रम् = भ्रुवोर्मध्ये द्विदलात्मकं चक्रम्। संस्पृश्य = ध्यानावलम्बनं कृत्वा। चन्द्रमण्डलम् = ततः परवर्ति षोडशदलात्मकं चक्रम्। तेजःपुञ्जम्=सोमचक्रवर्तिनं महाप्रकाशम्। सहस्रदलकमलस्य = ब्रह्मरन्ध्रवर्तिनः सहस्रारचक्रस्य। परमात्मानम् = परं ब्रह्म। तत्रैव = ब्रह्मणि। रममाणैः = विहरद्भिः। अनिर्वचनीयमानन्दमुपभुञ्जद्भिरिति यावत्। मृत्युञ्जयैः = स्वायत्तीकृतकालवृत्तिभिः, आनन्दमात्रस्वरूपैः = आनन्दमये ब्रह्मणि लीनत्वात्तत्स्वरूपैः। यत्तु योगशास्त्रमात्रप्रसिद्धानां शब्दानामुपादानं तच्छास्त्रानभिज्ञस्य बोधाजनकमित्यप्रतीतत्वदोषदुष्टमिदमिति—तन्न, अत्रत्यगद्यस्य योगशास्त्रोक्त-ध्यान-प्रकारे व्युत्पत्त्याधायकत्वादेतदर्थमेव समुल्लिखितत्वाच्च। अत एव "न सा विद्या न तच्छास्त्रमि" त्यादिना साहित्यस्य व्युत्पत्त्यापि तदर्थस्य सर्वमयत्वं

नाद की तांत के तुल्य सूक्ष्मावस्था का अवलम्बन कर भौंहों के बीच में द्विदलरूपीचक्र को ध्यान का लक्ष्य बना कर, चन्द्रमण्डल (उसके ऊपर के षोडश दलात्मक चक्र) को भेद कर, चन्द्रचक्रवर्त्ती महा प्रकाश का तिरस्कार कर, सहस्रदल कमल के अन्दर प्रविष्ट हो परमात्मा का साक्षात्कार कर, उन्हीं में रम रहें मृत्यु के विजेता, केवल आनन्दमात्ररूप हो ध्यान में स्थित आपके सदृश महात्मा लोगों को कालवेग प्रतीत नहीं होता। उस समय आपने जिन लोगों को देखा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवता ये पुरुषा अवलोकितास्तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामो भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति—

इदमाकर्ण्य किञ्चित्स्मित्वेव परितोऽवलोक्य च योगी जगाद—

सत्यं न लक्षितो मया समयवेगः। यौधिष्ठिरे समये कलित-समाधिरहं वैक्रम-समये उदस्थाम्। पुनश्च वैक्रम-समये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत्सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति।

सूचितम्। कथमन्यथा "बहिर्विकारं प्रकृतेः पृथगि" त्यादीनां "वागर्थाविव संपृक्तावि" त्यादीनाञ्च न तद्दोषदुष्टत्वमित्यलमसदावेशेन।

पञ्चाशत्तमः = पञ्चाशत्संख्यापूरकः। कैमुतिकन्याय-सूचकोऽपिः। यौधिष्ठिरे=युधिष्ठिरस्यायं समयो यौधिष्ठिरस्तस्मिन्।

होगा, उनकी पचासवीं पीढ़ी का पुरुष भी इस समय नहीं दिखाई देता। आज नदियों के वे स्रोत नहीं रहे, नगरों की वह स्थिति नहीं रही, पर्वतों का वह आकार नहीं रहा और नहीं रही जंगलों की वह गहनता। अधिक क्या कहें भारतवर्ष इस समय अन्य-सा ही हो गया है।

यह सुन कर थोड़ा-सा मुसकराकर और चारों ओर दृष्टि डाल कर योगिराज ने कहा—सचमुच मुझे समय के वेग की प्रतीति नहीं हुई। मैं युधिष्ठिर के शासन काल में समाधि लगा कर विक्रम के शासन काल में जागा और फिर विक्रम के शासन काल में समाधिस्थ होकर इस अत्याचारमय समय में जागा हूँ, मैं फिर जाकर समाधि ही लगाऊँगा, किन्तु तब तक संक्षेप में कहिए भारत वर्ष की क्या दशा है?

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्संश्रुत्य भारतवर्षीय-दशा-संस्मरण-संजात-शोको हृदयस्थ-प्रसाद-सम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो वाष्पान-विगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य, ब्रह्मचारिगुरुः प्रवक्तुमारभत—

भगवन् ! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तो-दीरणैर्न दीर्य्यते, लोहसारमयं हृदयम् , यत् संस्मृत्य यावनान्पर-स्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिग-

भारतवर्ष-सम्बन्धिन्या दशायाः संस्मरणेन सञ्जातः शोको यस्य सः। हृदयस्थो यः प्रसादः=प्रसन्नता, तस्य सम्भारः=अतिशयः, तस्योद्गिरणे=प्रकटने यः श्रमः, तेनेवेत्युत्प्रेक्षा। धर्मस्य=श्रुतिप्रतिपाद्यस्य, यद् ध्वंसनम्=उन्मूलनम् , तस्य घोषणैः=कथनैः।

दम्भोलिघटिता=वज्रमयी। "दम्भोलिरशनिर्द्वयोरि" त्यमरः। दारुणानाम्=भयानकानाम् , दानवानाम्=म्लेच्छानाम् , उदन्तस्य=वृत्तान्तस्य। "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादि" त्यमरः। उदीरणैः=कथनैः, लोहसारमयम् = अयोनिर्मितम्। सहस्रात् पराः परस्सहस्रास्तान्। राजद-

यह सुन कर भारतवर्ष की दुर्दशा के स्मरण से ब्रह्मचारी गुरु का शोक उमड़ आया, मानों हृदय में स्थित प्रचुर प्रसन्नता के उगलने के श्रम से स्वर धीमा पड़ गया, 'धर्म के विध्वंस की कथाओं से योगिराज के धैर्य को च्युत मत करो' यों मानों कण्ठ को रूँधते हुए आँसुओं की कुछ परवाह न कर (आँसुओं को कुछ न गिन कर), नेत्र पोंछ कर गरम साँस छोड़ कर कातर नेत्रों से चारों ओर देख कर ब्रह्मचारी गुरु ने अति मन्द स्वर से कहना आरंभ किया।

महाराज ! यह मेरी यह जीभ वज्र से बनी है, तभी तो भीषण म्लेच्छों के वृतान्त के कथन से नहीं कट रही है, मेरा हृदय लोहे का बना हुआ है, तभी तो यवनों के हजार दुराचारों का स्मरण कर इसके सैकड़ों टुकड़ों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्य-वंश्यांश्चाभिमन्यामहे—

उपक्रममसुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्रा-द्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चित-रोम-कञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानञ्च स्वरम्, अवागच्छत् "सकलानर्थमयः, सकल-वञ्चनामयः, सकलपापमयः, सकलोप-द्रवमयश्चायं वृत्तान्तः इति, अत एव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयि-षामि" इति च विचिन्त्य—

न्तादित्वात्सहस्रशब्दस्य परनिपातः। पारस्कारादित्वात्सुट्। विशेष्यनिघ्नत्वाद्वा-च्यलिङ्गता। नास्मज्जीवनं जीवनम्, अपि तु भस्त्रेव श्वसनमिति सूचयन् जीवाम इत्याभिधाय श्वसिम इति।

विमनायमानम् = दुर्मनायमानम्। हरिद्रा = महारजनं, तद्द्रवेण = तद्रसेन, क्षालितमिव = धौतमिव। उत्प्रेक्षा। निपतन्तः = स्खलन्तः, वारिबिन्दवः = अश्रुकणा याभ्यां तौ। अञ्चितरोमकञ्चुकम् = सरोमा-ञ्चम्। जिग्लापयिषामि = ग्लपयितुमिच्छामि। चिखेदयिषामि =

नहीं होते और जलकर राख नहीं हो जाता। हम लोगों को धिक्कार है, जो आज भी जीते हैं, सांस लेते हैं, टहलते हैं और अपने को आर्यों के वंशज मानते हैं।

इस उपोद्घात को सुनकर और मुनि का उदास और हल्दी के रस से धोया-सा मुँह, आँसुओं की वृष्टि कर रहे नेत्र, रोमाञ्चों से भरा शरीर, फड़कता हुआ ओठ तथा रूँधा हुआ गला देख कर योगिराज समझ गये कि "यह वृत्तान्त बहुत-से अनर्थों से भरा हुआ, सब प्रकार की वञ्चनाओं का आकर, सब पापों का निधान और सब उपद्रवों से सना हुआ है। अतएव उसके केवल स्मरण से ब्रह्मचारी गुरु के हृदय को ठेस लगती है, इसलिये मैं इसे व्यर्थ में म्लान नहीं करना चाहता और न खिन्न ही करना चाहता हूँ," यह सोच कर—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुने ! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकल-कालनः करालः कालः । स एव कदाचित् पयः-पूर-पूरितान्यकूपार-तलानि मरूकरोति । सिंह-व्याघ्र-भल्लूक गण्डक-फेरु-शश-सहस्र-व्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यान-तडाग-गोष्ठमयानि नगराणि च काननीकरोति । निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकै राजसू-

खेदयितुमिच्छामि । सकलानां कलानां यः कलापः = समूहः, तत्कलनः = तन्निर्माता । सकलान् कालयतीति सकलकालनः = सकलजरयिता । कालः = महाकालः । "कालो मृत्यौ महाकाले समये यमकृष्णयोरि" ति मेदिनी । अकूपारतलानि = समुद्रतलानि । "समुद्रोऽब्धिरकूपार" इत्यमरः । मरूकरोति = मरुतुल्यानि करोति । अभूततद्भावे च्विः । गण्डकः = खड्गी, लोके "गैंडा" इति । फेरवः = शृगालाः । "शृगालवञ्चकक्रोष्टु-फेरुफेरवजम्बुका" इत्यमरः । मन्दिराणि = देवनिवासाः । प्रासादाः = भूभृन्निवासाः । हर्म्यम् = धनिकावासः । "हर्म्यादि धनिनां वास" इत्यमरः । शृङ्गाटकम् = चतुष्पथम् । "चौराहा" इति हिन्दी । चत्वरम् = अङ्गणम् । "अङ्गणं चत्वराजिरे" इत्यमरः । उद्यानम् = वाटिका । "पुमानाक्रीड उद्यानम्" इत्यमरः । "गोष्ठं=गोस्थानकमि" त्यमरः । "गोशाला" इति हिन्दी । प्राचुर्यार्थे मयट् । एतत्प्रचुराणीत्यर्थः । काननीकरोति = जङ्गलीकरोति । यायजूकैः = इज्याशीलैः । "इज्याशीलो यायजूक" इत्यमरः ।

मुनिजी, यह भगवान् कराल काल बड़ा विलक्षण है, यही सकल कलाओंके समूह का निर्माण करता है और सबको अपनी उदरदरी में निगलनेवाला (संहार-कर्ता) भी यही है । यही कभी जलराशि से परिपूर्ण समुन्द्रतलों को मरुभूमि के सदृश बना डालता है, हजारों शेर, चीते, रीछ, गेंडे, सियार, खरगोशों से भरे जंगलों को नगर बना देता है और प्रचुर मन्दिर, राजभवन, घर, चौराहे, चबूतरे, बाग-बगीचे, तालाब और गोशालाओं से पूर्ण नगरों को जंगल बना देता है । इतिहास के पृष्ठों पर दृष्टि दौड़ाइये, कभी इसी भारतवर्ष में याज्ञिकों ने राजसूय आदि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतप-हिम-सहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः सम्मृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्य-वृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्"—इति कथयित्वा तूष्णीमवतस्थे।

अथ स मुनिः—"भगवन्! धैर्येण, प्रसादेन, प्रतापेन, तेजसा,

व्ययाजिषत=कृताः। व्युपसृष्टाद् यजेर्लुङि। अतापिषत=तप्तानि। मन्दुरीक्रियन्ते = वाजिशालीक्रियन्ते। "वाजिशाला तु मन्दुरे" त्यमरः। पात्यन्ते, पातिव्रत्यात्। व्यभिचार्यंत इत्यर्थः। धीरधौरेयः = धीरधुरन्धरः। विधुरयसि=विकलयसि। "वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिष्वि" ति मेदिनी। शुश्रूषते = श्रोतुमिच्छति। "ज्ञाश्रुस्मृदृशां सन" इत्यात्मनेपम्।

सनाथितवति = सनाथं कृतवति। धैर्यादिना साकं सनाथीकरणमिति

विविध यज्ञों का अनुष्ठान किया था, कभी यहीं पर ऐसी भीषण तपस्याएँ की गई थीं, जिनमें वृष्टि, आँधी, घाम और हिमपात का सहन करना मामूली बात थी। परन्तु इस समय म्लेच्छों द्वारा गौओं की हत्या की जाती है, वेदों की पोथियाँ फाड़ी जाती हैं, स्मृतियाँ कुचली जाती हैं, मन्दिर अश्वशाला बनाये जाते हैं, सती-साध्वी स्त्रियों का पातिव्रत्य नष्ट किया जाता है और सन्तों को संताप पहुँचाया जाता है। यह सब उसी महाकाल की महिमा है। आप तो धीरों के अग्रगण्य है, फिर क्यों धैर्य को शिथिल करते हैं। शान्ति का अवलम्बन कर अत्यन्त संक्षेप से यवन-राज्य का थोड़ा वृत्तान्त कहिये। यद्यपि यह हमारे लिये अनावश्यक है, फिर भी न मालूम क्यों मेरा हृदय उसे सुनना चाहता है।" यह कह कर योगि-राज चुप हो गये।

योगिराज के चुप होने के अनन्तर मुनि ने कहा—"भगवन्! जब राजचूडामणि वीर विक्रमादित्य धीरता, प्रसन्नता, प्रभाव, तेज,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण विद्यया, च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, शनैः शनैः पारस्परिक-विरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेष प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजिनी-स्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, पर-

---

सहोक्तिरलङ्कारः। सौकुमार्यं नाम गुणः, अमङ्गलस्य विस्पष्टमनभिधानात्। तत्र भवति = श्रेष्ठे। "तत्र च भावेने" ति सप्तमी। पारस्परिकविरोधेन विशिथिलीकृतानि = शिथिलतामापादितानि स्नेहबन्धनानि यैस्तेषु। भामिनीनाम् = मानिनीनाम्, ये भ्रूभङ्गाः = सकटाक्षेक्षणानि, भूरिभावाः = हावाद्याश्चेष्टाः, तेषां प्रभावेण परभूतानि = तिरस्कृतानि, वैभवानि = धनानि येषां तादृशेषु। गजिनी = "गज़नी" इति लोके प्रसिद्धा। संस्कृतशब्दापभ्रंशीभूता एव सर्वे भाषाशब्दा इत्यभिप्रायेण प्रायः सार्वत्र-संस्कृतशब्दानामेव नामादिष्वपि प्रयोगः। महामदः = महमूद इति लोक-प्रसिद्धं तन्नाम, देशनाम्ना "महमूद गजनवी" इति वृत्तेषु समुल्लिखितम्।

बल, पराक्रम, शान्ति शोभा, सुख, धर्म और विद्या के साथ परलोक को कूच कर गये, राजाओं में पारस्परिक विरोध से स्नेह-बन्धन ढीला पड़ गया, भट लोग कामिनियों के कटाक्षदर्शन और हाव-भाव आदि विविध चेष्टाओं के प्रभाव से धन-दौलत बरबाद कर चुके, मन्त्री लोग स्वार्थचिन्ता में संलग्न हो चुके और केवल प्रशंसा ही राजाओं को प्रिय लगने लगी एवं विद्वान् पुरुषों में "आप इन्द्र हैं, आप वरुण हैं, आप कुबेर हैं" यों केवल चाटुकारिता ही शेष रह गई, उस समय गजनीनिवासी महमूद नाम के किसी मुसलमान ने सेना के साथ भारतभूमि में प्रवेश किया। वह प्रजा को लूट कर, मन्दिरों को धराशायी कर,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत् एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत् । तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेश-चूडायितं सोमनाथतीर्थमपि धूलीचकार । अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते; परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत् । तत्र हि महार्ह-वैदूर्य-पद्मराग-माणिक्य-मुक्ताफलादि-जटितानि कपाटानि, स्तम्भान्, गृहावग्रहणीः, भित्तीः, वलभीः, विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय-मण-सुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां

अलुलुण्ठत् = लुण्ठितवान् । गुर्जरदेशचूडायितम् = गुर्जरदेशभूषणतुल्यम् । धूलीचकार = नाशयामास । जटितानि, 'जट झट संघात' इत्यस्य प्रयोगः । ''जड़े हुवे'' इति हिन्दी । गृहावग्रहणीः = देहलीः । भित्तीः = कुड्यानि । वलभीः = गोपानसीः । ''गोपानसी तु वलभिच्छादने वक्रदारुणी'' त्यमरः । ''छज्जा'' इति ''धरन'' इति वा हिन्दी । मणशब्दो लोके ''मन'' इति ख्यातः । चञ्चता = समुच्छलता, चाकचक्येन, चकितीकृताः = विस्मेरीकृताः, अवलोचकलोचनानाम् = द्रष्टजननयनानाम्,

देवमूर्त्तियों को तोड़-फोड़ कर, हजारों लोगों को दास बना कर, सैकड़ों ऊँटों पर रत्नराशि लाद कर अपने देश ले गया। उसे लूट-खसोट का स्वाद लग गया था, अतः इसी तरह बार-बार आकर बारह बार उसने भारत वर्ष को लूटा। उसी अपनी चढ़ाई के सिलसिले में एक बार उसने गुर्जर देश के भूषण-से सोमनाथ तीर्थ को भी धूल में मिला दिया। आज तो उस तीर्थ का नाम भी किसी को याद नहीं है, लेकिन उस समय उसका लोकोत्तर वैभव था। उसमें बहुमूल्य वैदूर्य (वालवायज), पद्मराग, हीरे, मोती आदि रत्नों से जड़े हुए किवाड़, खम्भे, देहली, दीवार, छज्जे, कबूतरों के दरबे सबको छान-छान कर रत्नराशि लूट कर, दो सौ मन वजन की सोने की सिकड़ी पर लटकने वाली देदीप्यमान चमचमाहट से दर्शकों के नेत्रों को चमत्कृत कर देने वाली महाघण्टा को जबर-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसह्य संगृह्य, महादेवमूर्तावपि गदामुदतूतुलत् ।

अथ "वीर ! गृहीतमखिलं वित्तम्, पराजिता आर्य्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोध-श्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वलय, किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव-प्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रा-यस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु; "नाहं मूर्तीर्विक्रीणामि, किन्तु भिनद्मि" इति संगर्ज्य, जनताया हाहाकार-कलकलमाकर्णयन् घोर-

निचयः = समूहो यया ताम् । उदतूतुलत् = उदतिष्ठिपत् । प्रहृतवानिति यावत् । उत्पूर्वकादुन्मानार्थकाचौरादिकात्तुलधातोः कर्त्तरि लुङि । "अकिञ्चि-त्करीं जडामि" ति तदीयबोधमादाय तत्प्रीतये वा, न वस्तुगत्येति बोध्यम् । स्प्राक्षीः, माङ्योगे लुङ्, अत एव नाट् । स्पार्क्षीः, स्पृक्ष इत्यपि रूपे । जन-तायाः = जनसमूहस्य । अतुत्रुटत् = अभिनत्, भेदितवानित्यर्थः ।

दस्ती अपने आधीन कर उसने महादेव जी की मूर्ति पर भी गदा उठाई ।

उसके बाद "वीर, आपने सम्पूर्ण धन ले लिया है, आर्य-सेना को परास्त कर दिया, हम लोगों को कैद कर लिया, निर्मल यश का संचय कर लिया, इससे भी आपकी क्रोधाग्नि शान्त नहीं होती है, तो हमें पीटिये, मारिये, चीरिये काटिए, पहाड़ से गिराइए, जल में डुबाइये, टुकड़े-टुकड़े कीजिए, बूटी-बूटी काट डालिये, जला डालिये, किन्तु इस बेचारी जड़ महादेव-मूर्ति को छोड़ दीजिये, यदि हमारी इस प्रार्थना को भी स्वीकार नहीं करते हो तो हम लोगों से और दो करोड़ स्वर्णमुद्रा लीजिये, हमें बचाइये, इस भगवन्मूर्ति को मत छूइए !" पुजारी के इस तरह बार बार प्रार्थना करने, गिड़गिड़ाने, पैरों पर पड़ने, भूमि पर लोटने और प्रणाम करने पर 'मैं मूर्ति को बेचता नहीं, किन्तु तोड़ता हूँ' यों गरज कर उसने जनता की हाहाकार ध्वनि के बीच भीषण गदा से मूर्ति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गदया मूर्तिमतुत्रुटत् । गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त । स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत् ।

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीन-नामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या

उच्छलितानि = उत्पतितानि । दग्धमुखः = दुष्टः । "मुँहजरा" इति हिन्दी । क्रमेलकाः = उष्ट्राः, "उष्ट्रे क्रमेलकमयमहाङ्गा" इत्यमरः । विजयध्वजिनीम् = विजयध्वजवतीम् । "न कर्मधारयादि" ति निषेधस्यासार्वत्रिकत्वमुक्तम् ।

गोरदेशः = सिन्धुनद्याः पश्चिमदिशि यवनप्रधानो देशविशेषः । शहाबुद्दीनमपि देशनाम्ना "शहाबुद्दीन गोरी" ति कथयन्ति । अध्वनीनम् = पान्थम् । चतुर्भिरङ्गैः समेता चतुरङ्गिणी । "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमि" त्यमरः । अनीकिन्या = सेनया । शीतलशोणि-

तोड़ ही दी । गदा के गिरते ही मूर्ति के अन्दर से अनेक अरब पद्म मूल्य के रत्न बिखर कर चारों ओर छिटक गये । वह जलमुँहा उन रत्नों और मूर्त्ति के टुकड़ों को ऊँटों की पीठ पर लाद कर, सिन्धु नद को पार कर अपनी विजयपताका फहरा रही है ऐसी गजनी नाम की राजधानी में प्रविष्ट हुआ ।

तत्पश्चात् समय के फेर से संवत् १०८७ वि० में महमूद की शोक और क्लेश के साथ मृत्यु होने पर 'गोर' देशनिवासी शहाबुद्दीन नामक किसी तुर्क ने पहले गजनी पर आक्रमण कर महमूद के वंशजों को यमलोक के पथ के पथिक बना कर, सब प्रजा को पशुओं की भाँति मार कर, उनके रुधिर से गीली मिट्टी से गोर देश में बहुत से महल बना कर, चतुरङ्गिणी सेना के साथ भारतवर्ष में प्रवेश कर युद्धेच्छा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तर-द्वादश-शतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव ।

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारस्परिक विरोध-ज्वर-ग्रस्तं विस्मृत-राजनीतिं भारतवर्ष-दुर्भाग्यायमाणमाकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्य्यन्तमखण्ड-मण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार । तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः, रिङ्गत्तरङ्ग-भङ्गा गङ्गाऽपि शोणित-शोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि

तान् = अनुष्णरक्तान्, युद्धेच्छाविरहितान् इति भावः । असयन् = असिना घ्नन् । अश्वयाम्बभूव = अश्वैरतिचक्राम । 'तेनातिक्रामती' ति णिच् । विस्मृता राजनीतिः = "वयं पञ्च वयं पञ्च वयं पञ्च शतञ्च ते । परैः साकं विवादे तु वयं पञ्चोत्तरं शतमि" त्येवं यौधिष्ठिरनीतिः, येन तम् । आकलय्य = अवधार्य । विशस्य = घातयित्वा, अकीटकिट्टम् = कीटकिट्ट-विरहितम् । कीटाः = कृमयः, किट्टम् = मलम् । अस्थिगिरयः = कीकसपर्वताः । गिरिशब्दप्रयोगो महतो नाशकाण्डस्य ध्वननाय । रिङ्गन्तः=चलन्तः, तरङ्गभङ्गा = ऊर्मिभेदा यस्यां सा । शोणितेन शोणा = रक्ता । शोणीकृता = शोणनदतामापादिता । मेकलगिरिसमुद्भूतो विहारविहारो महानदः

विहीन भारतीय जनता को क्लेश पहुँचाते हुए सन् १२५० ई० में दिल्ली पर घोड़ों द्वारा चढ़ाई कर ली ।

तदुपरान्त उसने दिल्ली के अधिपति पृथ्वीराज और कन्नौज के राजा जयचन्द को, आपस की फूट रूपी ज्वर से ग्रस्त, राजनीति से कोरे तथा भारतवर्ष के दुर्भाग्य ऐसे जान कर, दोनों को कत्ल कर, बनारस तक के सारे भूमण्डल के महाराज्य को कीट और मल से अस्पृष्ट महारत्न के समान हथिया लिया । उसने बनारस में भी हड्डियों के बहुत से पहाड़ चुन दिये । चञ्चल तरङ्गों की परम्पराओं से व्याप्त गङ्गा को रुधिर से लाल कर शोण नद बना डाला और हजारों देवमन्दिर मटियामेट कर दिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूमिसात्कृतानि ।

स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीन-नामा प्रथमभारतसम्राट् संजातः।

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुः भारतवर्षस्य, तथापि शान्तिप्रयो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिल्लीवल्लभतां कलङ्कयति। अस्यैव पताकाः केकयेषु मत्स्येषु मगधेषु अङ्गेषु वङ्गेषु कलिङ्गेषु

शोणः। भूमिसात्कृतानि = धूलिसात्कृतानि। भारतसम्राट् = सम्राट्सदृशः लाक्षणिकोऽयं शब्दः।

राक्षसाः = निर्दयाः हिंसाप्रियाश्च। अदीदलन् = अजीघतन्, हिंसितवन्त इत्यर्थः। गूढशत्रुः = गुप्तरिपुः। राजपुत्रवंश्यैः सहोद्वाहादिसम्बन्धं प्राचारयदिति मुद्रान्तरेण सर्वान् म्लेच्छान् विधित्सुरासीदिति तत्त्वम्। अवरङ्गजीवः = "औरङ्गजेब" इतिनामा।

वितस्ताया—(झेलम्) श्चन्द्रभागाया (चनाव) श्चान्तरालवर्त्ती केकय-

---

उसीने प्रधानतः भारतवर्ष में मुसलमानी राज्य के अङ्कुर का आरोपण किया (मुसलमानी राज्य का बीज बोया)। उसी का एक गुलाम, जिसका नाम कुतुबुद्दीन था, भारत का प्रथम सम्राट् हुआ।

उससे लेकर आजतक भारतभूमि में म्लेच्छों ने ही राज्य किया। दैत्यों ने ही दीन-हीन भारतीयों की निर्मम हत्या की। केवल अकबर बादशाह कुछ अच्छा हुआ, यद्यपि वह भी भारतवर्ष का गूढ़ शत्रु था, फिर भी वह शान्तिप्रिय था और विद्वानों का आदर करता था। उसीका परपोता 'आलमगीर उपाधि' वाला औरङ्गजेब इस समय दिल्ली के शासन को कलंकित करता है। यदि उसे मूर्तिमान कलियुग और देहधारी अधर्म कहा जाय, तो कोई अत्युक्ति न होगी। उसीके झण्डे केकय-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः ।

दक्षिणदेशो हि पर्वत-बहुलोऽस्ति अरण्यानी-सङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम् । साम्प्रत-मस्यैवाऽऽत्मीयो दक्षिणदेश-शासकत्वेन "शास्तिखान"-नामा प्रेष्यत

देशः, रामायणसमये "गिरिव्र ज" नाम्ना ख्याता नगर्येतदीयराजधान्यासीत् । भरतजनन्याः केकय्या जन्मभूरियमेवेति रामायणे व्यक्तम् । गिरिव्रजस्य (गिर-झक) जवनसाम्राज्यकाले "जलालपुर" इति नामकरणमभूत् ।

इन्द्रप्रस्थात्पश्चिमस्थो दृषद्वत्याश्च दक्षिणस्थो मरुभूमेः पूर्वस्थो भूखण्डो मत्स्यदेशः । मगधदेशः = कीकटापरनामा वर्त्तमान-दक्षिणविहारो गयाराजगृ-हादिसमवेतः । अङ्गदेशः = वर्त्तमान-भागलपुरसंवलितो भूखण्डविशेषः । अङ्गदेशात्पूर्वस्थितोऽधुना बङ्गालनाम्ना ख्यातो वङ्गदेशः । कलिङ्गदेशः = 'उड़ीसा' इति साम्प्रतं ख्यातः ।

अरण्यानी = महदरण्यम् , तया सङ्कुलः = व्याप्तः । महाराष्ट्रकेसरिणः, अत्र केसरिपदं श्रेष्ठवाचकम् ,

"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥" इत्यमरः ।

हस्तयितुम् = हस्ते कर्तुम् । वशीकर्तुम् यावत् । शास्तिखानः =

(पंजाब), मत्स्य (राजपूताना), मगध (बीहार), अङ्ग (पूर्वी विहार), वङ्ग (बंगाल), कलिङ्ग (उड़ीसा), में फहराते हैं, केवल दक्षिण देश में अभी तक उसका पूरा अधिकार नहीं हो पाया है ।

दक्षिण देश में पर्वतों की अधिकता है और गहन जंगल भी प्रचुर मात्रा में हैं, इसलिए चिर काल के उद्योग से भी वह सिंह सदृश मराठों को अपने अधीन करने में समर्थ नहीं हुआ। सुनने में आया है कि इस समय उसी का सगा सम्बन्धी शाइस्ता खाँ दक्षिण देश का शासक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति श्रूयते । महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुल-कृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातः स्मरणीयः, स्वधर्माऽग्रह-ग्रह-ग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति । विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धं वैरम् । "कार्यं वा साधयेयं देहं वा पातयेयम्" इत्यस्य सारगर्भा महती

"शाइस्ता खां" इति प्रसिद्धं नाम । रत्नशब्दस्य नित्यक्लीबत्वम् । यवनानां = मोहमदानां, शोणितस्य पिपासायामाकुलः कृपाणो यस्य सः । वीरस्य भावो वीरता = शूरता, सैव सीमन्तिनी = ललना, तस्याः सीमन्ते = केशवेशे, सुन्दरं सान्द्रं = घनं, यत्सिन्दूरदानं = नागकेशरचर्चनं, तेन देदीप्यमानो दोर्दण्डः = बाहुदण्डो यस्य सः । श्रुत्यनुप्रासः । स्वधर्मस्य = सनातनधर्मस्य, य आग्रहग्रहः = हठादपि पालनम्, तत्र ग्रहिलः = दृढतरः । शिव इवेत्युत्प्रेक्षा । शिववीरः = "शिवाजी" इति विख्यातः । पुण्यनगरात् = "पूना" इति ख्यातात् । नेदीयसि = अति-

बना कर भेजा जा रहा है । महाराष्ट्र देश के रत्न, मरहट्ठों के मुकुटमणि, योद्धाओं के आभूषण, नीतियों के निधान, निपुणताओं के कुलगृह, परम उत्साहों के सागर, सनातन धर्म के दृढ़तम पक्षपाती, अवतारधारी शिव ऐसे प्रातः स्मरणीय वीर शिवाजी जिनकी तलवार तुर्कों के रुधिर की प्यासी है, जिनके बाहुदण्ड वीरतारूपी नायिका की मांग पर सुन्दर चटकीला सिन्दूर लगाने से देदीप्यमान है, पूना से अतिनिकट 'सिंह' किले में सेना सहित विराजमान हैं ।

बीजापुर के अधिपति के साथ इस समय इनका मनमुटाव बढ़ा हुआ है । "या तो कार्य को ही पूरा करूँगा या देह को ही नष्ट कर डालूँगा" यह इनकी सारगर्भित प्रबल प्रतिज्ञा है । ये ही सतियों, सन्तों,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतिज्ञा। सतीनाम्, सताम्, त्रैवर्णिकस्य आर्यकुलस्य, धर्मस्य, भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवाऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकं विनिवेदयामो योग-बलावगत-सकल-गोप्यतम-वृत्तान्तेषु योगिराजेषु"—इति कथयित्वा विरराम।

तदाकर्ण्य विविध-भाव-भङ्ग-भासुर-वदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गी-कृत्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य "विजयतां शिववीरः, सिद्ध्यन्तु भवतां मनोरथाः" इति मन्दं व्याहार्षीत्।

अथ किमपि पिपृच्छिषामीति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ "अवगतम्; यवनयुद्धे विजय एव, दैवादाप-

शयेनान्तिक इति नेदीयान्, तस्मिन्। आशायाः, सन्तानम् = परम्परा, तस्य, वितानम् = विस्तारः, तस्य। योगबलेन = योगसामर्थ्येन, अवगतः = विज्ञातः, सकलो गोप्यतमः = रहस्यात्मको वृत्तान्तो यैस्तेषु।

आर्यों (ब्राह्मण, क्षत्रिय, वैश्यों), धर्म और भारतवर्ष की विविध आशाओं के आधार हैं। यही भारत की वर्तमान दशा है। आपको तो योगबल से सभी अतिगुप्त वृत्तान्त भी विदित हैं, आप से क्या अधिक निवेदन करें?" यह कह कर मुनिजी चुप हो गये।

यह वृत्तान्त सुन कर योगिराज का मुख विविध भावभङ्गियों से खिल उठा, उन्होंने मुनिवर और उनके साथियों को गौर से देख कर, ये भी महाराज शिवाजी के अन्तरङ्ग हैं यह ताड़ कर, उन्हें मुनि के वेष के बहाने अपने धर्म की रक्षा करने में बद्धपरिकर जान कर धीरे से कहा—"वीर शिवाजी की विजय हो, आप लोगों के मनोरथ पूर्ण हों।"

उसके बाद "मैं कुछ पूछना चाहता हूँ" धीरे-से यह कह कर जटाधारी मुनि के सुनने के लिए उत्सुक और बद्ध करकमल होने पर योगिराज ने कहा—"मैंने समझ लिया, तुर्कों के युद्ध में उन्हीं की जीत

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्रस्तोऽपि च सखिसहाय्येनाऽऽत्मानमुद्धरिष्यति" इति समभाणीत्। मुनिश्च गृहीतमित्युदीर्य, पुनः किञ्चिद्विचार्य्येव, स्मृत्वेव च, दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि किञ्चिदुद्गतैर्बाष्पबिन्दुभिराकुलनयनो "भगवन्! प्रायो दुर्लभो युष्माद्दृशाणां साक्षात्कार इत्यपराऽपि पृच्छाऽऽच्छादयति माम्" इति न्यवेदीत्। स च "आम्! ऊरीकृतम्, जीवति सः, सुखेनैवाऽऽस्ते" इत्युदतीतरत्। अथ "तं कदा द्रक्ष्यामीति" पुनः पृष्टवति "तद्विवाहसमये द्रक्ष्यसि" इत्यभिधाय, बहूनि सान्त्वना-वचनानि च गम्भीरस्वरेणोक्त्वा, सपदि उपत्यकाम्, गण्डशैलान्, अधित्यकाञ्चाऽऽरुह्य पुनस्तस्मिन्नेव

दीर्घमुष्णं निःश्वस्य, गभीरशोकद्योतकमिदम्। रोरुध्यमानैः = भृशं वार्यमाणैः। ऊरीकृतम् = स्वीकृतम्। उदतीतरत् = उत्तरयाञ्चकार। सान्त्वनावचनानि = सामवाक्यानि। उपत्यकाम् = अद्रेरधः सन्निहितां भूमिम्। गण्डशैलान् = पर्वतात् पतितान् स्थूलपाषाणान्। "गण्डशैलास्तु च्युताः स्थूलोपला गिरेरि" त्यमरः। अधित्यकाम् = अद्रेरूर्ध्वां भूमिम्। "उपा-

अवश्यम्भाविनी है, दुर्दैव से उन पर आपत्तियाँ आयेंगी, पर मित्रों की सहायता से वे अपने को उबार लेंगे।" मुनि ने भी "भगवन्, समझ गया" कह कर फिर कुछ विचारने और स्मरण करने का-सा अभिनय कर लम्बी और गरम साँस लेकर, आँसुओं को रोकने की लाख चेष्टा की, तो भी वे कुछ निकल ही आये। अश्रु-बिन्दुओं से व्याप्त नेत्र वाले उन्होंने निवेदन किया—"भगवन्! आप जैसे महात्माओं के दर्शन प्रायः दुर्लभ होते हैं, अतएव दूसरा भी प्रश्न मुझे ललचा रहा है।" योगिराज ने भी उत्तर दिया "हाँ स्वीकार किया, वह जीवित है, और सुखपूर्वक ही है।" इसके अनन्तर मुनि के "उससे कब मेरी मुलाकात होगी?" फिर यह प्रश्न करने पर "उसके विवाह के समय उससे तुम्हारी भेंट होगी।" यह कह कर गंभीर स्वर से अनेक सान्त्वना-वाक्य कह कर योगिराज एक ही क्षण में पर्वत से तलहटी, पर्वत से गिरी हुई बड़ी बड़ी शिलाओं और पर्वत के ऊपर की भूमि पर चढ़ कर पुनः उसी में

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पर्वतकन्दरे तपस्तप्तुं जगाम।

ततः शनैः शनैर्नियतेष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनिर्गौरवटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अपजलखानस्य विषये यावत्किमपि प्रष्टु-मियेष, तावत्पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्यान्य-मनस्के इव मुनौ, गौरवटुरपि तेनैव ध्वनिना कर्णयोः कृष्ट इव समुत्थाय, निपुणं परितो निरीक्ष्य, पर्य्यट्य "कोऽयम्?" इति च साम्रेडं व्याहृत्य, कमप्यनवलोक्य, पुनर्निवृत्य, "मन्ये मार्जारः को-ऽपि" इति मन्दं गुरवे निवेद्य, पुनस्तथैवोपविवेश। मुनिश्च 'मा स्म कश्चिदितरः श्रौषीदि'ति सशङ्कः क्षणं विरम्य पुनरुपन्यस्तुमारेभे—

धिभूर्या त्यकन्नासन्नारूढयोरि" त्युभयत्रापि त्यकन्। "उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यके" त्यमरः। निर्मक्षिके = मक्षिकाणामभावो निर्मक्षिकं तस्मिन्, एकान्ते। मानवसञ्चारदेशे सर्वत्र मक्षिकास्तिष्ठन्तीति तदभावेन जन-सञ्चाराभावो लक्ष्यते। मा श्रौषीत् = मा आकर्णयतु। उपन्यस्तुम् =

तपस्या करने के लिए चले गये।

तदुपरान्त जब अपरिचित लोग धीरे धीरे चले गये और एकदम निर्जन हो गया, गोरे ब्रह्मचारी को बुला कर ज्यों ही मुनि जी ने बीजापुर के अधिपति की आज्ञा से वीर शिवाजी के साथ लड़ने के लिये सेना के साथ कूच कर चुके अफजल खाँ के विषय में कुछ पूछना चाहा, त्योंही उन्हें किसी के पैरों की आहट-सी सुनाई दी। उसको सुन कर मुनि के अन्यमनस्क-से (दुचित्त से) होने पर गोरा ब्रह्मचारी भी उसी ध्वनि से कर्णाकृष्ट-सा उठ कर चारों ओर भली भाँति देख कर टहल कर, बार बार "कौन है" कहकर किसी को न देख फिर लौट आकर "मालूम होता है कोई बिल्ली है" धीरे से गुरु जी से निवेदन कर फिर वैसे ही बैठ गया। मुनिजी ने भी 'कोई दूसरा न सुन ले' इस आशंका से क्षण भर चुप रहकर फिर आरम्भ किया—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"वत्स गौरसिंह ! अहमत्यन्तं तुष्यामि त्वयि, यत्त्वमेकाकी अपजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्च ब्राह्मणतनयांश्च मोचयित्वा आनीतवानसीति । कथं न भवेरीदृशः ? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्" । तावत् पुनरश्रूयत मर्मरः पादक्षेपश्च । ततो विरम्य, मुनिः स्वयमुत्थाय, प्रोच्च शिलापीठमेकमारुह्य, निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य । अथ पुनरेकतानेन निपुणं निरीक्षमाणेन गौर-सिंहेन दृष्टं, यत् कुटीर-निकटस्थ-निष्कुटक-कदलीकूटे द्वित्रास्तर-वोऽतितरां कम्पन्ते इति । तदेव संशयस्थानमित्यङ्गुल्या निर्दिश्य, कुटीर-वलीके गोपयित्वा स्थापितानामसीनामेकमाकृष्य, रिक्त-

कथयितुम् । राजपुत्रदेशः=राजपुत्रशब्दापभ्रंशीभूतो लोके सम्प्रति "राजपूताना" इति प्रसिद्धशब्दव्यपदेश्यो देशः । मर्मरः = शुष्कपर्णध्वनिः । "अथ मर्मरः । स्वनिते वस्त्रपर्णानामि" त्यमरः । एकतानेन = एकचित्तेन । कुटीर-निकटस्थाः = आश्रमसमीपस्थाः, ये निष्कुटा एव निष्कुटकाः = गृहारामाः, "गृहारामास्तु निष्कुटा" इत्यमरः । तेषु, कदलीनाम् = रम्भाणाम् , कूटे= समूहे । वलीके = पटले । "वलीकनीध्रे पटलप्रान्त" इत्यमरः । "छप्पर की ओरी" इति हिन्दी ।

"बेटा गौरसिंह, मैं तुम्हारे ऊपर अत्यन्त प्रसन्न हूँ, तुम अकेले अफजल खाँ के तीन घोड़े और उसके द्वारा दास बनाये गये पाँच ब्राह्मण बालकों को छुड़ा कर ले आये । क्यों न तुम ऐसे होगे ? राजपुताने के क्षत्रियों का कुल ही ऐसा है" फिर मर्मर शब्द और पैरों की आहट सुनाई दी । बोलना बन्द कर स्वयं उठ कर, एक ऊँची शिला पर चढ़कर चारों ओर भली-भाँति देख-भाल कर भी मुनि को पैरों की आहट का कुछ भी कारण नहीं दिखाई दिया । तदनन्तर फिर एकाग्रचित्त से ध्यान-पूर्वक देख रहें गौरसिंह ने देखा कि कुटी के निकट की गृहवाटिका के केले के झुरमुट में दो तीन पेड़ बहुत अधिक हिल रहे थे । वही सन्देह का स्थान है, यों अंगुली से इशारा कर छप्पर की ओरी पर छिपाकर रखी हुई तलवारों में से एक खींच कर गौरसिंह चला, मुनिजी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हस्तेनैव मुनिना पृष्ठतोऽनुगम्यमानः कपोल-तल-विलम्बमानान्, चक्षुश्चुम्बिनः कुटिल-कचान् वामकराङ्गुलिभिरपसारयन्, मुनि-वेषोऽपि किञ्चित्कोप-कषायित-नयनः, कर-कम्पित-कृपा-कृपण-कृपाणो महादेवमारिराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररस-द्वयस्नातः सपदि समागतवान् तन्निकटे, अपश्यच्च लता-प्रतान-वितान वेष्टित-रम्भा-स्तम्भ-त्रितयस्य मध्ये नीलवस्त्र-खण्ड-वेष्टित-मूर्द्धानं, हरित-कञ्चुकं, श्याम वसनानद्ध कटितट-कर्बुरा-

रिक्तहस्तेन = शून्यकरेण। कपोलतलविलम्बमानान्=गण्डसलग्नान्। किञ्चित्कोपेन = ईषत्क्रोधेन, कषायिते = कलुषिते, नयने = नेत्रे, यस्य सः। करे कम्पितः कृपाकृपणः = दयाशून्यः, कृपाणः = असिर्यस्य सः। आरिराधयिषुः = सेवितुमिच्छुः। शङ्करसमाराधनाय करकलितचापो मध्यमपाण्डवस्तपश्चचारेति महाभारतीया कथा किरातार्जुनीयमहाकाव्यमूल-भूता। पूर्णोपमा। लतानाम् = वल्लीनाम्, "वल्ली तु व्रततिर्लता" त्यमरः, प्रतानानि = सूक्ष्मतन्तवस्तेषां, वितानम् = विस्तारः, तेन वेष्टितम् = वल-यितम्, रम्भास्तम्भानां त्रितयम् = कदलीस्तम्भत्रयं, तस्य। यवनयुवकम-पश्यदित्यन्वयः। तमेव विशिनष्टि। नील्या रक्तं नीलं, तच्च वस्त्रखण्डम्, तेन वेष्टितो मूर्धा यस्य तम्। हरितः = हरिद्वर्णः, कञ्चुकः = चोलको यस्य तम्। "अङ्गरखा, चोंगा" इति हिन्दी। श्यामवसनेन = कृष्णवस्त्रेण, "वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमि" त्यमरः। आनद्धम् = आच्छा-दितम्, कटितटे कर्बुरम् = अनेकवर्णम्, "चित्रं किर्मीर-कल्माषशबलै-

भी खाली हाथ उसके पीछे हो लिए, वह गालों पर लटक रहे नेत्रों को छू रहे घुंघराले केशों को बाँये हाथ की अंगुलियों से हटाता जा रहा था। यद्यपि उसकी वेष भूषा तपस्वी की-सी थी तो भी तनिक क्रोध से उसके नेत्र कुछ अरुण हो गये थे, (दाहिने) हाँथ में तलवार लपलपा रही थी, अतएव महादेव जी की आराधना करने की इच्छा वाले तपस्विवेषधारी अर्जुन के समान शान्त और वीर दोनों रसों से सराबोर वह तुरन्त उसके निकट आ पहुँचा और उसने लताओं की बेलों के संघात से वेष्टित तीन केले के पेड़ों के बीच में नीले कपड़े के टुकड़े को सिर पर लपेटे हुए, हरा लबादा पहने, कमर में काला

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धोवसनं, काकासनेनोपविष्टं, रम्भालवाल-लग्नाधोमुख-खड्गत्सरु-न्यस्त-विपर्यस्त-हस्त-युगलम्, लशुनगन्धिभिर्निश्वासैः कदली-किसलयानि मलिनयन्तम्, नवाङ्कुरित-श्मश्रु-श्रेणि-च्छलेन कन्य-कापहरण-पङ्क-कलङ्क-पङ्क-कलङ्किताननम्, विंशतिवर्ष-कल्पं यवन-

ताश्च कर्बुर" इत्यमरः, अधोवसनम् = नाभ्यूरुजघनाच्छादनम्, "तहमत, लुङ्गी" इति हिन्दी, यस्य तम्। काकासनेन = चिबुकार्पितजानुयुगलासनेन। रम्भाया आलवाले = आवापे, "स्यादालवालमावाप" इत्यमरः, वृक्षादिमूले समन्ततोऽम्भसां धारणार्थं वेष्टनमालवालम्, "ओटा" इति हिन्दी, अधोमुखस्य = निम्नाननस्य, खड्गस्य त्सरौ = मुष्टौ, "तलवार की मूठ" इति हिन्दी, "त्सरुः खड्गादिमुष्टौ स्यादि" त्यमरः, विशिष्टवाचकानां शब्दानां सति विशेषणे विशेष्यमात्रपरत्वमित्यभियुक्ताभ्युपगमात्प्रकृतेऽधिकपददोषशङ्कानवकाशः। न्यस्तम् = स्थापितम्, विपर्यस्तम् = न्युब्जीभूतम्, हस्तयुगलम् = करद्वयं यस्य तम्। लशुनस्य गन्ध इव गन्धो येषां तैः, किसलयानि= नवपल्लवानि। नवाङ्कुरितायाः = नवस्फुरितायाः, श्मश्रुश्रेण्याः छलेन = कन्यकाया अपहरणरूपं यत् पङ्कम् = पापम्, "अस्त्री पङ्कं पुमान् पाप्मे" त्यमरः, तस्य यः कलङ्कः = दुर्यशः। स एव पङ्कः=कर्दमः "पङ्कोऽस्त्री शादकर्दमावि" त्यमरः, तेन कलङ्कितम् = भ्रष्टम्, आननं यस्य तम्। मुखसमुद्भूतश्मश्रूणां कलङ्कपङ्कत्वेनोत्प्रेक्षा। विंशतिवर्षकल्पम् = प्रायो विंशतिवर्षव-

कपडा लपेटे, चितकबरे रङ्ग की लुङ्गी पहने, सिकुड़ कर (घुटने के बीच में ठोड़ी डाल कर) बैठे हुए केले के थाले पर अधोमुख लटक रही तलवार की मूठ पर दोनों हाथ उलटे रक्खे हुए, लहसुन की दुर्गन्ध से भरे सांसों से केले के कोमल पत्तों को मलिन (म्लान) कर रहे, जरा जरा उठी हुई मूंछ-दाढ़ी की रेखा के बहाने कन्या के अपहरणरूपी पाप कर्म से उत्पन्न दुष्कीर्ति रूपी कीचड़ से कलङ्कित मुखवाले लगभग २० वर्ष के एक यवन युवक को देखा। तत्पश्चात् परस्पर चार चश्म होने पर 'मैं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

युवकम्। ततः परस्परं चाक्षुषे सम्पन्ने दृष्टोऽहमिति निश्चित्य, उत्प्लुत्य, कोशात् कृपाणमाकृष्य, युयुत्सुः सोऽपि सम्मुखमवतस्थे। ततस्तयोरेवं संजाताः परस्परमालापाः।

गौरसिंहः—कुतो रे यवन-कुल-कलङ्क !

यवनयुवकः—आः ! वयमपि कुत इति प्रष्टव्याः ? भारतीय-कन्दरिकन्दरेष्वपि वयं विचरामः, शृङ्ग-लाङ्गूल-विहीनानां हिन्दु-पद-व्यवहार्याणाञ्च युष्मादृशाणां पशूनामाखेटक्रीडया रमामहे।

गौरसिंहः—[सक्रोधं विहस्य] वयमपि तु स्वाङ्कागतसत्त्व-वृत्तयः शिवस्य गणा अत्रैव निवसामः, तत्सुप्रभातमद्य, स्वयमेव

यस्कम्। चाक्षुषे = चक्षुरिन्द्रियजन्यप्रत्यक्षे। उत्प्लुत्य=उत्पत्य। "कूदकर" इति हिन्दी। युयुत्सुः = योद्धुमिच्छुः। अवतस्थे = स्थितः, "समवप्रविभ्यः स्थ" इत्यात्मनेपदम्। भारतीयाः = भारतभवाः, ये कन्दरिणः=शैलास्तेषां कन्दरेषु। आखेटक्रीडया = मृगयाखेलया।

स्वाङ्के आगताः सत्त्वाः = प्राणिन एव वृत्तयः = जीवन-

देख लिया गया हूँ' यह जानकर झुरमुट से कूद कर म्यान से तलवार खींच कर लड़ने को उतारू होकर वह भी सामने खड़ा हो गया। तदुपरान्त उन दोनों की आपस में यों बातचीत हुई—

गौरसिंह—अरे ! यवन-कुलकलङ्क, यहां कहां से आया ?

यवन-युवक—ओह ! क्या हमसे भी कहां से पूछना उचित है ? भारत-वर्षीय पर्वतों की गुफाओं में भी हम लोग विचरते हैं, बिना सींग और पूछ के हिन्दू नामधारी तुम्हारे ऐसे पशुओं का शिकार कर आनन्द मानते हैं।

गौरसिंह—(क्रोध के साथ हँसकर) समीप में आये हुए प्राणियों से जीवन निर्वाह करनेवाले शिव के गण रूप हम लोग भी तो यहीं निवास करते हैं। आज प्रातःकाल किसी अच्छे का मुँह देखा, (या अंग्रेजोंका Good morning रूप अभिवादन है) इसी से स्वयं ही वनाग्नि की

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वं दीर्घ-दावदहने पतङ्गायितोऽसि।

यवनयुवकः—अरे रे वाचाल ! ह्यो रात्रौ युष्मत्कुटीरे रुदतीं समायातां ब्राह्मण-तनयां सपदि प्रयच्छत, तत्कदाचिद्दयया जीवतोऽपि त्यजेयम्, अन्यथा मदसिभुजङ्गिन्या दष्टाः क्षणात् कथावशेषाः संवत्स्यर्थ।

कलकलमेतमाकर्ण्य श्यामवटुरपि कन्यासमीपादुत्थाय दृष्ट्वा च हन्तुमेतं यवनवराकं पर्य्याप्तोऽयं गौरसिंह इति मा स्म गमदन्योऽपि कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमाकृष्य त्सरौ गृहीत्वा कन्यकां रक्षन्, तदध्युषित-कुटीर-निकट एव तस्थौ।

साधनानि, येषां ते। दीर्घश्चासौ **दावदहनः**=वनाग्निस्तस्मिन्। "दवादावौ वनानल" इत्यमरः। **जीवतः**, शसो रूपमिदम्—युष्मानित्यध्याह्रियमाणविशेष्यस्य विशेषणम्। मदसिरेव **भुजङ्गिनी**=सर्पिणी, तया। रूपकम्। **संवत्स्यर्थ**, "वृद्भ्यः स्यसनोरि"ति परस्मैपदम्, "न वृद्भ्यश्चतुर्भ्यः" इतीण्निषेधः।

कलकलम् = कोलाहलम्। **वलीकात्** = पटलप्रान्तात्, **तया**=कन्यकया, **अध्युषितस्य** = सेवितस्य, **कुटीरस्य निकटे तस्थौ** = स्थितः।

धधकती ज्वालाओं में शलभ बन गये हो।

यवन-युवक—अरे बकवादी, कल रात तुम्हारी कुटी में रोते रोते आई हुई ब्राह्मण बालिका को तुरन्त मेरे हवाले कर दो, तो शायद दयावश जीते ही आप लोगों को छोड़ दूँ, नहीं तो मेरी तलवार रूपी सर्पिणी से डँसे तुम लोगों का केवल वृत्तान्त ही शेष रह जायगा।

इस कोलाहल को सुन कर साँवला ब्रह्मचारी भी कन्या के समीप से उठकर और बेचारे मियाँ का काम तमाम करने के लिये यह गौरसिंह पर्याप्त है यह जान कर 'शायद कन्या को हरने के लिए कोई दूसरा यहाँ न आ जाय' इस आशङ्का से छप्पर के कोने से एक तीखी तलवार खींच कर उसका पुट्ठा पकड़ कर कन्या की रक्षा करता हुआ, जिस कुटी में कन्या बैठी थी, उसके निकट ही खड़ा रहा।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौरसिंहस्तु "कुटीरान्तः कन्यकाऽस्ति, सा च यवन-वध-व्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम् ? तद् यावत्तव कवोष्ण-शोणित-तृषित एष चन्द्रहासो न चलति, तावत् कूर्दनं वा, उत्फालं वा यच्चिकीर्षसि तद्विधेहि" इत्युक्त्वा व्यालीढमर्य्यादया सज्जः समतिष्ठत ।

ततो गौरसिंहो दक्षिणान् वामांश्च परश्शतान् कृपाणमार्गानङ्गीकृतवतः, दिनकर-कर-स्पर्श-चतुर्गुणीकृत-चाकचक्यैश्चञ्चच्चन्द्रहासचमत्कारैश्चक्षूंषि मुष्णतः, यवन-युवक-हतकस्य, केनाप्यनुप-

यवनानां वध एव व्यसनं यस्य तादृशे । कवोष्णस्य = ईषदुष्णस्य, "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वती" त्यमरः, शोणितस्य = लोहितस्य, तृषितः = पिपासितः । चन्द्रहासः=खड्गः, "खड्गेतु निस्त्रिंशचन्द्रहासासिरिष्टय" इत्यमरः । कूर्दनं वा उत्फालं वा="कूदना, उछलना" इति हिन्दी । व्यालीढम् = युद्धावस्थानविशेषः, तन्मर्यादया । कोदण्डमण्डनादिषु प्रसिद्धमिदम् । "पैंतरा" इति हिन्दी ।

दिनकरकराणाम् = सूर्यकिरणानाम् , स्पर्शेन, चतुर्गुणीकृतम् = वर्धितम् , चाकचक्यम् = प्रतिभासविशेषो यैस्तैः । चञ्चच्चन्द्रहासचमत्कारैः = सञ्चरत्खड्गचमत्कारैः । मुष्णतः = चोरयतः । हतकस्य = दुष्टस्य । केनापीत्यनुपलक्षितविशेषणम् । "सविशेषणानां वृत्तिर्न"ति तु न

गौरसिंह तो "कुटीर के अन्दर कन्या है, तुर्कों के हत्या का व्यसनी (शौकीन) मैं जब तक जीवित हूँ उसे कोई देख भी नहीं सकता, छूना तो दूर रहा ? जब तक तुम्हारे गरम खून का प्यासा यह खड्ग नहीं चलता तब तक जो चाहो उछल-कूद मचा लो ।" यह कह कर पैंतरा जमा कर वार करने के लिए तैयार हो गया ।

मियाँ ने तलवार के दाँये-बाँये हजारों पैंतरे दिखाये, सूर्य किरणों के सम्पर्क से चौगुनी चमकवाली चल रही तलवार की चमचमाहट से आँखों को चौंधिया रहे दुष्ट यवन का श्रमवश निकले हुए पसीने से तर, अस्त-व्यस्त

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लङ्घितोद्योगः, अकस्मादेव स्वासिना कलित-क्लेद-संजात-स्वेद-जल-जालं विशिथिल-कच-कुल-मालं भग्न-भ्रू-भयानक-भालं शिरश्चिच्छेद ।

अथ मुनिरपि दाडिम-कुसुमास्तरणाच्छन्नायामिव गाढ-रुधिर-दिग्धायां ज्वलदङ्गारचितायां चितायामिव वसुधायां शयानं वियु-

---

नित्यसापेक्षस्थल इति सुव्यक्तमेव । स्वासिना शिरश्चिच्छेदेत्यन्वयः । शिरो विशिनष्टि—**कलितेन** = व्याप्तेन, **क्लेदेन** = श्रमेण, **सञ्जातस्य**=उत्पन्नस्य, **स्वेदजलस्य** = घर्मजलस्य, "घर्मो निदाघः स्वेद" इत्यमरः, **जालम्** = समूहो यस्मिंस्तत् । **विशिथिला** = इतस्ततः परिभ्रष्टा, **कचानाम्** = केशानाम्, **कुलस्य** = समूहस्य, **माला** = पङ्क्तिः, यस्मिंस्तत् । **भग्नया** = छिन्नया, **भ्रुवा** = दृगूर्ध्वभागेन, "ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियावि" त्यमरः, **भयानकम्** = भीषणम्, **भालम्** = ललाटम्, यस्मिंस्तत् । जालम् भालमित्यत्र यमकम् ।

वसुधायाम् = पृथिव्याम् । **शयानम्** = पतितम् । वसुधां विशिनष्टि—**गाढेन** = घनीभूतेन, **रुधिरेण** = लोहितेन, **दिग्धायाम्** = लिप्तायाम् । "दिग्धो विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गक" इति मेदिनी । उत्प्रेक्षते—**दाडिमस्य** = करकस्य, "दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिष्वि"ति मेदिनी, **कुसुमानाम्**, **आस्तरणेन** = विष्टरेण, **आच्छान्नायामिव** । पुनरप्युत्प्रेक्षते—**ज्वलदङ्गारैः**, **चितायाम्** = व्याप्तायाम् । **चितायाम्** = चितौ, "चिता चित्या चितिः स्त्रियामि"त्यमरः । भस्मीभवनाय न यवनैश्चिता प्राप्यते । हिन्दुकरेण मृत्युमवाप्य कियतः कालस्य कृते सा

केशराशि वाला, टेढ़ी भौंहों से भयानक कपाल वाला सिर गौरसिंह ने एक बारगी ऐसी सफाई से काट डाला कि कोई भी उसका हस्तलाघव देख न पाया । तत्पश्चात् मुनि जो दाड़िम के फूलों की सेज से आच्छन्न-सी, मानों जल रहे अँगारों से रची हुई चिता-सी, गाढ़े खून से लथ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्यमान-भारतभुवमालिङ्गन्तमिव निर्जीवीभवदङ्ग-बन्ध-चालन-परं शोणित-सङ्घात-व्याजेनान्तः-स्थित-रजोराशिमिवोद्गिरन्तं कलित-सायन्तन-घनाऽऽडम्बर-विभ्रमं सतत-ताम्रचूड-भक्षण-पातकेनेव ताम्रीकृतं छिन्न-कन्धरं यवनहतकमवलोक्य सहर्षं ससाधुवादं सरोमोद्गमश्च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन भृत्येन मृतक-

---

लब्धाऽनेनेति ध्वनिः। चिन्ताचितयोर्दाहकत्वपर्यालोचनापरमिदं पद्यमनुभवपथपथिकम्—"चिन्ताचिताद्वयोर्मध्ये बिन्दुमात्रं विशेषकम्। सजीवं दहते चिन्ता निर्जीवं दहते चिता॥" यवनहतकं विशिनष्टि—**निर्जीवीभवताम्** = निष्प्राणतां गच्छताम्, **अङ्गबन्धानाम्**=शरीरसन्धीनाम्, **चालने, परम्** = निरतम्। **शोणितसङ्घातव्याजेन** = रुधिरप्रवाहच्छलेन। **अन्तः स्थितो यो रजोराशिः** = रजोगुणसमूहः, तमिवेत्युत्प्रेक्षा। **उद्गिरन्तम्** = वमन्तम्। **कलितः** = धारितः, **सायन्तनस्य** = सायंभवस्य, **घनाऽऽडम्बरस्य** = मेघविडम्बनायाः, **विभ्रमः**=विलासो येन तम्। **सततम्**=सर्वदा, यत् **ताम्रचूडस्य**=कुक्कुटस्य, "कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः" इत्यमरः, **भक्षणम्**=अशनम्, तदेव **पातकम्**=पापं तेनेव। **ताम्रीकृतम्** = रक्तीकृतम्। **छिन्नकन्धरम्**=कृत्तग्रीवम्। सायङ्कालिकसूर्य-

---

पथ पृथिवी पर सो रहे, मानों बिछुड़ रही भारत भूमि का आलिङ्गन कर रहे, निर्जीव हो रही अङ्ग-सन्धियों को छटपटा रहे, रुधिर-राशि के बहाने मानों अन्दर जमे हुए रजोगुण को उगल रहे, सायंकाल के मेघ के शोभातिशय को धारण कर रहे, निरन्तर मुर्गों के भक्षण के पाप से मानों लाल किये गये, दुष्ट मिया की गरदन कटी देख कर बड़े हर्ष, शाबाशी (वाहवाही) और पुलकावलियों के साथ गौरसिंह का आलिंगन कर, नेत्रों के इशारे से आज्ञप्त भृत्य द्वारा मृतक के चोंगे, कमरबन्द और

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कञ्चुक-कटिबन्धोष्णीषादिकमन्विष्याऽऽनीतं पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश ।

इति प्रथमो निश्वासः ।

इव सञ्जातमिति यावत् । **कटिबन्धः** = जघनपट्टिका "पेटी" इति हिन्दी । **उष्णीषम्** = शिरोवष्टनम्, 'पगडी' इति हिन्दी ।

निश्वास इति, वाक्यविन्यासरूपे गद्यकाव्ये निश्वासप्रश्वासा एव परिच्छेदका भवन्तीति परिच्छेदकानामङ्कसर्गाध्यायादिसंज्ञाः समुपेक्ष्य निश्वाससंज्ञामेवादरयाञ्चकार ग्रन्थकारः । यद्यपि बाणादिभिरुच्छ्वाससंज्ञा गृहीता, किन्तु सा शोकक्रोधादावेवापेक्षितेति तामपि तत्याज । भवति चात्र प्राचीनं पद्यम्— "प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः कवीनाम" इति ग्रन्थकृच्छिष्यकृता टिप्पणी ।

इति शिवराजविजयवैजयन्त्यां प्रथमनिश्वासविवरणम् ।

पगड़ी की तलाशी लेकर लाये गये एक पत्र को लेकर दलबल के साथ अपनी कुटी में प्रविष्ट हुए ।

॥ इति ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त ! हन्त !! नलिनीं गज उज्जहार ॥"

स्फुटम् ।

कपटपटुरपजलखानः शिवं निग्रहीतुं कीर्त्तिमर्जयितुञ्च विहितविविधमनोरथः श्रीमता शिवेनैव निगृहीतो मृत्युवशगः कृतश्चेति द्वितीयनिश्वासकथाभागोपच्छेपायाऽऽदौ "रात्रिर्गमिष्यती" ति पद्यं समुल्लिखति । व्याख्या चास्य नितान्तसरला । द्विरेफपदञ्च द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या रेफद्वयवत्त्वेन भ्रमरपदोपस्थापनद्वारा मधुकरवाचकम् , योगरूढञ्चेति नेतरतादृशशब्दसङ्ग्रहानुचिन्ता । भवति चात्र कोशः—"द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालय" इति । परे तु तेनैव धर्मेण लाक्षणिकं मन्यन्ते, तेषां निरूढिरेव कारणत्वेनाभिप्रेता । अद्यतनानद्यतनोभयविधभविष्यत्स्थले लुट्प्रयोगस्यैवेष्टव्यत्वेऽपि पूर्वं विशेषाविवक्षायां लृटि ततो विशेषान्वेषणमिति स्थलेष्वीदृशेषु नासाधुत्वविषयकभ्रान्तिरवलम्बनीयेति शम् , अपजलखानः प्रतापदुर्गादविदूर एव

॥ श्रीः ॥

द्वितीय निश्वास

कमल-कली के अन्दर बैठा, हुआ भौंरा, 'रात बीतेगी, सुहावना प्रभात होगा, कमल की शोभा खिलेगी'—यों मनसूबे बाँध रहा था, परन्तु खेद ! महाखेद !! कमल को हाथी तोड़ ले गया । (बेचारे भौंरे की सब आशाओं पर पानी फिर गया) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इतस्तु स्वतन्त्र-यवनकुल-भुज्यमान-विजयपुराधीश प्रेषितः पुण्यनगरस्य समीपे एव प्रक्षालित-गण्डशैल-मण्डलायाः, निर्झर-वारिधारा-पूर-पूरित-प्रवल-प्रवाहायाः, पश्चिम-पारावार-प्रान्त-प्रसूत-गिरि-ग्राम-गुहा-गर्भ-निर्गताया अपि प्राच्य-पयोनिधि-

---

तिष्ठति स्मेति सम्बन्धः । अपजलखानं विशिनष्टि—**स्वतन्त्रम्** = स्वच्छन्दम्, यद् यवनकुलं तेन **भुज्यमानस्य** = शास्यमानस्य, **विजयपुरस्य** = तन्नामकनगरस्य, **अधीश्वरेण, प्रेषितः** = प्रहितः । इदं तात्कालिकस्थितिप्रदर्शनमात्रफलकन्न तु साहित्यिकविवेचनया समुपयोगि विशेषणमिति वेदितव्यम् ।

भीमाया नीरं कट्टकुर्वन्निति सम्बन्धः । नदीं विशिनष्टि—**प्रक्षालितानि** = धौतानि, **गण्डशैलानाम्** = गिरिच्युतस्थूलशिलानाम्, मण्डलानि यया तस्याः । **निर्झराणाम्** = जलनिर्गमस्रोतसाम्, **वारिधारापूरैः** = जलधारासमूहैः, **पूरितः** = भरितः, **प्रबलः** = वेगवान्, **प्रवाहो** यस्यास्तस्याः । **पश्चिमश्चासौ पारावारः** = समुद्रः, "समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिरि" त्यमरः, तस्य, **प्रान्ते** = निकटप्रदेशे, यो **गिरीणां ग्रामः** = समूहः, तस्य **गुहाः** = गह्वराणि, तासां **गर्भतः** = मध्यात्, **निर्गतायाः**=समुत्पन्नायाः । **प्राच्यः**=प्राचीभवः, यः **पयोनिधिः**, तच्चुम्बने

इधर बीजापुर के अधिपति का अन्यतम सेनापति अफजल खाँ प्रताप दुर्ग के निकट ही वीर शिवाजी के साथ युद्धरूपी जुआ खेलने की इच्छा से सेना के साथ पड़ाव डाले बैठा था। अफजल खाँ को बीजापुर के नरेश ने जो स्वतन्त्र यवन-साम्राज्य के अधीन थे, भेजा था। वह पूना के समीप में ही पर्वतों से गिरे हुए बड़े-बड़े पत्थरों की राशि को धोनेवाली, झरनों की जलधाराओं से पूर्ण प्रवल प्रवाहवाली, पश्चिम सागर के तटवर्ती पर्वत श्रेणियों की गुफाओं से निकली हुई और पूर्व

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चुम्बन-चञ्चुरायाः रिङ्गत्-तरङ्ग-भङ्गोद्भूतावर्त्त-शत-भीमायाः, भीमाया नद्याः, अनवरत-निपतद्बकुल-कुल-कुसुम-कदम्ब-सुरभीकृतमपि नीरं वगाहमान-मत्त-मतङ्गज-मद-धाराभिः कटू-कुर्वन्; हय-हेषा-ध्वनि-प्रतिध्वनि-वधिरीकृत-गव्यूति-मध्यगाध्वनीन-

चञ्चुरायाः = चपलायाः। पश्चिमसमुद्रान्निःसृत्य पूर्वसमुद्रं प्रविष्टाया इति वाच्योऽर्थः। एवमुक्तिः पाश्चात्त्यरमणीनां प्राच्यसम्पर्करूपसाम्प्रतिकव्यवहारोपहासाय। **रिङ्गताम्** = सञ्चलताम्, **तरङ्गाणाम्** = ऊर्मीणाम्, **भङ्गैः**= छेदैः **उद्भूताः**=उत्पन्नाः, ये **आवर्ताः**=अम्भसां भ्रमाः, तैः **भीमायाः** = भयदायिन्याः। "घोरं भीमं भयानकमि"त्यमरः। **भीमायाः** = "भीमा" नामवत्याः। **अनवरतम्**=सततम्, **निपतताम्**=प्रच्यवताम्, **बकुलकुलकुसुमानाम्**=वञ्जुल-समूह-सुमानाम्, **कदम्बेन**=समूहेन, **सुरभीकृतम्** = सुगन्धितामापदितम्। **वगाहमानानाम्**=प्रविशताम्, जलक्रीडां कुर्वतामिति भावः, "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरि" त्यल्लोपः, **मत्तानाम्** = दानभरितानाम्, **मतङ्गजानाम्**=करिणाम्, **मदधाराभिः**=दानजलैः। कटूकरणे हेतुः। **हयानाम्** = अश्वानाम्, **हेषा**=ध्वनिः, यद्यपि हेषाशब्दोऽश्वशब्दे, "अश्वानां हेषा ह्रेषा च निःस्वनः" इत्यमरात्तथा चाश्वशब्दोच्चारणमनपेक्षितम्, तथापि विशिष्टवाचकपदानां सति विशेषणवाचकपदान्तरप्रयोगे विशेष्यमात्रपरत्वस्य "स कीचकैर्मारुतपूर्णरन्ध्रैरि"त्यादिषु दृष्टत्वेन केवलनिःस्वनवाचकत्वेन नाश्वशब्दवैयर्थ्यमिति वेदितव्यम्।

तद्ध्वनिप्रतिध्वनिभिः,- वधिरीकृतः = श्रुतिसामर्थ्यविकलीकृतः, **गव्यूतिमध्यगः** = क्रोशद्वयान्तरालवर्त्ती, "गव्यूतिः स्त्री क्रोशयुगमि" त्यमरः,

सागर को चूमने के लिए उतावली वाली (पूर्व सागर में गिरने वाली) एवं फैल रही, अनन्त लहरियों के टूटने से पैदा हुए सैकड़ों भँवरों से भीषण भीमा नदी के जल को, जो निरन्तर गिर रही मौलसिरी की पुष्पराशि से पहले से सुगन्धित था, जलक्रीड़ा कर रहे मदोन्मत्त मातङ्गों की मदधाराओं से और भी तीक्ष्ण गन्धवाला कर रहा था, घोड़ों के हिनहिनाने की ध्वनि की प्रतिध्वनि से दो कोस के अन्दर चलनेवाले

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
LIBRARY
Jangamwadi Math, Varanasi
ACC No.

वर्गः, पट-कुटीर-कूट-विहित शारदाम्भोधर-विडम्बनः, निरपराध-भारताभिजन-जन-पीडन पातक पटलैरिव समुद्धूयमान नीलध्वजै-रुपलक्षितः, विजयपुरेश्वरस्यान्यतमः सेनानीः अपजलखानः प्रताप-दुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेन-स्तिष्ठति स्म ।

अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्रय, कोकान् सशोकीकृत्य, सकल-चराचर-चक्षुःसञ्चार-शक्ति शिथिलीकृत्य,

---

अध्वनीनवर्गः = पथिकसमूहो येन सः । **पटकुटीराणाम्** = उपकारिका-णाम्, "उपकार्योपकारिके" त्यमरः, **कूटैः**=समूहैः, विहिता, **शारदाम्भो-धराणाम्** = शरन्मेघानाम्, निर्जलत्वेन श्वेतवर्णानामिति तात्पर्यम्, **विड-म्बना** = अनुकृतिर्येन सः । **समुद्धूयमानैः** = कम्पमानैः, **नीलध्वजैः** = नीलपताकाभिः, **उपलक्षितः** = युक्तः । उत्प्रेक्षते—**निरपराधानाम्** = निर्दोषाणाम्, **भारताभिजानानाम्** = भारतीयानाम् । यत्र पूर्वैरुषितं तद-भिजनात्मनाऽऽख्यायते । **तिष्ठति स्म** = अतिष्ठत् । 'लट् स्म' इति स्मयोगे लट् । **अन्यतमः** = अनेकेष्वेकः । **आहवद्यूतेन** = युद्धक्रीडया ।

अथ भगवान् भास्वान् चक्षुर्ग्रामगोचर एव यात इति सम्बन्धः । **जगतः** = संसारस्य । **प्रभाजालम्** = दीप्तिसमूहम् । **आकृष्य**=आकुञ्च्य । **सम्मुद्र्य**=सङ्कोच्य । **कोकान्**=चक्रवाकान् । "कोकश्चक्रश्चक्रवाक" इत्यमरः । **सशोकीकृत्य** = दुःखिनो विधाय । दम्पत्योः परस्परं वियोगेन शोकः । **सकलस्य, चराचरस्य** = स्थावरजङ्गमात्मकस्य । **चक्षुषाम्** = नेत्राणाम् । **सञ्चारस्य** = कार्यकरणस्य, दर्शनस्येति यावत्, **शक्तिम्** = सामर्थ्यम् ।

पथिकों को बहरा बना रहा था, खेमों के समूह से शरद् ऋतु के बादलों का उपहास कर रहा था और लहरा रही नीली पताकाओं से जो निरपराध भारतीय जनता के उत्पीड़न से उत्पन्न मानो पापराशियाँ ही थीं, युक्त था ।

जगत् की प्रकाश-राशि को खींच कर, कमलों को सिकोड़ कर, चक्रवाकों (चकवा-चकवी) को शोकमग्न कर, सम्पूर्ण चराचर जगत् की दर्शन-शक्ति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुण्डलेनेव निज-मण्डलेन पश्चिमामाशां भूषयन्, वारुणी-सेवनेनेव माञ्जिष्ठ-मञ्जिम-रञ्जितः, अनवरत-भ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, म्लेच्छ-गण-दुराचार-दुःखाऽऽक्रान्त-वसुमती-वेदनामिव समुद्रशायिनि निविवेदयिषुः, वैदिक-धर्म-ध्वंस-दर्शन-संजात-

कुण्डलेन = कर्णभूषणेन । 'कुण्डलं कर्णभूषणमि' त्यमरः । पश्चिमा चासौ, आशा = काष्ठा, ताम् । "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता" इत्यमरः, वरुणस्येयं वारुणी=पश्चिमा दिग् मद्यञ्च, "सुरा प्रत्यक् च वारुणी" इत्यमरः । मञ्जिष्ठायाः = मण्डूकपर्ण्याः, "मजीठ" इति हिन्दी, अयं माञ्जिष्ठः, स चासौ मञ्जिमा = रक्तिमा, तेन रञ्जितः = रक्तः । यथा जनो वारुणी-(सुरा) पानानन्तरं शोणवर्णो भवति तथा भास्करोऽपि वारुणी-(पश्चिमा) संसर्गोत्तरं शोणः सञ्जात इत्युत्प्रेक्षा । अनवरत-भ्रमण-परिश्रम-श्रान्तः = सततचलनखेदखिन्नः । सुषुप्सुः= स्वप्तुमिच्छुः । स्वाभाविकी चरमाचलप्राप्तिः खेदकारणकशयनेच्छावत्त्वेनोत्प्रेक्षिता । म्लेच्छगणस्य = यवनसमूहस्य, दुराचारैः = असदाचरणैः– गोहननमन्दिरध्वंसनादिभिः, दुःखाक्रान्तायाः = कष्टपीडितायाः, वसुमत्याः = पृथिव्याः, वेदनाम् = पीडाम् । समुद्रशायिनि = विष्णौ । निविवेदयिषुः = निवेदयितुमिच्छुः । स इवेत्युत्प्रेक्षा पत्नीक्लेशस्य पत्यावेव निवेदनीयत्वादिति भावः । वैदिकधर्मस्य = सनातनधर्मस्य, ध्वंसदर्शनेन = विनाशावलोकनेन, सञ्जातः =

को ढीली कर, कुण्डल-सदृश अपने मण्डल से पश्चिम दिशा को अलङ्कृत कर रहे भगवान् भास्कर—जो वारुणी† (पश्चिम दिशा और मदिरा) के सेवन से मजीठ की-सी लालिमा से रक्त थे, निरन्तर भ्रमण के श्रम से मानों थक गये थे, अतः सोना चाहते थे, म्लेच्छों के दुराचारों से दुःखी धरा की पीड़ा को मानों भगवान् विष्णु से निवेदन करना चाहते थे, वैदिक धर्म का ह्रास देखने से मानों विरक्त हो गये थे, अतः दुर्गम

† वारुणी शब्द के दो अर्थ हैं—वरुण की दिशा (पश्चिम दिशा) और मदिरा के सेवन से लोग रक्ताभ होते हैं । सूर्य की स्वाभाविक सान्ध्य रक्ताभा की वारुणीसेवनजन्यत्वेन उत्प्रेक्षा की गई है ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्वेद इव गिरिगह्वनेषु प्रविश्य तपश्चिकीर्षुः, घर्म-ताप-तप्त इव समुद्रजले सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, "नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारत-गर्भान्निस्सारयेदिति" चिन्ताऽऽक्रान्त इव कन्दरि कन्दरेषु प्रविविक्षुर्भगवान् भास्वान्, क्रमशः क्रूरकरानपहाय, दृश्य-परिपूर्ण-मण्डलः संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगनधरातलाभ्यामुभयत आक्रम्यमाण इवाण्डाकृतिमङ्गीकृत्य, कलि-कौतुक-कवलीकृत-सदाचार-प्रचारस्य पातक-

समुत्पन्नः, निर्वेदः = वैराग्यं, यस्य स इव। गिरिगहनेषु = पर्वतदुर्गमेषु। चिकीर्षुः = कर्त्तुमिच्छुः। सिस्नासुः = स्नातुमिच्छुः। सर्वो हि तप्तः स्नातुमिच्छति। अवगत्य = ज्ञात्वा। विधित्सुः = चिकीर्षुः। सकण्ठग्रहम्=कण्ठं गृहीत्वा। अर्धचन्द्रं दत्वेत्यर्थः। णमुलन्तम्। यज्ञियात् = यज्ञकरणयोग्यात्। "यज्ञर्त्विग्भ्यां घखञावि" ति घः। प्रविविक्षुः = प्रवेष्टुमिच्छुः। क्रूरकरान् = तीव्रकिरणान्। दृश्यम् = अवलोकयितुमर्हम्, सम्पूर्णम् = समस्तम्, मण्डलम् = विम्बं, यस्य सः। श्वेतीभूयेत्यादिषु स्वभावोक्तिः। अण्डाकृतिम् = सूर्योऽण्डाकृतिरेवोदेत्यस्तमेति चेति तत्कालच्छटावलोकनेन प्रतीयते। अत्र सर्वत्रोत्प्रेक्षा। कलिकौतुकेन=कलियुगकौतूहलेन, कवलीकृतस्य = विनष्टस्य। पातकपुञ्जेन = अघौघेन, पिञ्जरि-

पर्वतों में प्रवेश कर तपस्या करना चाहते थे, घाम की गरमी से मानों सन्तप्त हो गये थे, अतः समुद्र में स्नान करना चाहते थे, सायंकाल का समय जान कर मानो सन्ध्यावदन करना चाहते थे, 'मेरे कुल में ऐसा कोई नहीं है, जो धर्मध्वंसी दुष्ट यवनों को गर्दनियाँ देकर इस यज्ञार्ह भारतभूमि से निकाल बाहर करे'—यों मानों चिन्तित हो पर्वत की खोहों में प्रवेश करना चाहते थे—क्रमशः तीव्र किरणों का त्याग कर अपने सारे बिम्ब को दर्शन योग्य बना कर, पहले सफेद, फिर पीले और फिर लाल होकर, अन्तरिक्ष और पृथ्वीतल दोनों ओर से दबाये जा रहे-से, अण्डाकार बन कर, कलियुग के प्रताप से छिन्न-भिन्न सदाचार

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुञ्ज-पिञ्जरित-धर्मस्य च यवन-गण-ग्रस्तस्य भारतवर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव संजातः।

ततः संवृत्ते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरित्सु, भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतञ्च विदधानः, प्रताप-दुर्ग-दौवारिकः, कस्यापि पादक्षेप-ध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीप-प्रकाशेऽवतमसवशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैवमवादीत्—"कः कोऽत्र भोः ? कः कोऽत्र भोः ?" इति।

तस्य = पीतवर्णस्य। जर्जरीकृतस्येति भावः। **धर्मस्य** = सनातनधर्मस्य। **भारतवर्षस्य**—च स्मारयन्नित्यत्र "अधीगर्थदयेशामि" ति कर्मणि षष्ठी। **अन्धतमसे** = गाढध्वान्ते। "ध्वान्ते गाढेऽन्धतमसमि" त्यमरः। **चक्षुषामगोचरः** = अदृश्यः। सूर्यास्तमनवेलाऽभूदित्यर्थः।

हरित्सु=दिक्षु। **भुशुण्डीम्**=आयुधविशेषम्। "बन्दूक" इति हिन्दी। **आगतप्रत्यागतम्**=यातायातम्। **विदधानः**=कुर्वाणः। **प्रतापदुर्गस्य**=तन्नाम्ना ख्यातदुर्गस्य, "किला" इति हिन्दी, **दौवारिकः**=द्वारपालः। **पादक्षेप-ध्वनिम्**=चरणचङ्क्रमणशब्दम्। **अवतमसम्**=क्षीणध्वान्तम्, "अवसमन्धेभ्यस्तमस" इति सूत्रेण समासान्तोऽच्, तस्य, **वशात्** = सामर्थ्यात्।

के प्रचार की तथा पाप राशि से पीले पड़े धर्म की यवनगणों से आक्रान्त भारत वर्ष को याद दिलाते, जगत् को गाढ़ अन्धकार में ढकेलते हुए नेत्रों से ओझल हो ही गये।

तदुपरान्त जब कुछ कुछ अँधेरा छा गया था, धूप के धुँये से मानो दसों दिशाएँ आच्छन्न हो गई थीं, बन्दूक कन्धे पर रख कर गौर से इधर-उधर देख रहे, गश्त लगा रहे, प्रताप दुर्ग के प्रहरी (पहरेदार) को किसी के पैरों की आहट सी सुनाई पड़ी। सुनते ही खड़ा होकर सामने देख रहे पहरी को, दीपक के रहते भी, अन्धकार के कारण आता हुआ कोई दिखाई न पड़ा। तब तो गरज कर उसने कहा—"अरे यहाँ यह कौन है अरे यह कौन है ?"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्—"क एष मामनुत्तरयन् मुमूर्षुः समायाति वधिरः ?"

ततो "दौवारिक! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति वधिर इति च वदसि ?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत्किं नाज्ञायि अद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति" इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि आगत्य च निखिलं निवेदयामि" इति कथयन्, द्वादशवर्षेण केनापि भिक्षुवटुनाऽनुगम्यमानः, कोऽपि काषायवासाः, धृत-तुम्बी-पात्रः, भस्म-

मुमूर्षुः=मर्तुमिच्छुः। मन्द्रस्वरेण = गम्भीरस्वरेण, मेदुरा = सान्द्र-स्निग्धा। "सान्द्रस्निग्धस्तु मेदुर" इत्यमरः। अपश्यता = अनवलोकमानेन, दौवारिकेणेति शेषः। आकर्णि = श्रुतः। अज्ञायि = ज्ञातः श्रुत इति यावत्। द्वारि तिष्ठतीति द्वाःस्थः=द्वारपालः, तेन। प्रहरिणा = यामिकेन। नगरादिषु सशब्दं जनताजागरकेण चोरनिवारयित्रेति यावत्। कषायेण रक्तं काषायम्, वासो यस्य सः। त्रिः = वारत्रयम्। "द्वित्रिश्चतुरिति कृत्वोऽर्थे"

एक क्षण के बाद ही उसे फिर वही पैरों की आहट सुनाई दी, अतः फिर तो वह बिगड़ कर बोला—"मुझे उत्तर दिये बिना यह कौन मरणासन्न बहरा आ रहा है ?" उसके बाद "पहरी, बिगड़ो मत, क्यों व्यर्थ मरणासन्न और बहरा कहते हो ?" गम्भीर भाव से मधुर वाणी उसे सुनाई दी, किन्तु बोलने वाला उसके दृष्टिगोचर नहीं हुआ। तदुपरान्त "क्या आपको अभी तक महाराज का यह आदेश विदित नहीं है कि द्वारपाल या पहरेदार को चाहिये कि तीन बार टोकने पर यदि कोई उत्तर न दे तो उसे मार गिरादे" कह रहे द्वारपाल से "क्षमा कीजिये, मैं यह आ रहा हूँ, आकर सारा हाल कहता हूँ" कहता हुआ गेरुवा वस्त्र पहने, हाथ में तुम्बी लिये, ललाट पर भस्म रमाये, गले में

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च्छुरित-ललाटः, रुद्राक्ष-मालिका-सनाथित-कण्ठः, भव्यमूर्त्तिः सन्न्यासी दृष्टः। ततस्तयोरेवमभूदालापः।

सन्न्यासी—कथमस्मान् सन्न्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

दौवारिकः—भगवन्! भवान् सन्न्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददद्देवाऽऽयातीत्याक्रुश्यते।

सन्न्यासी-सत्यं क्षान्तोऽयमपराधः, परमद्यावधि सन्न्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः,

---

रुद्राक्षमालिकया, सनाथितः = भूषितः, कण्ठा यस्य सः। आलापः = अन्योन्यसम्बोधनपूर्वकभाषणम्।

तुरीयाश्रमसेवी = चतुर्थाश्रमवासी। "स सन्न्यासी च योगी च न निरग्निर्न चाक्रिय" इत भगवद्वचनेन सन्न्यासिपदस्य न चतुर्थाश्रमि-गैरिकधारिमात्ररूढतेति ध्वनयता पदद्वयं विशेषणभावेनोपात्तमिति विज्ञाः।

अददत् = अयच्छन्, "नाभ्यस्तादि"ति नुम्निषेधः। अपरिचाययन्तः = परिचयमददतः। सन्न्यासिनामित्यादित्रिकस्य सन्न्यासस्येत्यादित्रिकेण यथासङ्ख्यमन्वयः। अत एव यथासङ्ख्यनामाऽलङ्कारः। शिरसा

रुद्राक्ष की माला धारण किये भव्यमूर्ति कोई संन्यासी दिखाई दिया। उसके पीछे बारह वर्ष का एक भिक्षु बालक आ रहा था। उसके आने के अनन्तर उन दोनों में यों वार्तालाप हुआ।

संन्यासी—तुम हम संन्यासियों को भी कठोर-वचनों द्वारा क्यों अपमानित करते हो ?

द्वारपाल—भगवन्, आप संन्यासी चतुर्थाश्रमवासी हैं, इसलिए मैं आपको प्रणाम करता हूँ, किन्तु महाराज की आज्ञा का उल्लंघन कर परिचय दिये बिना ही आते हैं, अतः आप पर बिगड़ रहा हूँ।

संन्यासी—सचमुच, तुम्हारा यह अपराध हमने क्षमा किया, किन्तु अब तक संन्यासियों, ब्रह्मचारियों, पण्डितों, स्त्रियों और बालकों से

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आत्मानमपरिचाययन्तोऽपि च प्रवेष्टव्याः ।

दौवारिकः—संन्यासिन् ! संन्यासिन् ! बह्वुक्तम्, विरम न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे । किन्तु यो वैदिकधर्मरक्षाव्रती, यश्च सन्न्यासिनां ब्रह्मचारिणां तपस्विनाञ्च सन्न्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायाणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेश-भूमिः, तस्यैव महाराज-शिववीरस्याऽऽज्ञां वयं शिरसा वहामः ।

संन्यासी—अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः ।

दौवारिकः—अलमालप्यापि तत्, प्राह्णे महाराजस्य सन्ध्यो-

वहामः = सर्वथा पालयामः । अन्तरायाणाम् = विघ्नानाम् । "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः । हन्ता=निवारयिता ।

अलमालप्यापि = इदमालपनीयमपि नास्तीत्यर्थः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वे"ति क्त्वाप्रत्ययः । यथा शाकुन्तले "अलं रुदित्वा, ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तले"त्यत्र, शिशुपालवधे "आलप्यालमिदं बभ्रोर्यत्स दारानपाहरदि" त्यत्र च प्रसिद्धोऽयम् । प्राह्णे = पूर्वाह्णे । तुष्णीम्=

कुछ न पूछना, यदि वे अपना परिचय न भी दें, तो भी उन्हें प्रवेश कराना ।

द्वारपाल—संन्यासी, संन्यासी, बहुत कहा, अब चुप होइये, हम द्वारपाल ब्रह्मा की भी आज्ञा माननेवाले नहीं हैं । लेकिन जिन्होंने वैदिक धर्मरक्षा का व्रत लिया है, जो संन्यासी, ब्रह्मचारी और तपस्वियों के संन्यास, ब्रह्मचर्य और तपस्या के विघ्नों का विघात करते हैं और जिनसे यह कोङ्कणदेशभूमि वीरप्रसू (वीर को जन्मनेवाली) कहलाती है, उन्हीं महाराज वीर शिवाजी की आज्ञा को शिरोधार्य करते हैं ।

संन्यासी—अच्छा, जो कुछ भी हो, मार्ग बतलाओ, हम वीर शिवाजी के निकट जाना चाहते हैं ।

द्वारपाल —यह मत कहिये, पूर्वाह्ण में महाराज के सन्ध्योपासन के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पासनसमये भवादृशानां प्रवेशसमयो भवति ; न तु रात्रौ ।

संन्यासी—तत्किं कोऽपि न प्रविशति रात्रौ ?

दौवारिकः—(साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा प्राप्त-परिचय-पत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः; ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्-इति कथयन्नेव तत्तेजसेव धर्षितो मध्य एव विरराम ।

संन्यासी—(स्वगतम्) राजनीति-निष्णातः शिववीरः । सर्वथा दौवारिकता-योग्य एवायं द्वारपालः स्थापितोऽस्ति । परीक्षितमप्येनमेकस्मिन् विषये पुनः परीक्षिष्ये तावत् । (प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि ।

दौवारिकः—(तथा कृत्वा) कथ्यताम् ।

अलाबूपात्रम् । भिक्षाभाजनमिति सव्यङ्ग्यम् । **धर्षितः** = भीषितः ।

राजनीतौ, निष्णातः = निपुणः । "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता" इत्यमरः । **दौवारिकता** = द्वारपालकर्म । **परीक्षिष्ये** = परीक्षां करिष्ये ।

समय आपके सदृश लोगों का प्रवेश-समय है—न कि रात्रि में ।

संन्यासी—तो क्या रात्रि में किसी का भी प्रवेश नहीं होता ?

द्वारपाल—(बिगड़ता हुआ) किसी का क्यों नहीं होता ? महाराज के परिचित, परिचयपत्र प्राप्त या आहूत लोग रात्रि में प्रविष्ट हो सकते हैं, आप के ऐसे नहीं, जो तुम्बी लेकर दर-दर—यह कहते मानो उनके प्रभाव से घबराया-सा बीच ही में चुप हो गया ।

संन्यासी—(अपने मन में) वीर शिवाजी राजनीति में कुशल हैं । उन्होंने पहरेदारी के योग्य ही द्वारपाल रख छोड़ा है । यद्यपि मैं इसकी परीक्षा ले चुका हूँ, फिर भी एक विषय में और दूसरी परीक्षा लूँगा । (प्रकाश में) द्वारपाल, इधर आओ कुछ तुम्हारे कान में कहूँगा ।

द्वारपाल—(वैसा कर) कहिये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संन्यासी—निरीक्षस्व त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि संभाव्यते ।

दौवारिकः—आम्, अग्रे कथ्यताम् ।

संन्यासी—वयञ्च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन-तत्त्वं विद्मः ।

दौवारिकः—स्यादेवम्, अग्रे-अग्रे ?

संन्यासी—तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेस्तदधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्सङ्ख्याक-तुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः ।

निरीक्षस्व = अवलोकय । **त्वम्** = निस्स्वः साधारणदौवारिकः क्लेशेन जीविकां निर्वहन्निति ध्वनिः । अत एव तत्प्रयोगः, अन्यथा 'निरक्षस्वे' त्येतेनैव गतार्थता स्यात् । **रसायनानाम्** = ताम्रादिभ्यः सुवर्णादिनिर्माणशक्तिमताेषधिविशेषाणाम्, **तत्त्वम्** = सामर्थ्यम् । **प्रतिरुन्धेः** = प्रतिवारयेः । 'रुधिर् आवरणे' इत्यस्य विधौ सिपि रूपम् । **परिष्कृतम्** = सुसाधितम् । **तुला** = पलानां शतम् । "तुला स्त्रियां पलशतमि"त्यमरः । **ताम्रम्**, धातुनाम । **जाम्बूनदम्** = सुवर्णम् ।

संन्यासी—देखो, तुम इस समय द्वारपाल हो, प्राणों की बाजी लगाकर अपना जीवन निर्वाह करते हो । तुम कभी हजार या दस हजार रुपये इकट्ठे पा जाओगे, यह किसी तरह संभव नहीं है ।

द्वारपाल—अच्छा, आगे कहिये ।

संन्यासी—हम संन्यासी हैं, वनों में और कन्दराओं में विचरते हैं, सारा रसायन-रहस्य हमें ज्ञात है ।

द्वारपाल—हो सकता है, आगे आगे ?

संन्यासी—यदि तुम मेरे प्रवेश में बाधा न डालो, तो मैं अभी शोधित पारे की भस्म तुम्हें दूँ जिससे तुम एक रत्ती से भी लगभग पक्का ५२ सेर ताँबा सोना बना डालोगे ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दौवारिकः—हंहो ! कपटसंन्यासिन् !! कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ? ते केचनान्ये भवन्ति जार-जाताः; ये उत्कोच-लोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय, कस्त्वम् ? कुत आयातः ? केन वा प्रेषितः ?

संन्यासी—(स्मित्वेव) अथ त्वं मां कं मन्यसे ?

दौवारिकः—अहं तु त्वामस्यैव ससेनस्याऽऽयातस्य अपजल-खानस्य—

संन्यासी—(विनिवार्य मध्य एव) धिग् धिक् !

दौवारिकः—कस्याप्यन्यस्य वा गूढचरं मन्ये। तदादेशं पाल-यिष्यामि प्रभुवर्यस्य। (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्ष-समीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

जारजाताः, "अमृते जारजः कुण्डो मृते भर्तरि गोलकः" इति शास्त्रेण पत्यौ जीवति परपुरुषेण समुत्पादिता जारजाता इत्युच्यन्ते, अत्र निन्दार्थकम्। उत्कोचो हिन्द्यां "घूस" इति, "रिशवत" इति चोच्यते।

द्वारपाल—अरे कपटसंन्यासी, मुझे विश्वासघात और स्वामिवंचना सिखलाते हो ? वे कोई दूसरे ही जारपुत्र हैं, जो घूस के लोभ से स्वामी को वञ्चित कर अपना नरकपात करते हैं, हम शिवाजी के अनुचर ऐसे नहीं हैं। (संन्यासी का हाथ पकड़ कर) अब सच बतलाओ तुम कौन हो ? कहाँ से आये हो ? किसने तुम्हें भेजा है ?

संन्यासी—(मुसकिराता-सा) अच्छा, तुम मुझे कौन समझते हो ?

द्वारपाल—मैं तो तुम्हें सेना सहित आये हुए इसी अफजल खाँ का...

संन्यासी—(बीच ही में रोक कर) छिः छिः।

द्वारपाल—या किसी दूसरे का गुप्तचर समझता हूँ। इसलिए महाराज का आदेश-पालन करूँगा। (हाथ पकड़ कर) दुर्गाध्यक्ष के समीप आओ वे ही सोच-समझ कर तुम्हारे साथ समुचित व्यवहार करेंगे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततः संन्यासी तु—"त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व, दयस्व" इति सहस्रधा समचकथत्, तथाऽपि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

अथ यावद् द्वारस्थ-स्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबल-प्रकाशस्य दीपस्य समीपे समायातस्तावत्संन्यासिनोक्तम् "दौवारिक! अपि मां पूर्वमपि कदाऽप्यद्राक्षः?" ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्याम्, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुख-मण्डलेन पर्यचिनोत्। भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय, प्रण-

---

काचघटिता मञ्जूषा **काचमञ्जूषा** = रक्तवर्तिका। "लालटेन" इति हिन्दी। **अपाङ्गः** = नेत्रप्रान्तभागः। "अपाङ्गौ नेत्रयोरन्तावि"त्यमरः। **चुम्बितम्**=स्पृष्टम्, **यौवनम्**=नवं वयो येन तेन। **निर्भीकेण**=भयशून्येन। **हारिणा**=मनोहरेण। **पर्यचिनोत्**=परिचितवान्। **भुशुण्ड्याः** = आयुध-विशेषस्य, **समुत्तोलनेन** = उत्थापनेन, यः **किणः** = चिह्नविशेषः, तेन **कर्कशस्य** = कठोरस्य, **करस्य ग्रहः** = ग्रहणम्। गौरसिंहः कथाभागे पूर्वं गौरबटुनाम्ना समायातोऽयमेवेति न विस्मर्तव्यम्।

तत्पश्चात् संन्यासी तो "छोड़ो, मैं फिर नहीं आऊँगा, मैं अब नहीं कहूँगा, तुम उदार हो, दया करो" यों हजारों मिन्नते करने लगा, किन्तु द्वारपाल फिर भी खींचता हुआ ले चला।

जब द्वारपाल फाटक के खम्भे के ऊपर रक्खी हुई काँच की पेटी में जल रहे तेज दीपक के पास पहुँचा, तब संन्यासी ने कहा—"द्वारपाल, क्या पहले भी कभी तुमने मुझे देखा था?" तब तो गौर से देख रहे द्वारपाल ने गंभीर स्वर आरक्त नेत्रों के प्रान्त, अतिशय गौर वर्ण, उभड़ रही नई जवानी और निर्भीक मनोहर मुखमण्डल से उसे पहचान लिया। बन्दूक चलाने से पड़े छालों के घावों से कठोर कर का ग्रहण छोड़ कर, सहमा-सा सिर झुका कर प्रणाम करता हुआ बोला, "ओह! क्या

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौर-ब्रह्मचारी

मन्नुवाच-"आ ! कथं श्रीमान् गौरसिंह आर्यः ? क्षम्यतामनुचित-व्यवहार एतस्य ग्राम्य-वराकस्य"। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः, समवोचत्– दौवारिक ! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृशा एव प्रभूणां पुरस्कारभाजनानि भवन्ति लोकद्वयञ्च विजयन्ते। तव प्रामाणिकतां जानीत एवात्रभवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि। निर्दिश तावत्, कुत्र श्रीमान् ? किञ्चानुतिष्ठति ?

ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य, प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु-तल-वेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिकावरण-काषाय-वसनं चैकतो निम्बशाखायामवलम्बय्य, पटखण्डेन पक्ष्मणोः

नेदीयस्याम् = समीपवर्तिन्याम्। अङ्गरक्षिका = कञ्चुकस्यैव संक्षेपः। "अङ्गरखी" इति हिन्दी। पक्ष्मणोः = अक्षिलोम्नाः। "पक्ष्माक्षिलोम्नी"

संमान्य श्रीमान् गौरसिंह हैं ? इस बेचारे ग्रामीण के अनुचित व्यवहार की क्षमा हो।" यह सुन कर उसकी पीठ पर हाथ फेरते हुए संन्यासि-रूपधारी गौरसिंह ने कहा, "द्वारपाल, मैंने तुम्हारी बार-बार परीक्षा ली है, तुम्हें जान गया हूँ और उचित पद पर तुम्हारी नियुक्ति हुई है। तुम्हारे ऐसे ही स्वामी के पुरस्कार के पात्र होते हैं और दोनों लोकों में सम्मान पाते हैं। तुम्हारी प्रामाणिकता को पूज्य प्रभु जानते ही हैं, लेकिन मैं भी विशेष रूप से कहूँगा, बतलाओ, महाराज कहाँ हैं और क्या करते हैं?"

तत्पश्चात् हाथ जोड़े हुए द्वारपाल ने उनके कान में कुछ कहा, उसे सुनकर प्रधान फाटक पार कर अत्यन्त निकटवर्ती एक नीम के तले के चबूतरे पर साथी को बैठा कर, तुम्बी एक ओर रखकर, अँगरखी को आवृत करने (ढकने) वाला गेरुआ वस्त्र एक ओर नीम की शाखा पर टाँग कर, कपड़े के टुकड़े से आँख, गाल, कान, भौंह, ठोंड़ी, नाक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कपोलयोः कर्णयोर्भ्रुवोश्चिबुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्रोञ्छ्य, स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानावध्य, सहचर-पोटलिकात उष्णीषमादाय, शिरसि चाऽऽधाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक-निर्देशानुसारं श्रीशिववीरालंकृतामट्टालिकां प्रातिष्ठित ।

शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्यां सान्द्र-सुधासार-संलिप्त-भित्तिकायां धूपधूपितायां गजदन्तिकावलम्बित-विविध-च्छुरिका-

---

त्यमरः । "पलक" इति हिन्दी । **चिबुकं** "ठोड़ी" इति हिन्दीप्रसिद्धम् । **छुरिताम्** = व्याप्ताम, संलग्नामित्यर्थः । **प्रोञ्छ्य** = दूरीकृत्य । "पोंछकर" इति हिन्दी । **मेचकान्** = कृष्णवर्णान्, 'कृष्णे नीलासितश्यामकालश्यामलमेचका' इत्यमरः । **पोटलिका**="गठरी" इति भाषायाम् ।

शिववीरोऽट्टालिकायामुपविष्ट आसीदिति सम्बन्धः । अट्टालिकां विशिनष्टि-**चन्द्रचुम्बिन्याम्** = अत्युच्छ्रायायाम् । असम्बन्धे सम्बन्धवर्णनादतिशयोक्तिः । **सान्द्रेण**=घनेन, **सुधासारेण**=चूर्णद्रव्येण, **संलिप्ताः**=रूषिताः, **भित्तिकाः** = कुड्यानि यस्यां तस्याम् । स्वल्पो गजदन्तो **गजदन्तिका** = भित्तिशङ्कुः, "खूटी" इति हिन्दी, **तस्यामवलम्बिताः**, **विविधाः**=अनेकप्रकाराः, छुरिकाखड्गरिष्टिका यस्यां तस्याम् । छुरिकाऽसिधेनुका, खड्गोऽसिः,

---

और केशों में लगी हुई भस्म पोंछ कर, कन्धे और पीठ पर लटक रहे काले घुँघराले बालों को बाँधकर, साथी बालक की गठरी में से पगड़ी निकाल कर सिर पर पहन कर और एक सुन्दर डुपट्टा कन्धे पर डाल कर द्वारपाल के कथनानुसार वीर श्रीशिवाजी द्वारा अलंकृत अटारी की ओर चले ।

वीर श्रीशिवाजी धूप से सुगन्धित, सोने के पिंजड़ों में लटक रहे सुग्गे, कोयल, चकोर और मैना के कलरव से सुशोभित एक गगनचुम्बी अटारी में, जिसकी दीवारें गाढ़े चूने से पुती थीं, खूँटियों पर भाँति-भाँति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

खड्ग-रिष्टिकायां सुवर्ण-पिञ्जर-परिलम्बमान-शुक-पिक-चकोर-सारिका-कल-कूजित-पूजितायामट्टालिकायां सन्ध्यामुपास्योपविष्ट आसीत् । परितश्च तस्यैव खर्वामप्यखर्व-पराक्रमां श्यामामपि यशःसमूह-श्वेतीकृत-त्रिभुवनां कुशासनाश्रयामपि

रिष्टिका तद्विशेषः । सुवर्णपिञ्जरेषु, परिलम्बमानानां = शुकपिकचकोरसारिकाणां, कलकूजितैः = मधुरभाषणैः, पूजितायाम् = भूषितायाम् । शुकाः = कीराः, पिकाः=कोकिलाः, चकोराः=जीवञ्जीवाः, सारिकाः= शारिकाः, "मैना" इति हिन्दी । परितश्च तस्यैव मूर्तिं दर्शं दर्शं वयस्याः कटानध्यवस्यन्निति सम्बन्धः । मूर्तिं विशिनष्टि—खर्वाम् = ह्रस्वाम् । शिववीरः खर्वः स्थूलोऽप्रठितश्चाऽऽसीदिति वृत्तवेदिनो वदन्ति । अखर्वः = अनल्पः, पराक्रमो यस्यान्ताम् । अखर्वस्य पराक्रमो यस्यामिति विगृहीते यः खर्वस्तस्मिन्नखर्वस्य पराक्रमः कुत आयात इति विरोध इवाऽऽभासते । परिहारोपायश्च वास्तविकविग्रहाश्रयणेन । तथा च विरोधो न वास्तव इति विरोधाभासोऽत्रालङ्कारः । कलितगौरवामिति 'कलितलाघवामित्यन्तं सर्वत्रैवमेव । सोऽपि च स्वभावोक्त्योत्प्रेक्षया चानुप्राणित इति विपुलां शोभामाश्रयति । श्यामाम्=कृष्णाम् । यशःसमूहेन=कीर्त्तिकूटेन, श्वेतीकृतम् = धवलितम्, त्रिभुवनं यया ताम् । श्यामया धवलीकरणं विरोधविषयः,

के छूरे, कृपाण और तलवार लटक रही थीं, सन्ध्यावन्दन से निवृत्त होकर बैठे थे। उनकी विशाल ललाटवाली, प्रबल बाहुदण्डवाली, आरक्तान्तनेत्रवाली, शंख सदृश कण्ठवाली, सुसंगठित नसों से युक्त, गोल और काली मूँछ-दाढ़ी वाली, मूर्तिमती वीरता-सी, देहधारिणी धीरता-सी, युद्धभूमि में असाधारण फुर्तीली मूर्ति का पुनः पुनः अवलोकन कर प्रसन्नता का अनुभव कर रहे मित्रगण उन्हीं के चारों ओर चटाई पर बैठे थे। चारों ओर उनकी मूर्ति को; जोकि देखने में छोटी होने पर भी विपुल पराक्रम शालिनी थी, काली होने पर भी यशोराशि से तीनों भुवनों को धवलित कर चुकी थी, कुशासन पर आसनी होने पर भी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुशासनाश्रयां पठन-पाठनादि-परिश्रमानभिज्ञामपि नीति-निष्णातां स्थूलदर्शनामपि सूक्ष्म-दर्शनां ध्वंसकाण्डव्यस-निनीमपि धर्मधौरेयीं कठिनामपि कोमलाम् उग्रामपि शान्तां शोभित-विग्रहामपि दृढ-सन्धि-बन्धां कलित-गौरवामपि कलित-

परिहारश्च कीर्त्तेः श्वैत्याभिधानद्वारेण । **कुशानाम्, आसनम्** = विष्टरः, **आश्रयः** = अवस्थितिः, यस्यास्ताम् । **सुशासनम्** = शोभनराष्ट्ररक्षणम्, **आश्रयो** यस्यास्ताम् । कुत्सितं शासनं कुशासनमाश्रयो यस्या इति विग्रहे या कुशासनाश्रया सा कथं सुशासनाश्रयेति विरोधः । **स्थूलं दर्शनम्** = नेत्रं यस्यास्ताम् । **सूक्ष्मं दर्शनम्** = कर्त्तव्याकर्त्तव्यविचारो यस्यास्ताम् । या स्थूलदर्शना सा कथं सूक्ष्मदर्शनेति विरोधः सामान्यतोऽर्थाश्रयणे । सूक्ष्मबुद्धित्वरूपवास्तविकार्थे परिहारश्च । **ध्वंसकाण्डस्य** = विधर्मिविशसनस्य, व्यसनमस्ति यस्यां तादृशीमपि **धर्मधौरेयीम्** = धर्मभारधारिणीम् । या ध्वंसव्यसनवती सा कथं धर्मं पालयेदिति विरोधः, विधर्मिवधेन सनातन-धर्मपालिका चेति विरोधपरिहारः । उग्रशान्तयोर्विरोधः स्पष्ट एव, उग्रत्वं दुर्धर्षत्वाच्छान्तत्वञ्च दयाविभूषितत्वादिति परिहारः । कठिनकोमलयोः स्पर्शपरत्वे विरोधः । तयोः पुनः शरीर-हृदय-गतत्वे स्थलविशेषविषयत्वे वा परिहारः । **शोभितः** = सुन्दरः, **विग्रहः**=संग्रामो यस्यास्ताम् । **दृढः** = स्थिरः, **सन्धिबन्धः** = सन्धिप्रस्तावो यस्यास्तामिति विरोधः, परिहारस्तु विग्रहशब्दस्य शरीररूपार्थाश्रयणेन, सन्धिबन्धशब्दोऽपि अवयवसन्धान-परः । कलितगौरवलाघवयोर्विरोधः स्फुट एव, **गौरव**मित्यस्य गाम्भी-

सुन्दर शासन की आधार भित्ति थी, पठन-पाठन आदि के परिश्रम से अपरिचित होने पर भी राजनीति में निष्णात (दक्ष) थी, देखने में स्थूल होने पर भी सूक्ष्म दृष्टि (कर्तव्याकर्तव्य विचार) सम्पन्न थी, विधर्मियों (म्लेच्छों) की हिंसा की व्यसनिनी होने पर भी धर्म का भार धारण करनेवाली थी, कठोर होने पर भी कोमल थी, उग्र होने पर भी शान्त थी, सुन्दर शरीरवाली थी और उसकी सन्धियों के जोड़ सुदृढ़

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लाघवां विशाल-ललाटां प्रचण्ड-बाहुदण्डां शोणापाङ्गां कम्बुग्रीवां सुनद्धस्नायुं वर्तुल-श्याम-श्मश्रुं धारिताकृतिमिव वीरतां विग्रहिणीमिव धीरतां समासादित-समर-स्फूर्त्तिं मूर्त्तिं दर्शं दर्शं परं प्रसादमासादयन्तस्तस्य वयस्याः कटानध्यवसन्। तेषु च अपजलखान-दमन-विषयक-वार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्षे संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्—

र्यमित्यर्थाश्रयणे लाघवशब्दस्य चातुर्यार्थकत्वे च परिहारः। **शोणापाङ्गाम्** = रक्तकटाक्षाम्। **सुनद्धाः** = शोभनतया स्थिताः, स्नायवो यस्यास्ताम्। वर्तुलं श्यामं च श्मश्रु यस्यास्ताम्। उत्प्रेक्षते—**धारिता** = गृहीता, आकृतिर्यया ताम्। **विग्रहिणीमिव** = शरीरवतीमिव। **समासादिता** = लब्धा, समरे स्फूर्त्तिर्यया ताम्। **दर्शं दर्शम्** = दृष्ट्वा दृष्ट्वा। **कटान्** = तृणनिर्मितोपवेशनानि। "चटाई" इति हिन्दी। "उपान्वध्याङ् वस" इत्याधारस्य कर्मत्वम्। **आरिप्सुषु** = प्रारम्भं चिकीर्षुषु। **न्यवीविदत्**=निवेदितवान्।

थे, गाम्भीर्यशालिनी होने पर भी चातुर्यसम्पन्न थीं*। मित्रमण्डली अफ़ज़ल खाँ के दमन से सम्बन्ध रखनेवाली बातें आरम्भ करना ही चाहती थी कि एक बेतधारी द्वारपाल ने प्रविष्ट होकर, बेत को बगल में दबा कर, सिर झुका कर, हाथ जोड़ कर निवेदन किया, "महाराज,

* यहाँ पर—जो स्वयं खर्वा है वह अखर्व के पराक्रम से युक्त कैसे ? जो स्वयं काली है वह त्रिभुवन को धवलित कैसे कर सकती है ? जो स्वयं कुशासनाश्रय हैं वह सुशासनाश्रय कैसे हो सकती है ? जो पठन-पाठन आदि के परिश्रम से कोरी हैं वह नीति में निष्णात कैसे हो सकती है ? जो स्थूलदर्शना है वह सूक्ष्मदर्शना कैसे ? जो हत्याकाण्ड व्यसनिनी है वह धर्मधुरन्धर कैसे ? जो कठिना है वह कोमला कैसे ? जो उग्रा (कोपना) है वह शान्ता कैसे ? जो सुन्दर संग्रामवाली है वह दृढसन्धिप्रस्ताववाली कैसे ? जो गौरवयुक्ता है वह लाघवयुक्ता कैसे ? यों आपाततः विरोध मालूम पड़ता है। पूर्वोक्त अर्थ करने से विरोध हट जाता है। ऐसे स्थलों में आलङ्कारिक 'विरोधाभास अलङ्कार' मानते हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"प्रभो ! श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्" तदाकर्ण्य— "आम् ! प्रवेशय प्रवेशय" इति सानन्दं सोत्साहं च कथितवति महाराष्ट्र-मण्डलाऽऽखण्डले, प्रतीहारो निवृत्य, सपद्येव तं प्रावीविशत् ।

तमवलोक्यैव "इत इतो गौरसिंह ! उपविश, उपविश, चिराय दृष्टोऽसि, अपि कुशलं कलयसि ? अपि कुशलिनस्तव सहवासिनः ? अप्यङ्गीकृत-महाव्रतं निर्वहथ यूयम् ? अपि कश्चिन्नूतनो वृत्तान्तः ?" इति कुसुमानीव वर्षता पीयूष-प्रवाहेणेव सिञ्चता मृदुना वचनजातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छ्यमानश्च, त्रिः प्रणम्य, अन्तरङ्ग-मण्डली-जुष्ट-कटे समुपविश्य, करौ सम्पुटीकृत्य, "भगवन् ! अखिलं कुशलं प्रभूणामनुग्रहेणास्माकमखिलानाम्, अङ्गीकृत-महाव्रते

दिदृक्षते = द्रष्टुमिच्छति, "ज्ञाश्रुस्मृदृशां सन" इत्यात्मनेपदम् ।

आखण्डलशब्द इन्द्रवाच्यपि प्रकृते श्रेष्ठपरः । प्रावीविशत् = अन्तर्णीतवान् । जुष्टम् = सेवितम् । अध्युषितमिति यावत् । धात्, लुङि

श्रीमान् गौरसिंह प्रभु-चरणों का दर्शन करना चाहते हैं ।" यह सुन कर आनन्द और उत्साह के साथ महाराष्ट्र देश के अधिपति के "अच्छा, लिवा लाओ, लिवा लाओ" कहने पर द्वारपाल ने लौट कर तुरन्त उन्हें प्रविष्ट कराया ।

उन्हें देखते ही—"गौरसिंह ! इधर बैठो, इधर बैठो, चिरकाल से दीख पड़े हो, कुशल तो है, तुम्हारे सहयोगी सब कुशली तो हैं ? तुम लोग स्वीकृत महाव्रत को निभाते तो हो न ? क्या कोई नया समाचार है" यों फूल-से बरसा रहे, मानो अमृत की लहरों से नहला रहे, कोमल वचनों द्वारा महाराज वीर शिवाजी से आदृत हो रहे और पूछे जा रहे गौरसिंह ने तीन बार प्रणाम कर उसी चटाई पर, जिस पर कि मित्र-मण्डली बैठी थी, बैठकर हाथ जोड़ कर कहा—"भगवन्, प्रभुचरणों के अनुग्रह से हम सब लोग सब तरह कुशली हैं, स्वीकृत महाव्रत में कहीं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च मा स्म पदं धात् कश्चानान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः, नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः—ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्न-सच्छीलानां म्लेच्छ-हतकानाम्" इति कथयामास। ततश्च तेषा-मेवमभूदालापः।

शिववीरः—अथ कथ्यतां को वृत्तान्तः? का च व्यवस्था अस्मन्महाव्रताश्रम-परम्परायाः?

गौरसिंहः—भगवन्! सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गी-कृत-सनातनधर्म-रक्षा-महाव्रतानां धारित-मुनि-वेषाणां वीरवरा-णामाश्रमाः सन्ति। प्रत्याश्रमञ्च वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तः-

रूपं, माङो योगादडभावः। प्रत्नः = पुरातनः, "पुराणे प्रतनप्रत्नपुरातन-चिरन्तना" इत्यमरः। अद्यतनसमये = सम्प्रति। "आजकल" इति हिन्दी। अद्यतनशब्दो वैयाकरणैः परिभाषितो यस्मिन्नर्थे अतीतरात्र्य-र्धारब्धागामिरात्र्यर्धचरमावयवरूपे—न तदभिप्रायेण प्रयोग इति वेदितव्यम्। स्वच्छन्दानामित्यारभ्य म्लेच्छान्तेऽनुप्रासः। महाव्रतम् =

कोई विघ्न-बाधा उपस्थित न हो यही सदा भगवान् विश्वनाथ से प्रार्थना करते हैं, आजकल निरंकुश, उद्दण्ड, शील और सदाचार विहीन म्लेच्छों के दुराचार के सिवा कहने और सुनने योग्य और कौन वृत्तान्त है?" तदुपरान्त उनका यों वार्तालाप हुआ।

वीर शिवाजी—कहिये हमारे महाव्रताश्रमों का क्या हाल है और क्या व्यवस्था है?

गौरसिंह—भगवन्, सब ठीक हो गया है, प्रति दो कोस के बीच में सनातन-धर्मरक्षा का महाव्रत लिये हुए मुनिवेषधारी महावीरों के आश्रम हैं। प्रत्येक आश्रम में छप्परों की ओरियो में सैकड़ों तलवारें छिपाकर रख ली हैं, छप्परों में शक्तियाँ (आयुधविशेष) छिपाई हैं, कुशों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थापिता भुशुण्ड्यश्च समुल्लसन्ति । उञ्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदी-पर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन, केचन जटिलाः, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च वहवः पटवो वटवश्चराः सञ्चरन्ति। विजयपुरादुड्डीयात्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः, किं नाम एषां यवनहतकानाम् ?

शिववीरः–साधु साधु, कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्मा-

सनातनधर्मरक्षा । उञ्छः = पतितकणानामेकैकशो ग्रहणम् । शिलम् = क्षेत्रादौ स्वामित्यक्तानां कणिशानां ग्रहणम् । "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमि"त्यमरः । इङ्गुद्याः = पिण्याकस्य, पर्यन्वेषणम् = सर्वतो मार्गणम्, तस्य । जटिलाः = जटायुताः "लोमादि-पामादि-पिच्छादिभ्यः शनेलचः" । काषायिणः = गैरिकवसनाः । मक्षिकाया अपि, किमुत मनुष्याणाम् । कैमुत्ययुता लोकोक्तिः । अन्तः स्थितम् = मानसे विद्य-

के ढेर के अन्दर बन्दूक छिपाकर रक्खी हैं, खेतों में अनाज के बीज और बाल बीनने, समिधा लाने, इङ्गुद (हिंगोट या मालकांगनी के बीज) खोजने, भूर्जपत्र ढूँढ़ने, फूल तोड़ने, तीर्थाटन करने और सत्संग करने के बहाने कोई जटा धारण किये, कोई मूँड़ मुँड़ाये, कोई गेरुआ वस्त्र पहने, कोई मौनी बने, कोई ब्रह्मचारी का स्वांग रचें अनेक सुचतुर गुप्तचर बालक घूमते हैं। बीजापुर से उड़कर यहाँ आ रही मक्खी के अन्दर की बात तक का हम लोग पता लगा देते हैं, इन दुष्ट वचनों की तो कौन कहे ?

वीर शिवाजी—धन्यवाद ! धन्यवाद !! ऐसा क्यों न हो ? आप लोग भारतीय हैं, उसमें भी ऊँचे खानदान में पैदा हुए हैं और यह भारतवर्ष है, अपने देश पर सभी का स्वाभाविक प्रेम होता है। आप लोगों का सनातन धर्म अत्यन्त पवित्र है। उसे ये जालिम समूल

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कीर्णः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, अस्ति च "प्राणा यान्तु ; न च धर्मः" इत्यार्याणां दृढः सिद्धान्तः। महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते हन्यन्ते, न च धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि, कन्दरि-कन्दरेष्वपि, व्याल-वृन्देष्वपि, सिंह-सङ्घेष्वपि, वारण-वारेष्वपि, चन्द्रहास-चमत्कारेष्वपि च निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुत आर्य-वंशीयाः वस्तुतश्च भारतवर्षीयाः।

अथ कथ्यतां कोऽपि विशेषोऽवगतो वा अपजलखानस्य विषये ?

गौरसिंहः—"अवगतः, तत्पत्रमेव दर्शयामि"—इति व्याहृत्य,

मानम्। **जाल्माः** = अविवेकिनः। "जाल्मोऽसमीक्ष्यकारी स्यादि"त्यमरः। "जालिम" इति हिन्दी। **लुण्ठ्यन्ते** = चोर्यन्ते। **निशीथेषु** = अर्धरात्रेषु। **वारणवारेषु** = हस्तिसमूहेषु। "समूहे निवहव्यूहसंदोहविसरव्रजाः।

उखाड़ रहे हैं। "प्राण जाय, धर्म न जाय" आर्यों का ऐसा दृढ़ सिद्धान्त है। धर्म के लिये महापुरुष लूटे जाते हैं, गिराये जाते हैं, मारे जाते हैं, लेकिन धर्म नहीं छोड़ते, किन्तु धर्म की रक्षा के लिये सब सुखों को तिलाञ्जलि देकर, अर्द्धरात्रि में भी, मूसलाधार वृष्टि में भी, लू की लपटों में भी, महा अरण्यों में भी, पर्वतों की गुफाओं में भी, शेरों के झुण्डों में, भी हाथियों के यूथों में भी और तलवारों की चमचमाहटों में भी निर्भय होकर घूमते हैं। सो आप लोग धन्य हैं, वास्तविक आर्य-वंशीय हैं और यथार्थ भारतीय हैं।

यदि अफ़ज़ल खाँ के विषय में कोई विशेष खबर लगी हो तो कहिये। गौरसिंह ने "लगी है, उसका पत्र ही दिखलाता हूँ" कहकर पगड़ी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उष्णीष-सन्धौ स्थापितं कन्यापहारक-यवन-युवक-मृत-शरीर-वस्त्रान्तः प्राप्तं पत्रं वहिश्चकार ।

सर्वे च विजयपुराधीशमुद्रामवलोक्य, "किमेतत् ? कुत एतत् ? कथमेतत् ? कस्मादेतत् ?" इति जिज्ञासमानाः सोत्कण्ठा वितस्थिरे। गौरसिंहस्तु शिववीरस्यापि तत्प्राप्ति-चरित-शुश्रूषामवगत्य संक्षिप्य सर्वं वृत्तान्तमवोचत् । ततस्तु "दर्श्यताम् , प्रसार्यताम् , पठ्यताम् , कथ्यताम् , किमिदमि"ति पृच्छति शिववीरे, गौरसिंहो व्याजहार-

भगवन् ! सर्पाकारैरक्षरैः पारस्य-भाषायां लिखितं पत्रमेतदस्ति । एतस्य सारांशोऽयमस्ति—विजयपुराधीशः स्वप्रेषितमपज-

---

स्तोमौघ-निकर-व्रात-वार सघात-सञ्चयाः" इत्यमरः । कन्यापहारकस्य = बालिकाचोरस्य, यवनयुवकस्य, मृतस्य = गतासोः, मारितस्येति यावत् । शरीरस्य, वस्त्रान्तः = वसनान्तराले, प्राप्तम् = लब्धम् ।

विजयपुरम् = 'बीजापुर' इति भाषायां प्रसिद्धं नगरम् । वितस्थिरे= स्थिताः । ' समवप्रविभ्यः स्थ" इत्यात्मनेपदम् । शुश्रूषाम्=श्रोतुमिच्छाम् ।

सर्पाकारैः = वक्रैः । सोपहासम् । पारस्यानाम् = पारसीकानाम् , भाषायाम् = वाचि । "फारसी भाषा में" इति हिन्दी ।

के अन्दर रखा हुआ कन्या का अपहरण करने वाले नवयुवक के मृतशरीर के वस्त्रों में मिला हुआ पत्र बाहर निकाला ।

बीजापुर के अधिपति की मुहर देख कर सबके सब "यह क्या ? यह कहाँ से आया, कैसे मिला, किससे प्राप्त हुआ ?" यों जानने के लिये इच्छुक हुए, सभी को यह जानने की उत्सुकता हुई । गौरसिंह ने वीर शिवाजी की भी उस पत्र की प्राप्ति का वृत्तान्त सुनने की इच्छा जान कर संक्षेप में सारा हाल कह सुनाया। फिर तो 'दिखाइये, खोलिये, पढ़िये, कहिए यह क्या है,' यों वीर शिवाजी के पूछने पर गौरसिंह ने कहा—"महाराज, यह पत्र सर्पाकार अक्षरों से (अरबी लिपि से) फारसी भाषा में लिखा हुआ है। इसका यह सारांश है—बीजापुर के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लखानं सेनापतिं सम्बोध्य लिखति यत्—"वीरवर ! महाराष्ट्र-राजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत्कश्चनान्तरायस्तव विजये। शिवं युद्धे जेष्यसि चेत्; पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः। तद् यदि छलेन जीवन्तं शिवमानयेस्तद् वीरपुङ्गवोपाधि-दान-सहकारेण तव महतीं पदवृद्धिं कुर्य्याम्। गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति ! प्रयोजनवशेन शिवमपि साक्षात्करिष्यति" इति।

इत्याकर्णयत एव शिववीरस्य अरुण-कौशेय-जाल-निबद्धौ

'शिवं युद्धे जेष्यसि चेत् पद्भ्यां सिंहं जितवानसी' ति निदर्शनालङ्कारः। मंस्ये = ज्ञास्ये। प्रशस्यः = श्लाघ्यः। प्रस्थापितः = प्रेषितः। विशदीकृत्य = स्पष्टीकृत्य।

अरुणम् = लोहितम्, यत्, कौशेयस्य = पट्टवस्त्रस्य, जालम् = आनायः, तेन निबद्धौ = गृहीतौ। मीनाविवेत्युपमा। क्रोधान्नयने लोहिते अभूतामिति

अधिपति स्वप्रेषित सेनापति अफ़जल खाँ को सम्बोधित कर लिखते हैं—

"वीरवर, महाराष्ट्र के अधिपति शिवाजी के साथ लड़ने के लिये तुमने प्रस्थान किया है, इसलिये तुम्हारी विजय में किसी प्रकार की विघ्न-बाधा उपस्थित न हो। यदि युद्ध में शिवाजी पर विजय पा लोगे तो मैं समझूँगा तुमने पैर से ही शेर को परास्त किया, किन्तु शेर को मारने की अपेक्षा जीवित शेर को वश करना ही अधिक प्रशंसनीय है। सो यदि छल से जीते-जीते शेर को यहाँ ले आओ, तो वीरपुंगव की उपाधि प्रदान के साथ तुम्हारी बड़ी पदवृद्धि करूँगा। गोपीनाथ पंडित को मैंने तुम्हारे पास भेजा है, वे मेरे अभिप्राय को स्पष्ट कर तुम्हें बतलाएँगे। किसी मतलब से शिवाजी से भी भेंट करेंगे।"

यह सुनते ही वीर शिवाजी के नेत्र लाल रेशमी जाल में फँसी हुई

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मीनाविव नयने सञ्जाते, मुखञ्च वाल-भास्कर-विम्ब-विडम्बनामा-ललम्वे, अधरञ्च धीरताधुरामधरीकृतवान्।

अथ स दक्षिण-कर-पल्लवेन श्मश्रु परामृशन्नाकाशे दृष्टिं वद्ध्वा "अरे रे विजयपुर-कलङ्क! स्वयमेव जीवन् शिवः तव राजधानी-माक्रम्य, वीरपुङ्गवोपाधिसहकारेण तव महतीं पदवृद्धिमङ्गीकरिष्यति, तत्किं प्रेषयसि मृत्योः क्रीडनकानेतान् कदर्य्य-हतकान्?" —इति साम्रेडमवोचत्। अपृच्छच्च "ज्ञायते वा कश्चिद् वृत्तान्तो गोपीनाथपण्डितस्य ?"

यावद् गौरसिंहः किमपि विवक्षति तावत्प्रतीहारः प्रविश्य,

वाच्योऽर्थः। **बालभास्करस्य**=नवोदितसूर्यस्य, यद्, **विम्वम्** = नितान्त-लोहितं मण्डलम्, **तद्विडम्बनाम्** = तदनुकृतिम्। **आललम्वे**=धृतवत्। **धीरताधुराम्**=धैर्यभारम्। "ऋक्पूरब्धू" रित्यादिना समासान्तोऽप्रत्ययः। **अधरीकृतवान्** = त्यक्तवान्। अनुप्रासः। चूर्णकं गद्यम्, वैदर्भी रीतिः, प्रसादश्च गुण इति तत्र तत्र न विस्मरणीयम्। **शिवः** = शिवाजीत्यर्थः। **पदवृद्धिं** = स्थानोन्नतिम्, 'तरक्की' इति भाषायाम्। **मृत्योः** = यमस्य। **क्रीडनकान्** = खेलासाधनानि, सन्निहितमरणानिति यावत्।

मछली-से हो गये और मुखमण्डल नवोदित (प्रातः कालीन) सूर्यबिम्ब के सदृश लाल हो उठा और होंठने धैर्य का त्याग कर दिया (ओठ फड़कने लगा)।

तदनन्तर वीर शिवाजी ने दाहिने करकमल से मूछों पर ताव देते हुए आकाश की ओर दृष्टि कर "अरे बीजापुर के कलंक, शिवाजी जीवित रह कर स्वयं ही तुम्हारे राज्य पर आक्रमण कर वीरपुङ्गवोपाधि के साथ तुम्हारी बड़ी पदवृद्धि (तरक्की) स्वीकार करेगा, काल के खिलौने इन दुष्ट कातरों को क्यों भेजते हो?" यह वाक्य दो तीन बार दुहराया और गौरसिंह से पूछा कि गोपीनाथ पण्डित का कुछ हाल समाचार जानते हो?

गौरसिंह कुछ कहना ही चाहते थे, इतने में द्वारपाल ने आकर तीन बार

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"विजयतां महाराजः" इति त्रिर्व्याहृत्य, करौ संपुटीकृत्य, शिरो नमयित्वा कथितवान् "भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। "नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्" इति बहुशः कथ्यमानोऽपि "किञ्चनात्यावश्यक-कार्यम्" इति प्रतिजानाति। तदत्र प्रभुचरणा एव प्रमाणम्" इति।

तदवगत्य "सोऽयं गोपीनाथः, सोऽयं गोपीनाथः" इति साम्रेडं सतर्कं सोत्साहञ्च व्याहृतवत्सु निखिलेषु; शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा संबोध्य कथितो यद् "गम्यतां दुर्गान्तर एव महा-वीरमन्दिरे तस्मै वासस्थानं दीयताम्, भोज्य-पर्यङ्कादि-सुखद-साम-ग्रीजातेन च सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि" इति।

ततो बाढमित्युक्त्वा प्रयाते माल्यश्रीके; "महाराज! आज्ञा चेदहमद्यैव अपजलखानं कथमपि साक्षात्कृत्य, तस्याखिलव्यवसितं

साक्षात्करिष्यामि=द्रक्ष्यामि। गोपीनाथमिति शेषः।

बाढम् = अङ्गीकारसूचकमव्ययम्। व्यवसितम् = उद्योगम्।

'महाराज की विजय हो' कह कर हाथ जोड़कर, सिर झुका कर, कहा— "महाराज, किले के फाटक पर कोई गोपीनाथ नाम के पण्डित महाराज के दर्शनों की इच्छा से खड़े हैं। हम लोगों के बार बार "यह महाराज के दर्शनों का समय नहीं है, फिर कभी पधारिए" कहने पर भी कुछ अत्यावश्यक कार्य बतलाते हैं। प्रभु चरणों की जैसी आज्ञा हो, किया जाय"।

यह जानकर 'वह गोपीनाथ यह है, वह गोपीनाथ यह है' यों दो तीन बार तर्क और उत्साह के साथ सबके कहने पर वीर शिवाजी ने अपने बाल-सखा माल्यश्रीक को सम्बोधित कर कहा, "जाइए, किले के अन्दर ही महा-वीरजी के मन्दिर में उन्हें रहने के लिए स्थान दीजिये, भोजन पलंग आदि सुखद सामग्रियों से उनका सत्कार कीजिये, फिर मैं भी उनसे भेंट करूँगा।"

माल्यश्रीक के "अच्छी बात है" कह कर चले जाने पर गौरसिंह ने धीरे से शिवाजी के कान के निकट कहा—"महाराज, यदि आज्ञा हो तो आज ही किसी प्रकार अफ़जल खाँ से भेंट कर उसका सारा अध्यवसाय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विज्ञाय प्रभुचरणेषु विनिवेदयामि। नाधुना मम क्षान्तिः शान्तिश्च, यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयोर्वार्तयाऽवागमम्; यत् श्व एवैते युयुत्सन्ते" इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।

ततो "वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम्; तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु परिपन्थिन एते अत्यन्तनिर्दयाः, अतिकदर्याः, अतिकूटनीतयश्च सन्ति। एतैः सह परम-सावधानतया व्यवहरणीयम्" —इति कथयित्वा शिववीरस्तं विससर्ज।

क्षान्तिः=क्षमा। कर्णान्तिकम्=श्रवणसमीपम्। असर्वश्रव्यमिति यावत्। चातुरीम् = कौशलम्। "गुणवचनब्राह्मणादिभ्य" इति ष्यञि यलोपयलोपयोः, षित्वान्ङीषि। व्याहन्मि = नाशयामि। परिपन्थिनः = शत्रवः। अत्यन्तं निर्दयाः = दयाशून्याः। अतिकदर्याः = परमनीचाः। "कदर्ये कृपणक्षुद्रे" त्यमरः। अतिकूटनीतयः = कपटाचारचतुराः। "मायानिश्चलयन्त्रेषु कैतवानृतराशिषु। अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियामि"त्यमरः।

(इरादा) जान कर महाराजके चरणों में निवेदन करूँ। इस समय मुझमें न सहिष्णुता है और न शान्ति ही है, कारण कि जब मैं संन्यासी का वेष धारण कर आ रहा था तब मुझे दो मुसलमान सिपाहियों की बातचीत से मालूम हुआ कि कल ही ये लड़ना चाहते हैं।"

तदनन्तर वीर शिवाजी ने "वीरवर, तुम दक्ष हो, सब कुछ कर लोगे, मैं तुम्हारी चातुरी से अवगत हूँ, इसलिए अपनी इच्छानुसार जाओ, मैं तुम्हारे उत्साह में बाधा नहीं डालता, तुम नीतिमार्गों को जानते हो, लेकिन ये शत्रु बड़े क्रूर नीचतम और कपटाचरण में पटु हैं, इनके साथ बड़ी सावधानी से बर्ताव करना चाहिये" यह कह कर गौरसिंह को बिदा किया।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौरसिंहस्तु त्रिः प्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्या एव निम्ब–तरु–तल–वेदिकायाः समीप आगत्य, स्वसहचरं कुमारमिङ्गितेनाऽऽहूय कस्मिंश्चित् स्वसंकेतित-भवने प्रविश्य, आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य, मुखमार्द्रपटेन प्रोञ्छ्य, ललाटे सिन्दूर-विन्दु–तिलकं विरचय्य, उष्णीषमपहाय, शिरसि सूचिस्यूतां सौवर्ण-कुसुम-लतादि-चित्र-विचित्रितामुष्णीषिकां संधार्य, शरीरे हरितकौशेय-कञ्चुकिकामायोज्य, पादयोः शोण-पट्ट-निर्मितमधोवसनमाकलय्य, दिल्लीनिर्मिते महार्हे उपानहौ धारयित्वा, लघीयसीं तानपूरिकामेकां सह नेतुं सहचर-हस्ते समर्प्य,

इङ्गितेन = सङ्केतेन। **प्रसाधनिकया** = कङ्कतिकया। "प्रसाधनी कङ्कतिके" त्यमरः। "कंघी" इति हिन्दी। **सौवर्णेन** = सुवर्णविरचितेन, **कुसुमलतादीनां चित्रेण, विचित्रिताम्** = संवलिताम्। लघूष्णीषमुष्णीषिका, ताम्। "टोपी" इति हिन्दी। **शोणपट्टनिर्मितम्** = रक्तकौशेयरचितम्। **अधोवसनम्** = अधोमार्गेण चरणेन धारणीयं वसनम्। "पायजामा" इति हिन्दी। **दिल्लीशब्दो** "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वय" इत्यादौ पण्डितराजेनापि व्यवहृतः। **महार्हे** इत्यत्र 'ईदूदे' दित्यादिना प्रगृह्यत्वात् प्रकृतिभावो बोध्यः। तानपूर एव **तानपूरिका**। "तानपूरा" इति हिन्दी। **सहे**त्यस्य "आत्मने"ति शेषः। तानपूरिका-

गौरसिंह तीन बार प्रणाम कर, उठ कर, लौट कर, बाहर निकल कर, झटपट उसी नीम के तले के चौतरे के पास आकर अपने साथी बालक को इशारे से बुलाकर पहले से निश्चित अपने किसी एक भवन में प्रविष्ट होकर, अपने और कुमार के बालों पर कंघी फेर कर, गीले अँगौछे से मुँह पोंछ कर, भाल पर सिन्दूर की बिन्दी लगा कर, पगड़ी हटा कर, सूई से सिली सोने के तार फूल, बेल-बूटे आदि के चित्रों से युक्त टोपी सिर पर पहन कर, बदन पर हरा रेशमी अंगरखा धारण कर, लाल रेशमी पायजामा (पैरों की ओर से) पहन कर, दिल्ली के बने बहुमूल्य जूते पहन कर, छोटे से एक तानपूरे को साथ ले जाने के लिए साथी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुप्तच्छुरिकां दन्तावल-दन्त-मुष्टिकां यष्टिकां मुष्टौ गृहीत्वा, पटवासैर्दिगन्तं दन्तुरयन्, करस्थपटखण्डेन च मुहुर्मुहुराननं प्रोञ्छन् गायकवेषेण अपजलखान-शिविराभिमुखं प्रतस्थे।

अथ तौ त्वरितं गच्छन्तौ, सपद्येव परश्शत-श्वेतपट-कुटीरैः शारद-मेघ-मण्डलायितं दीपमाला-विहित-बहुल-चाकचक्यम् अपजलखान-शिविरं दूरत एव पश्यन्तौ, यावत्समीपमागच्छतस्तावत् कश्चन कोकनद-च्छवि-वस्त्र-खण्ड-वेष्टित-मूर्द्धा, कटिपर्यन्तसुनद्ध-काकश्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोण श्मश्रुः, विजय-

---

शब्दस्य तु न सहशब्देन विशेष्यविशेषणभाव इति न तत्र तृतीयाऽऽशंका। दन्तावलस्य = करिणः, दन्तमुष्टिका यस्यां ताम्। दन्तेन निर्मितेति मध्यमपदलोपिसमासो वा। "हाथी दाँत की मूठवाली गुप्ती छड़ी" इति भाषा। पटवासैः = सुगन्धितद्रव्यैः। "इत्र" इति हिन्दी। दन्तुरयन् = उन्नतयन्, सुगन्धयन्निति तात्पर्यम्। करस्थपटखण्डेन = हस्तस्थयाऽङ्गावलद्या। "दस्ती रुमाल" इति हिन्दी।

शारदमेघमण्डलायितम्=शरत्समयमेघमण्डलमिवाऽऽचरितम्। शुभ्रत्वादुन्नतत्वाच्च सादृश्यम्। कोकनदच्छविना = रक्तकमलकान्तिना, वस्त्रखण्डेन = वेष्टितो मूर्धा यस्य सः। कटिपर्यन्ता सुनद्धा काकश्यामा = अतिश्यामला, अङ्गरक्षिका यस्य सः। कर्बुरम् = अनेकवर्णम्, अधोवसनं यस्य सः। शोणश्मश्रुः = रक्तमुखकेशः। विजय-

---

बालक के हाथ दे कर और हाथ में हाथी के दाँत की मूठवाली गुप्ती छड़ी लेकर इत्र की मँहक से दिगन्तों को सुगन्धित करते हुए एवं हाथ में लिए रूमाल से बार बार मुँह पोंछते हुए गायक के वेष से अफ़जल खाँ के शिविर की ओर रवाना हुए।

जल्दी जल्दी कदम बढ़ा रहे वे दोनों सैकड़ों खेमों से शरत् ऋतु के मेघमण्डल-से प्रतीत हो रहे, दीपमालिकाओं से खूब जगमगा रहे अफ़जल खाँ के शिविर को दूर से देखते हुए बात की बात में ज्यों ही पास पहुँचे, तो लाल कमल की-सी कान्तिवाले वस्त्र का टुकड़ा सिर पर लपेटे, कमर तक लम्बी खूब काली अँगरखी बाँधे, चितकबरी लुंगी पहने, लाल

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुराधीश-नामाङ्कित-वर्तुल-पित्तल-पट्टिका-परिकलित-वाम-वक्षः-स्थलः, स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमुर्दूभाषया उवाच-"कोऽयं कोऽयम् ?" इतित। तौ गौरसिंहेनापि-"गायकोऽहं श्रीमन्तं दिदृक्षे" इति समार्दवं व्याख्यायि। ततो "गम्यतामन्येऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति" इति कथयति प्रहरिणि, "घृतेन स्नातु भवद्रसना" इति व्याहरन् शिविर-मण्डलं प्रविवेश।

तत्र च क्वचित् खट्वासु पर्यङ्केषु चोपविष्टान्, सगडगडाशब्दं ताम्रक-धूममाकृष्य, मुखात् कालसर्पानिव श्यामल-निश्वासानु-

---

पुराधीशनाम्नाऽङ्कितया=तन्नामधेयेन चिह्नितया, वर्तुलया=गोलाकारया, पित्तलपट्टिकया = धातुफलकिकया, लोके "चपरास" इति ख्यातया, परिकलितम=भूषितम्, वामम् वक्षःस्थलं यस्य सः। सावष्टम्भम्=सप्रतिरोधम्। समार्दवम्=सकोमलतम्। व्याख्यायि = कथितम्। घृतेन स्नातु भवद्रसनेति, "आपके मुँह में घी चीनी" इत्यर्थकलोकप्रवादकथनम्। अत एव लोकोक्तिरलंकारः।

तत्र चेत्यारभ्य प्रधानपटकुटीरद्वारमाससादेत्येकान्वयि। ताम्रकम्=

लाल मूँछ दाढ़ी वाले, बीजापुर के अधिपति के नाम से अंकित गोल पीतल की चपरास छाती की बाँई ओर डाले किसी आदमीने, जो कन्धे पर बन्दूक रक्खे इधर-उधर गश्त लगा रहा था, उन्हें टोक कर उर्दू में कहा—"कौन है यह कौन है यह"

उसके बाद गौरसिंह ने भी बड़ी नर्मी से कहा—"मैं गायक हूँ, श्रीमान् सेनापति से मिलना चाहता हूँ।" तदनन्तर द्वारपाल के "जाइए, और भी बहुत से गायक और वादनकलाकोविद अभी अभी गये हैं" यों कहने पर "आपके मुँह में घी चीनी" यों आशीर्वाद देकर वे शिविर में प्रविष्ट हुए।

वहाँ उन्होंने देखा कहीं पर खटिया और पलंगों पर बैठकर गड़बड़ ध्वनि के साथ तम्बाकू का धुआँ खींच कर कुछ लोग मुँह से काले सर्पों की नाईं काली साँस छोड़ रहें थे, मानो अपने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्गिरतः, स्वहृदय-कालिमानमिव प्रकटयतः, स्वपूर्वपुरुषोपार्जित-पुण्यलोकानिव फूत्कारैरग्निसात् कुर्वतः, मरणोत्तरमतिदुर्लभं मुखाग्निसंयोगं जीवन-दशायामेवाऽऽकलयतः, प्राप्ताधिकारकलिताखर्व-गर्वान् ; कचिद् "हरिद्रा हरिद्रा, लशुनं लशुनम् , मरिचं मरिचम् , चुक्रं चुक्रम्, वितुन्नकं वितुन्नकम् , शृङ्गवेरं शृङ्गवेरम् , रामठं रामठम् , मत्स्यण्डी मत्स्यण्डी, मत्स्या मत्स्याः, कुक्कुटाण्डं कुक्कु-

"तमाखू" इति हिन्दी । ताम्रकधूमनिश्वासस्य स्वत एव श्यामलस्य मुखादुद्गमितस्य कालसर्पत्वेनोत्प्रेक्षा । यथैन्द्रजालिका जनान्मोहयितुमाननात् कृष्णान् सर्पानुद्गमन्ति तथैवैते शिववीरमोहनाय स्थिता इत्युपमालङ्कारस्य व्यङ्ग्यत्वेन वस्त्वलङ्कारध्वनिः । अन्यथोत्प्रेक्षते **स्वहृदयस्य कालिमानमिव** । पुनरप्युत्प्रेक्षते—**स्वपूर्वपुरुषैः**=अन्वयमूलभूतैः, **उपार्जितान्**=सञ्चितान् , **पुण्यलोकान्**=स्वर्गादिकान् । **अग्निसात्**=वह्न्यधीनीभूतान् । दहत इति भावः । ताम्रकधूमाकर्षणमग्निसंस्कारत्वेनोत्प्रेक्षते-**मरणादुत्तरम्** = देहत्यागानन्तरम् । **प्राप्तेन** = लब्धेन, **अधिकारेण** = स्वाम्येन, **अखर्वः**=बहुलीभूतः, **गर्वः**= अभिमानो येषां तान् । **हरिद्रा** = महारजनम् । "निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी" त्यमरः । सम्भ्रमे द्विरुक्तिः । **चुक्रम्** = वृक्षाम्लम् । "तिन्तिडीकञ्च चुक्रञ्च वृक्षाम्लमि"त्यमरः । "चूक" इति हिन्दी । **वितुन्नकम्**=छत्रा । "अथ च्छत्रा वितुन्नकमि"त्यमरः । "सौंफ" इति हिन्दी । **शृङ्गवेरम्**=आर्द्रकम् । "आर्द्रकं शृंगवेरं स्यादि"त्यमरः । "आदी" इति हिन्दी । **रामठम्**=हिङ्गु । **मत्स्यण्डी**=फाणितम् । "राब" इति

हृदय की कालिमा प्रकट कर रहे थे, मानों अपने पूर्वजों द्वारा उपार्जित स्वर्गादि पुण्य लोकों को फूँक मार कर जला रहे थे, मानो मरने के बाद भी प्राप्त न होने वाला मुख का अग्निसंयोग जीवनावस्था में ही कर रहे थे, अधिकारारूढ होने से घमण्ड में चूर थे, कहीं पर रसोंइये "हल्दी-हल्दी, लहसुन-लहसुन, मरिच-मरिच, खटाई-खटाई, सौंफ-सौंफ, अदरख-अदरख, हींग-हींग, राब-राब, मछली-मछली, मुर्गी के अण्डे-मुर्गी के अण्डे, मांस-मांस" के होहल्ले से बच्चों की नींद

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

टाण्डम्, पललं पललम्" इति कलकलैर्बालानां निद्रां विद्रावयतः, समीप-संस्थापित-कुतू-कुतुप-कर्करी-कण्डोल-कट-कटाह-कम्बि-कडम्वान्, उग्रगन्धीनि मांसानि शूलाकुर्वतः, नखम्पचा यवागूः स्थालिकासु प्रसारयतः, हिङ्गुगन्धीनि तेमनानि तिन्तिडीरसैर्मिश्र-यतः, परिपिष्टेषु कलम्बेषु जम्बीर-नीरं निश्च्योतयतः, मध्ये मध्ये

हिन्दी। कुक्कुट्या अण्डं कुक्कुटाण्डम्। "कुक्कुट्यादीनामण्डादिष्वि"ति पुंवत्त्वम्, पललम्=मांसम्। विद्रावयतः=दूरयतः। कुतूः=चर्मनि-र्मितं तैलाद्याधारपात्रम्। कुतुपः=सैव लघुः। "कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमानि"त्यमरः। कर्करी = हस्तप्रक्षालनादियोग्यं पात्रम्, "कर्कर्यालुर्गलन्तिके" त्यमरः। "करवा" "गडुवा" इति हिन्दी। यवनानां "बधना" इति। कण्डोलः=पिटः। वेणुदलादिरचितो भाण्डविशेषः। "बाँसकी पिटारी" इति हिन्दी। कटः=किलिञ्जकः। कटाहः=शष्कु-ल्यादिपाकपात्रम्। "कढायी" इति भाषायाम्। कम्बिः=दर्विः। "कलछी" इति हिन्दी। कडम्बः=कलम्बः। शूलेन=लोहशलाकया संस्कुर्वतः शूलाकुर्वतः। "शूलात्पाके" इति डाच्। नखम्पचन्ति यास्ता नखम्पचाः। यवागूः=तरलाः। "यवागूरुष्णिका धाना विशेषी तरला च से"त्यमरः। हिङ्गुनो गन्धो येषु तानि हिङ्गुगन्धीनि। "अल्पाख्यायामि"-ति गन्धस्येकारः। "गन्धो गन्धक आमोद लेशे सम्बन्धगर्वयोरि"त्यमरः। तेमनानि = व्यञ्जनानि। तिन्तिडीरसैः = चुक्ररसैः। मिश्रयतः= संयोजयतः। अत्र विशेष्यविशेषणाभ्यां "कढी" इति ख्यातस्य व्यञ्जनस्य ग्रहणम्। कलम्बेषु=वास्तूकादिशाकदण्डेषु। "अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका। कलम्बश्च कडम्बश्चे"त्यमरः। "पिसी हुई चटनी में" इति

हराम कर रहे थे, उन्होंने कुप्पा, कुप्पी, करवा, (गड़वी) टोकरी, करछुल और शाक के डण्ठल सामने रख छोड़े थे, दुर्गन्ध वाले मांस खण्डों को लोहे की सींकों में पिरो कर पका रहे थे, गरम गरम गीला भात परातों में परोस रहे थे, हींग से बघारी हुई कढ़ी में इमली का रस मिला रहे थे, पिसी हुई चटनी में नीबू का रस निचोड़ रहे थे,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समागच्छतस्ताम्रचूडान् व्यजन-ताडनैः पराकुर्वतः, त्रपु-लिप्तेषु ताम्र-भाजनेषु आरनालं परिवेषयतः सूदान्, क्वचिद्वक्र-प्रसाधित-काकपक्षान्, मद-व्याघूर्णित-शोण-नयनान्, सपारस्परिक-कण्ठग्रहं पर्य्यटतः, यौवन-चुम्बित-शरीरान्, स्वसौन्दर्य-गर्व-भारेणेव मन्द-गतीन्, अनवरताऽऽक्षिप्त-कुसुमेषु-बाणैरिव कुसुमैर्भूषितान्, वसना-तिरोहिताङ्गच्छटान्, विविध-पटवास-वासितानपि चिरास्नान-

हिन्दी। निश्च्योतयतः=क्षारयतः। ताम्रचूडान्=कुक्कुटान्। त्रपु-लिप्तेषु="कलई किए हुवे" इति हिन्दी। आरनालम्=काञ्जिकम्। "आरनालकसौवीरकुल्माषाभिषुतानि च। काञ्जिक" इत्यमरः। सूदान्= पाचकान्। वक्रम् यथा तथा प्रसाधिताः=स्फालिताः, काकपक्षाः= कुञ्चितकचाः "काकुल" इति हिन्दी, यैस्तान्। मदेन व्याघूर्णितानि शोणानि नयनानि येषां तान्। पारस्परिकेन=आन्योन्येन, कण्ठग्रहेण=गलधारणेन सहितं यथा स्यात्तथेति क्रियाविशेषणम्। यौवनेन=नववयसा, चुम्बितानि= सम्बद्धानि, शरीराणि येषां तान्। चुम्बितपदं लक्षणया सम्बद्धबोधकम्। वक्त्र-संयुक्तरूपस्य मुख्यार्थस्य बाधात्। स्वभावतो मन्दाया गतेर्निमित्तमुत्प्रेक्षते- स्वसौन्दर्यस्य गर्वभारेणेवेति। कुसुमभूषितेषु तेषु कुसुमानि कुसुमेषुधनुर्निपतितानीत्युत्प्रेक्षते—अनवरतम् = सततम्, आक्षिप्ताः = पातिताः, कुसुमेषुबाणाः = कामशराः, येषु तान्। वसनैः = वस्त्रैः, अतिरोहिता, अङ्गच्छटा येषां तान्। विविधैः, पटवासैर्वासितानपि, चिरास्नानेन=अत्यधिककालतो देहानिर्णेजनेन, महामलिनस्य = अत्यन्तं

बीच बीच में आ रहे मुर्गों को पङ्खो की मार से हटा रहे थे, कलई किये तांबे के बर्तनों में कांजी परोस रहे थे, कहीं पर तिरछी सवारी हुई जुल्फों वाले यवन युवक, जिनके नेत्र नशे से अस्थिर और लाल थे, जवानी उभर चली थी, मानो सौन्दर्य के गर्व के भार से चाल मन्द थी, अङ्गच्छवि वस्त्रों से तिरोहित न थी, जो निरन्तर गिरे हुए कामबाण रूपी पुष्पों से अलंकृत थे, परस्पर गले में बाँह डाल कर घूम रहे थे, भाँति भाँति के इत्रों से सुगन्धित होते हुए भी वे चिरकाल से स्नान न करने के कारण

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महा-मलिन-महोत्कट-स्वेद-पूतिगन्ध-प्रकटीकृतास्पृश्यतान् यवन-युवकान् ;

क्वचिद् "अहो! दुर्गमता महाराष्ट्रदेशस्य, अहो! दुराधर्षता महाराष्ट्राणाम्, अहो! वीरता शिववीरस्य, अहो! निर्भयता एतत्सेनानीनाम्, अहो! त्वरितगतिरेतद्घोटकानाम्, आः! किं कथयामः? दृष्ट्वैव चमत्कारं शिववीर-चन्द्रहासस्य न वयं पारयामो धैर्यं धर्त्तुम्, न च शक्नुमो युद्ध-स्थाने स्थातुम्, को नाम द्विशिरा यः

मलीमसस्य, महोत्कटस्य=अत्युग्रस्य, स्वेदस्य=घर्मवारिणः, पूतिगन्धेन=दौर्गन्ध्येन, प्रकटीकृता = व्यक्तीकृता, अस्पृश्यता = स्पर्शायोग्यता, यैस्तान्।

क्वचिद् व्याहरत इति द्वितीयान्तेन सम्बन्धः। व्याहरणं कथयति—अहो इति। पुनः पुनः सम्भवति सम्बोभवीति, अतिशयेन सम्बोभवीति सम्बोभवीतितमाम्। "वर्त्तमानसामीप्ये वर्त्तमानवद्वे"ति लट्। भ्रूकुंसकः=स्त्रीवेषधारी नर्त्तकः। भ्रुवोः कुंसः=भाषणम्, भ्रुवा कुंसः = शोभा वा यस्य सः। दुराधर्षता = दुरभिभवनीयता। द्वे शिरसी यस्यासौ द्विशिराः, छिन्नमस्तक इत्यर्थः। एवम्भूत एव हि परितः प्रसृतान् तदीयान् भटान् छलयन् रहस्यमाख्यातुमर्हति य उभयतोदृष्टिर्भवेदिति तत्त्वम्। द्वे पृष्ठे

महामैले अत्यधिक पसीने की बदबू से अपनी अस्पृश्यता को व्यक्त कर रहे थे।

कहीं पर सैनिक लोग कह रहे थे "ओह! महाराष्ट्र देश अति दुर्गम है, और मरहट्टों को नीचा दिखाना हँसी-ठट्ठा नहीं है, बाप रे बाप वीर शिवाजी की वीरता अद्भुत है!! इनके सेनापति बड़े निडर हैं, इनके घोड़ों की तेजी विस्मय में डालने वाली है, आह क्या कहें, वीर शिवाजी के तलवार की चमक-दमक देख कर ही हमारे छक्के छूट जाते हैं, समर भूमि में टिकना हमारे लिए मुश्किल हो जाता है। कौन दो सिर वाला

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवेन योद्धुं गच्छेत् ? कश्च नाम द्विपृष्ठो यस्तद्भटैरपि छलालापं विदध्यात् ? वयं बलिनः, आस्माकीना महती सेना, तथापि न जानीमः किमिति कम्पत इव क्षुभ्यतीव च हृदयम् ? 'यवनानां पराजयो भविष्यति, अपजलखानो विनङ्क्ष्यती'ति न विद्मः को जपतीव कर्णे? लिखतीव सम्मुखे, क्षिपतीव चान्तःकरणे। मा स्म भोः! मैवं स्यात्, रक्ष भो ! रक्ष, जगदीश्वर ! अथवा सम्भवीतितमामेवमपि, योऽयमपजलखानः सेनापति-पद-विडम्बनोऽपि 'शिवेन योत्स्ये हनिष्यामि ग्रहीष्यामि वे'ति सप्रौढि विजयपुराधीशमहासभायां प्रतिज्ञाय समायातोऽपि, शिवप्रतापञ्च विदन्नपि, 'अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रूकुंसकः, अद्यवीणावादनमि'ति स्वच्छन्दैरुच्छृङ्खलाऽऽचरणै-

यस्यासौ द्विपृष्ठः, यस्य पृष्ठद्वयं भवेत् स एव तद्भटेन छलं कुर्यात्, नतु साधारण इति भावः। जपतीव = मन्दं कथयतीव। इवेन न वास्तवो जप

होगा जो शिवा जी से जूझने जायगा, कौन दो पीठ वाला होगा जो उनके सैनिकों के साथ भी छल-छन्द की बात चलायेगा ? सचमुच हम बलवान् हैं, हमारी सेना भी बहुत बड़ी है, फिर भी न मालूम क्यों हृदय काँपता-सा है, क्षुब्ध-सा होता है। 'यवनों की हार होगी, अफ़ज़ल खाँ मारा जायगा' यों न मालूम कौन कान में धीरे से कह-सा रहा है, सामने लिख-सा रहा है, अन्तःकरण में दृढ़ संस्कार डाल-सा रहा है। अरे ऐसा कभी न हो, हे भगवन् रक्षा कीजिए, हे जगदीश्वर बचाइये। अथवा ऐसा होना भी कोई बड़ा असम्भव नहीं है, कारण कि सेनापति पद का मखौल करने वाला यह अफ़ज़ल खाँ यद्यपि मैं 'शिवाजी से लड़ूँगा, उसे मारूँगा अथवा कैद करूँगा' यों बीजापुर के नरेश की सभा में लम्बी डींग हाँक आया है और शिवा जी के पराक्रम को भी अच्छी तरह जानता है, तथापि 'आज नाच है, तो आज गाना है, आज शृंगार प्रधान स्त्री-नृत्य है तो आज मदिरा है, आज वेश्या है तो आज स्त्रीवेष-धारी नर्तक है, तो आज सितार वादन है—इस तरह स्वच्छन्द उच्छृङ्खल असदा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिनानि गमयति। न च यः कदापि विचारयति; यत् 'कदाचित् परिपन्थिभिः प्रेषिता काचन वार-वधूरेव मामासवेन सह विषं पाययेत्, कोऽपि नट एव ताम्बूलेन सह गरलं ग्रासयेत्, कोऽपि गायक एव वा वीणया सह खड्गमानीय खण्डयेदि'त्यादि। ध्रुव एव तस्य विनाशः, ध्रुवमेव पतनम्, ध्रुवमेव च पशुमारैर्मरणम्। तन्न वयं तेन सह जीवन-रत्नं हारयिष्यामः"—इति व्याहरतः; इतरांश्च—"मैवं भोः! श्व एव आहव-क्रीडाऽस्माकं भविष्यति, तत् श्रूयते सन्धि-वार्त्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामपहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति, तावद्वयं श्येना इव शकुनिमण्डले महाराष्ट्र-सेनायां, छिन्धि

इति सूचितम्। **आसवेन**=मद्येन। **जीवनरत्नम्**=श्रेष्ठं जीवनम्। रत्नशब्दः श्रेष्ठवाची। "रत्नं स्वजातिश्रेष्ठेऽपी"त्यमरः। इतरांश्च कर्णान्तिकं मुखमानीयोत्तरयत इति सम्बन्धः। उत्तरं प्रदर्शति **मैवमिति**। **आहवः** = संग्रामः, स एव क्रीडा। **श्येना इव** = वाजपक्षिण इव। **शकुनिमण्डले** = पक्षि-

चरणों से दिन बिता रहा है। इसे कभी यह विचार नहीं होता कि कहीं शत्रुओं द्वारा प्रेषित कोई वेश्या ही मुझे शराब के साथ विष पिला दे, कोई नट ही पान के साथ विष दे दे, कोई गायक ही वीणा के साथ खड्ग लाकर मेरा काम तमाम कर दे' उसका विनाश अवश्यम्भावी है, उसके पतन में कोई सन्देह नहीं है और पशुओं की भाँति मरण भी ध्रुव है। इसलिए हम उसके साथ अपना बहुमूल्य जीवन नहीं गँवाएँगे।"

अन्य लोग कान के पास मुँह ले जाकर उनको यों उत्तर दे रहे थे—"ऐं ऐसा मत कहो, कल ही हम लोगों की युद्ध-क्रीड़ा आरंभ होगी। सुनते हैं सन्धि की बातचीत के बहाने शिवाजी एक ओर बुलाए जायँगे। ज्यों ही वह अपनी सेना छोड़ कर अकेले हमारे स्वामी के साथ वार्तालाप करने के लिए एकान्त स्थान में जायँगे, त्यों ही हम लोग जैसे बाज पक्षियों के झुण्ड पर झपटता है वैसे ही मरहट्टों की सेना पर मारकाट

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भिन्धि—इति कृत्वा युगपदेव पतिष्यामः, वसन्त-वाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः। इतस्तु छलेनास्मत्स्वामिसहचराः शिवं पाशैर्बद्ध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वशंवदं करिष्यन्ति। परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः"—

इति कर्णान्तिकं मुखमानीयोत्तरयतः सांग्रामिकभटानवलोकयन्, "धन्या भवन्तो येषां गोप्यतमा अपि विषया एवं वीथिषु विकीर्यन्ते। महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति" इत्यात्मन्येवाऽऽत्मना कथयन्, स्व-प्रभा-धर्षित-सकल-रक्षक-गणः स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान-पट-कुटीर-द्वारमाससाद। तत्र च प्रहरिणमालोकयदुक्तवांश्च यत् 'पुण्य-नगर-निवासी गायकोऽहमत्रभवन्तं गान-रस-रसायनैरमन्दमा-

---

समूहे। वसन्तवातेन आहतान्, अत एव **नीरसान्** = रसरहितान्, छदानिव = पत्राणीव। उपमा। वशं वदतीति **वशंवदस्तम्**। "प्रियवशे वदः खच्" इति खच्। **आकर्षयन्**=वशीकुर्वन्। वीणाया आव-

---

मचाते हुए एक बारगी टूट पड़ेंगे, एक क्षण में वसन्त (पतझड़) ऋतु की हवा से गिरे सूखे पत्तों की नाईं उसे भगा डालेंगे। इधर छल से हमारे स्वामी के अनुचर शिवाजी को रस्सों से बाँध कर, पिजड़े में बन्द कर जीते जी अपने आयत्त करेंगे। किन्तु यह विषय अति गोपनीय है, किसी के कान में न पड़े।" इस प्रकार कान में मुँह सटा कर उत्तर देते हुए भटों को देख—

"आप लोग धन्य हैं, जिनके अति गोपनीय विषय भी इस प्रकार गलियों में फैलाये जाते हैं, मरहट्ठे भी परले सिरे के धूर्त हैं, इन पर आप लोगों की धूर्तता सफल न होगी" यों मन ही मन कहते हुए अपनी प्रभा से सब पहरेदारों को अप्रतिभ कर अपनी सुन्दरता से सबके मन को अपनी ओर आकृष्ट करते हुए तानरंग तुरन्त ही प्रधान खेमे के दरवाजे पर पहुँच गये। वहाँ पर तैनात पहरेदार को देखा और उससे कहा—"मैं पूने का रहने वाला गायक हूँ, श्रीमान् सेनापति जी को गान रस रूपी रसायनों से आह्लादित करना चाहता हूँ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नन्दयितुमिच्छामी'ति। तदवगत्य स भ्रूसञ्चारेण कश्चित् निवेदकं सूचितवान्। स चान्तः प्रविश्य, क्षणानन्तरं पुनर्वहिर्निर्गत्य गायकमपृच्छद्—'किं नाम भवतः ? पूर्वश्च कदाऽपि समायातो न वा ?' अथ स आह—'तानरङ्गनामाऽहं कदाचन युष्मत्कर्णमस्पृशम्। न पूर्वं कदाऽपि ममात्रोपस्थातुं संयोगोऽभूत्, अद्य भाग्यान्यनुकूलानि चेच्छ्रीमन्तमवलोकयिष्यामि' इति। स च 'आम्' इत्युदीर्य पुनः प्रविश्य क्षणानन्तरं निर्गत्य च, विचित्र-गायकममुं सह निनाय।

तानरङ्गस्तु तेनैव तानपूरिका-हस्तेन बालकेनानुगम्यमानः, शनैः शनैः प्रविश्य, प्रथमं द्वितीयं तृतीयञ्च द्वारमतिक्रम्य, कांश्चित् मृदङ्ग-स्वरान् सन्दधतः; कांश्चिद्वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छ्य, कोणं कलयतः, कांश्चिदविचलोऽयमेतेनैव सह योज्यन्तामपरवाद्या-

---

रणम्=आच्छादनवस्त्रम्। प्रवालम्=वीणादण्डम्। "वीणादण्डः प्रवालः स्यादि" त्यमरः। कोणम्=वादनोपयोगिनमुपकरणविशेषम्। "मिजराफ"

उनका भाव समझ कर उसने भौंहों के सहारे से एक सन्देशवाहक को सूचित किया। उसने भीतर जाकर क्षण भर में फिर बाहर आकर गायक से पूछा 'आपका क्या नाम है ? पहले भी कभी आए हैं या नहीं ?' उन्होंने कहा 'मेरा नाम तानरंग है, शायद कभी नाम आपके कानों में पड़ा हो। मुझे पहले कभी यहाँ उपस्थित होने का अवसर नहीं मिला, आज यदि भाग्य ने साथ दिया तो श्रीमान् के दर्शन करूँगा।' वह 'अच्छा' कह कर भीतर गया। और क्षण भर में बाहर निकल कर इस विलक्षण गायक को साथ ले गया।

तानरङ्ग ने, जिनके पीछे तानपूरा हाथ में लिये वही बालक चल रहा था, धीरे धीरे प्रविष्ट होकर पहली, दूसरी और तीसरी ड्योढ़ी पार कर देखा कि कोई मृदङ्ग के स्वर साध रहे हैं तो कोई सितार का गिलाफ उतार कर और उसके दण्ड को पोंछ कर मिजराफ पहन रहे हैं, कोई यह अविचल स्वर है, इसी के साथ अन्य बाजों का मिलान करो यों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नीति वंशीरवं साक्षीकुर्वतः; कांश्चित् कलित-नेपथ्यान्, पादयोर्नूपुरं वध्नतः; कांश्चित् स्कन्धावलम्बिगुटिकातः करतालिकामुत्तोलयतः, कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामाकुञ्च्य, पातितोभयजानु उपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्वकाकलीं मेलयतः; सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः कैश्चित् ताम्बूल-वाहकैः, अपरैर्निष्ठ्यूतादान-भाजन-हस्तैः, अन्यैरनवरत-चलित-चामरैः, इतरैर्बद्धाञ्जलिभिर्लालाटिकैः परिवृतम्, रत्नजटितोष्णीषिका-मस्तकम्, सुवर्णसूत्र-रचित-विविध-कुसुम-कुड्मल-

इति हिन्दी। **साक्षीकुर्वतः** = साक्षाद्दर्शितां नयतः। इतरवाद्यसत्यतायै प्रमाणतां प्रापयत इति यावत्। **करतालिकाम्** = "करताल" इति हिन्दी। **काकलीम्**=सूक्ष्मं कलम्। 'ईषदर्थे चेति'कोः कादेशः, गौरादित्वात् ङीष्। "काकली तु कले सूक्ष्म" इत्यमरः। **निष्ठ्यूतादानम्** = पतद्ग्रहः। "पीकदान" इति हिन्दी। **लालाटिकैः** = अधिपतिभालमात्रावलोकनक्षमैर्न तु कार्यसम्पादकैः। "लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः" इत्यमरः। **सुवर्णसूत्रेण** = सूक्ष्मतमसुवर्णतन्तुना, "कलाबत्तू" इति हिन्दी, रचिता या **विविधाः**=अनेकप्रकाराः, **कुसुमकुड्मललताः** = पुष्पकलिकावल्ल्यः, तासां **प्रतानैः** = विततनैः, **अङ्कितः** = अञ्चितः,

मुरली-ध्वनि को सब बाजे ठीक बज रहे हैं या नहीं, इस विषय में प्रमाण बना रहे, तो कोई वेषभूषा से सुसज्जित हो पैरों पर पायजेब पहन रहे हैं, कोई कन्धे पर लटक रही झोली से करताल निकाल रहे हैं, तो कोई कान पर दाहिना हाथ रख, आँखें मीच, नाक सिकोड़, दोनों घुटनों के बल जमीन पर बैठकर, बाँए हाथ को फैला कर वीणा के स्वर के साथ अपने सूक्ष्म कलगान का मिलान कर रहे हैं और सामने अफ़ज़ल ख़ाँ को देखा, वह पीछे और अगल-बगल बैठे हुए लोगों से, जिनमें कोई पानदान लिए थे, कोई पीकदान पकड़े थे, कोई निरन्तर चँवर डुला रहे थे और कुछ चापलूसी में ही पारंगत हाथ जोड़े मुँह ताक रहे थे, परिवृत था। उसके सिर पर रत्नजटित टोपी थी, बदन पर सोने के तारों से काढ़े विचित्र फूल, बेल-बूटों वाला चपकन था, एक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लता-प्रतानाङ्कित-कञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरि सन्धारित-भुजद्वयम्, रजत-पर्य्यङ्के विविध-फेन-फेनिल-क्षीरधि-धवल-तल-च्छविमङ्गीकुर्वत्यां तूलिकायामुपविष्टमपजलखानं च ददर्श।

ततस्तु तानरङ्ग-प्रभा-वशीभूतेषु सर्वेषु 'आगम्यतामागम्यता-मास्यतामास्यताम्' इति कथयत्सु, तानरङ्गोऽपि सादरं दक्षिण-हस्तेनाऽऽदरसूचक-सङ्केत-सहकारेण यथानिर्दिष्टस्थानमलञ्चकार।

ततस्तु इतरगायकेषु सगर्वं सासूयं सक्षोभं साक्षेपं सचक्षुर्वि-स्फारणं सशिरःपरिवर्तनं च तमालोकयत्सु अपजलखानेन सह तस्यैवमभूदालापः।

कञ्चुकः=निचोलो यस्य तम्। **महोपबर्हम्** = महोपधानम्। "मसनन्द" इति हिन्दी। **विविधफेनेन** = प्रचुरडिण्डीरेण, **फेनिलस्य**=फेनसंवलितस्य, **क्षीरधेः** = वारिधेः, जलतलस्य **छविम्** = शोभाम्, **अङ्गीकुर्वत्याम्** = धारयन्त्याम्। तूलमस्ति यस्यां सा तूला=तूलवती, तूलैव **तूलिका**=तूलमयो विष्टरः, तस्याम्। "रूई की गद्दी, तोसक" इति हिन्दी। कूर्चीपर्यायत्वमनुचि-न्तयन्तस्तु चिन्तनीयबुद्धय एवेति शम्।

आदरसूचकसंकेतः="सलाम" इति हिन्दी।

विशाल मसनद को गोद में रखकर उसके ऊपर दोनों बाहुओं का भार, देकर चाँदी के पलंग के ऊपर प्रचुर फेन से फेनिल समुद्र की सतह की शोभा को मात कर रहे तोषक पर वह बैठा था।

तानरंग की चमक-दमक से सबके मन्त्रमुग्ध-से हो "आइये, आइये, बैठिये-बैठिये" कहने पर तानरंग ने आदरपूर्वक दाहिने हाथ से सत्कार करते (सलाम करते) हुए निर्दिष्ट आसन अलंकृत किया।

अन्य गायकों के गर्व, ईर्ष्या झुंझलाहट, निंदा के साथ आँखे फाड़ कर और सिर हिलाकर तानरंग को देखने पर अफ़ज़ल खाँ के साथ उनका इस तरह वार्तालाप हुआ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपजलखानः—किन्देशवास्तव्यो भवान् ?

तानरङ्गः—श्रीमन् ! राजपुत्रदेशीयोऽहमस्मि।

अपजल०—ओः ! राजपुत्रदेशीयः ?

तान०—आम् ! श्रीमन् !

अप०—तत् कथमत्र महाराष्ट्र-देशे ?

तान०—सेनापते ! मम देशाटन-व्यसनं मां देशाद्देशं पर्याटयति।

अप०—आ ! एवम् ! तत्किं प्रायः पर्य्यटति भवान् ?

तान०—एवं चमूपते !, नव्यान् नव्यान् देशानवलोकयितुम्, नवा नवा भाषा अवगन्तुम्, नूतना नूतना गान-परिपाटीश्च कलयितुम् एधमान-महाभिलाष एष जनः।

वास्तव्यः = निवासी। "वसेस्तव्यत् कर्त्तरि णिच्चे"ति तव्यत्। पर्याटयति = सर्वतो भ्रामयति। एधमानः = वृद्धिं गच्छन्, अभि·

अफ़जल खाँ—आप किस देश के निवासी हैं ?

तानरंग—श्रीमन्, मैं राजपूताने का हूँ।

अफ़जल खाँ—ओह, आप राजपूताने के हैं ?

तानरंग—जी हाँ।

अफ़जल०—यहाँ महाराष्ट्र देश में कैसे आना हुआ ?

तानरंग—सेनापति जी, मुझे देशाटन का शौक है, मैं देश-देशान्तर में पर्यटन करता रहता हूँ।

अफ़जल०—अच्छा, यह बात है, तो क्या आप अक्सर घूमते रहते हैं ?

तानरंग—जी सेनापति जी, नूतन नूतन देश देखने, नवीन नवीन भाषाएँ जानने और अभिनव अभिनव गायन-शैलियों का अनुशीलन करने का मुझे बड़ा शौक है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अप०—अहो ! ततस्तु बहुदर्शी बहुज्ञश्च भवान्। अथ वङ्गदेशे गतो भवान् ? श्रूयतेऽतिवैलक्षण्यं तद्देशस्य।

तान०—सेनापते ! वर्षत्रयात्पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनी-देशीय-क्षत्रिय-कुलालङ्कृतं भोजपुर-देशमालोक्य, गङ्गा-गण्डक-तटोपविष्टं हरिहरनाथं प्रणम्य, विलासि-कुल-विलसितं पाटलिपुत्र-पुरमुल्लङ्घ्य, सीताकुण्ड-विक्रम-चण्डिकादि-पीठ पटल-पूजितं विक्रम-यश सूचक-दुर्गावशेष-शोभितं देवधुनी तरङ्ग-क्षालित-प्रान्तं मुद्गलपुरं निरीक्ष्य, कर्ण-दुर्ग-स्थानेन तद्यशोमहामुद्रये-वाङ्कितमङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमानवैभवं वर्द्धमान नगरं च सम्यक् समालोक्य, यथोचित-सम्भारैस्तारकेश्वरमुपस्थाय,

लाषः=इच्छा, यस्य सः। **उज्जयिनीदेशीयक्षत्रियकुलालंकृतम्**, अत एव भोजपुरमिति तन्नाम। भोजो हि बभूवोज्जयिन्या नातिदूरे धारानगरे। **देवधुन्याः**=जह्नुतनयायाः, तरङ्गैः, क्षालितः, प्रान्तो यस्य तत्। **मुद्गलपुरम्**='मुङ्गेर' इति ख्यातम्। **वर्द्धमाननगरम्** = अद्यत्वे "बर्दवान" इति ख्यातम्। **अटाट्याम्**=पर्यटनम्।

अफ़ज़ल खाँ—ओह ! तब तो आप बहुदर्शी और बहुश्रुत हैं। क्या आप बंगाल गये हैं ? सुनते हैं वह देश बड़ा अद्भुत है।

तानरंग—सेनापति जी, तीन वर्ष पूर्व काशी में गङ्गास्नान कर, उज्जैन देशी क्षत्रियों के वंश से विभूषित भोजपुर देश का अवलोकन कर, गङ्गा और गण्डकी के तट पर विराजमान हरिहरनाथ को प्रणाम कर, विलासी लोगों से सुशोभित पटना शहर को पार कर, सीताकुण्ड, विक्रमचण्डिका आदि पीठों से सुपूजित, विक्रमादित्य की कीर्ति के परिचायक किले के भग्नावशेषों से सुशोभित, गङ्गाजी की लहरों से प्रक्षालितप्रान्त मुंगेर का निरीक्षण कर, कर्ण-दुर्ग स्थानरूपी कर्णकीर्ति महामुद्रा से अङ्कित-से अङ्ग देश में तीन दिन निवास कर विपुल वैभवशाली बर्दवान नगर भली भाँति अवलोकन कर तथा समुचित (यथायोग्य) सामग्रियोंसे तारकेश्वर की आराधना कर उससे भी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततोऽपि पूर्वं वङ्गदेशे, पूर्ववङ्गेऽपि च चिरमहमटाट्यामकार्षम् ।

अप०—किं किं किं पूर्ववङ्गेऽपि ?

तान०—आम् श्रीमन् ! पूर्ववङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्त-प्ररूढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयः-पूर-प्रवाह-परम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रु-सेना-नाशन-कुशलः ब्रह्म-देशं विभजन् ब्रह्मपुत्रो नाम नदो भू-भागं क्षालयति, यत्र साम्ल-सुमधुर रस-पूरितानि फूत्कारोद्धूत-भूति-ज्वलदङ्गार-विजित्वर-वर्णानि जगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति,

अवालुलोकत्=अवलोकयाञ्चकार । **प्रान्तयोः**=तटोपान्तयोः, **प्ररूढाम्**=समुद्भूताम् । **पद्मावलीम्**= कमलश्रेणीम् । सरिति कमलानि विकसन्तीति कविसमयख्यातिः । **पद्मेव** = श्रीरिव । **द्रवीभूता**=प्रस्नुता । **पद्मा** = तन्नाम्नी नदी । **ब्रह्मपुत्रः**=गरलविशेषः । "ब्रह्मपुत्रः प्रदीपन" इत्यमरः । **ब्रह्मदेशम्**="बर्मा" इति ख्यातदेशम् । **साम्ल-सुमधुरः** = 'खट-मीठ' इति भाषा । **फूत्कारेण** = मुखवायुना, **उद्धूता** = उड्डायिता, **भूतिः** = भस्म, येषां तादृशा ये **ज्वलदङ्गाराः**=प्रकाशमानाङ्गाराः, तेषां **विजित्वराः**= जयनशीलाः, वर्णा येषां तानि । **नारङ्गाणि** = नागरङ्गाणि । "नारङ्ग" इति

पूर्ववर्ती बंगाल में और पूर्वी बंगाल में भी मैंने चिरकाल तक पर्यटन किया है ।

अफ़ज़ल खाँ—क्या क्या-क्या कहा ? क्या पूर्वी बंगाल में भी आपने पर्यटन किया है ।

तान०—जी, श्रीमन्, इस जन ने पूर्वी बंगाल को भी खूब अच्छी तरह देखा है । जहाँ किनारों पर उगी हुई कमल पंक्ति को जलराशि के वेग से मसलती हुई जलरूप में परिणत हुई पद्मा-सी (कमला-सी) पद्मा नदी बहती है, जहाँ ब्रह्मपुत्र (एक तरह के विष) के तुल्य शत्रुओं की सेना के विनाश में दक्ष ब्रह्मपुत्र नाम का महानदी भारतवर्ष से ब्रह्मदेश (बर्मा) को पृथक् करता हुआ भूमिभाग को सींचता है, जहाँ जरा जरा खटास लिये मीठे रस से भरी हुई, धधकते हुए अंगारों के—फूँक मार कर जिनकी राख उड़ा दी गई हो—रंग को मात करने वाली जगद्विख्यात नारङ्गियाँ पैदा होती हैं, जहाँ के नीबू, आम, ताड़, नारि-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणां च महिमा सर्वदेश-रसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्करा-ऽऽवर्त-सहस्राऽऽकुलासु स्रोतस्वतीषु सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, वडिशं योजयन्तः, कुवेणीस्थ–म्रियमाण-मत्स्य-परीवर्त्तानालोकमालोकमानन्दन्तः, अदृष्टतटेष्वपि महा-प्रवाहेषु स्वल्पया कूष्माण्ड-फक्किकाकारया नौकया भिन्नाञ्जन–लिप्ता इव मसी–स्नाता इव साकारा अन्धकारा इव काला धीवर–बाला निर्भयाः क्रीडन्ति ।

हिन्दी । **भयङ्करैः** = भीतिजनकैः, **आवर्त्तसहस्रैः** = बहुसंख्याम्भसां भ्रमैः, "स्यादवर्त्तोऽम्भसां भ्रम" इत्यमरः, आकुलासु । **स्रोतस्वतीषु** = नदीषु । **सहोहोकारम्**=नौकादण्डप्रक्षेपावसरे तद्देशीयाः "हो हो" शब्दं कुर्वन्ति । **क्षेपणी** = नौकादण्डः । "नौकादण्डः क्षेपणी स्यादि" त्यमरः । "डांड़ा" इति हिन्दी । **अरित्रम्** "अरित्रं केनिपातकः" इत्यमरः । "पतवार" इति हिन्दी । **वडिशम्**, "वडिशं मत्स्यभेदनमि" त्यमरः । **कुवेण्याम्** = मत्स्याधान्यां तिष्ठन्ति ये ते कुवेणीस्थाः, **म्रियमाणाः** = आसन्नमरणाः, मत्स्यास्तेषां **परीवर्त्तान्** = पार्श्वपरिवर्तितानि ! **आलोकमालोकम्** = समवलोक्येत्यर्थः । **फक्किका** = "फाँक, फाँकी" इति हिन्दी । धीवरबालानां कालत्वमुत्प्रेक्षते-भिन्नाञ्जनलिप्ता इव, मसीस्नाता इव, साकारा अन्धाकरा इवेति ।

यल और खजूरों की महिमा बार बार सभी देशों के रसिकों के कानों में पड़ती है, जहाँ पीसे हुए अंजन से लिपे-पुते-से, स्याही में डूबे से, मूर्तिमान् अन्धकार ऐसे काले धीवर बालक (मल्लाहों के लड़के) भयङ्कर हजारों भँवरों से भरी नदियों में 'हो हो' ध्वनि के साथ डांड़े खेते, पतवार चलाते, बंसी डालते, जाल में फंसी मर रहीं मछलियों का छटपटाना देखकर फूले न समाते हुए कुम्हड़े की फाँक के आकार की छोटी नाव से अथाह महाप्रवाहों में निर्भय खेलते हैं ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अप०—[स्वयं हसन्, सर्वांश्च हसतः पश्यन्] सत्यं सत्यम् !! धन्यो भवान्, योऽल्पेनैव वयसैवं विदेश-भ्रमणैः चातुरीं कलयति।

तान०—धन्य एव यदि युष्मादृशैरभिनन्द्ये !

अप०—[क्षणानन्तरम्] अथ भवान् मूर्छना-प्रधानं गायति, तान-प्रधानं वा ?

तान०—ईदृक्षं तादृक्षञ्च।

अभिनन्द्ये, कर्मणि उत्तमपुरुषे। मूर्छनाप्रधानमिति, अविच्छेदं स्वरात्स्वरान्तरप्राप्तिर्मूर्छना, सविच्छेदं स्वरात्स्वरान्तरप्राप्तिस्तानः। "स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुरि"ति वायुसम्पर्केण मूर्छना कथमिवोद्भाव्यत इति माघ एव जानातु, परिसमाप्नोतु वा वीणावैलक्षण्यं सर्वमिति मूलकृच्छिष्यकृतटिप्पणी। महत्यास्तत्तत्स्वरानुगासु तन्त्रीषु क्रमिकेण पवनाघट्टनेन निर्दिष्टमूर्छनाया अव्याघातान्माघाक्षेपो निरर्थक इति दार्शनिकसार्वभौमा गोस्वामिदामोदरशास्त्रिचरणाः। "आरोहावरोहक्रमयुक्तः स्वरसमुदायो मूर्छनेत्युच्यते, तानस्त्वारोहक्रमेण भवती"ति मतङ्गः।

भवति चात्र सङ्गीतशास्त्रपद्यम्—

"आरोहेणावरोहेण क्रमेण स्वरसप्तकम्।
मूर्छनाशब्दवाच्यं हि विज्ञेयं तद्विचक्षणैः॥"

अफ़जल खाँ—(स्वयं हँसते और हँस रहे औरों पर दृष्टि डालते) सचमुच आप धन्य हैं, थोड़ी ही अवस्था में इस तरह विदेश-भ्रमण द्वारा चातुरी प्राप्त कर चुके हैं।

तान०—यदि आप ऐसे मेरी सराहना करें तो सचमुच मैं धन्य हूँ।

अफ़जल खाँ—(क्षण भर रुक कर) आप मूर्च्छनाप्रधान गाना गाते हैं या तानप्रधान ?

तान०—मूर्च्छनाप्रधान भी और तानप्रधान भी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अप०—[क्षणानन्तरम्] अस्तु, आलप्यतां कश्चन रागः ।

तान०—[किञ्चिद् विचार्य] आज्ञा चेदेकां राग-माला-गीतिं गायामि, यत्र प्रत्याभोगं नवीन एव रागो भवेदेकेनैव च ध्रुवेण सङ्गच्छेत, तत्तद्राग-नामानि च तत्रैव प्राप्येरन् ।

अप०—आः ! किमेवम् ? ईदृशं तु गानं न प्रायः श्रूयते, तद् गीयताम् ।

आलप्यताम् = आलापः क्रियताम् । विशकलय्य रागोदीरणमालापः । **रागः**=रञ्जकस्वरसंदर्भः ।

"योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥"

रागमालाम् = तन्नाम्नीम्, गीतिम् । प्रत्यालापं विभिन्नीभवद्भी रागैर्मालारूपैः सहितत्वात् । तदाह-**यत्रेति** । **प्रत्याभोगम्** = प्रतिगेयखण्डम्, उच्चारणविषयाणां शब्दानां शरीरत्वमाश्रित्य तथोक्तम् ।

ध्रुवेण = स्थिरपदेन । सकलपादान्ते वारं वारं समुच्चार्यमाणत्वेन ध्रुवत्वम्, अत एव तथा संज्ञा **सङ्गच्छेत**, "समो गम्यृच्छिभ्याम्" इत्यात्मनेपदम् । **स्वरान्**=निषादप्रभृतीन् ।

"निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥" इत्यमरः ।

अफ़जल०—अच्छा, कोई राग अलापिये ।

तान०—(कुछ सोच कर) यदि आज्ञा हो तो एक राग-माला नामक गीत सुनाऊँ, जिसमें गान के प्रत्येक भाग में नया ही राग रहेगा, एक ही ध्रुव (स्थायी) से सबका मेल होगा, उन सभी रागों के नाम भी उसी में मिलेंगे ।

अफ़जल०—अच्छा ! क्या ऐसा है ? ऐसा गाना तो प्रायः नहीं सुनाई देता, अच्छा तो गाइए ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततस्तानपूरिकायाः स्वरान् संमेल्य पातित-वाम-जानुः तान-पूरिका-तुम्बं क्रोडे निधाय दक्षपादस्योत्थितजानुनि च दक्ष हस्त-कूर्पर-स्थापन-पुरःसरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रण-यन् स्वकण्ठेनापि त्रीन् ग्रामान् सप्त स्वरांश्च समधात्। तन्मात्र-श्रवणेनैव मुग्धेष्विवाखिलेषु इमां राग-माला-गीतिमगायत्—

सखि हे नन्द-तनय आगच्छति। सखि० ॥
मन्दं मन्दं मुरली-रणनैः समधिक-सुखं प्रयच्छति ॥

पातितं वामजानु येन सः। गायकानामवस्थानरीतिः। **दक्षहस्तस्य** = वामेतरकरस्य यः **कूर्परः**=कफोणिः, "स्यात्कफोणिस्तु कूर्पर" इत्यमरः, भुज-मध्यग्रन्थिरिति यावत्, तत्स्थापनपुरस्सरम्। **त्रीन् ग्रामान्** = षड्जमध्यम-गान्धारान्। तथा चोक्तम्—

"यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥
षड्जग्रामो भवेदादौ मध्यमग्राम एव च।
गान्धारग्राम इत्येतद् ग्रामत्रयमुदाहृतम् ॥"

समधात् = समयोजयत्। **सखि !** = आलि ! **मुरलीरणनैः** = वंशीस्वनैः। **समधिकम्** = ब्रह्मानन्दलक्षणम्। कीदृशोऽसौ नन्दसुतस्त-

---

तदनन्तर तानपूरे के स्वरों को मिला कर, बाँया घुटना जमीन पर टेक कर, तानपूरे की तुम्बी गोद में रख कर, दाहिने पैर के उठे घुटने पर दाहिने हाथ की कोहनी रखकर, उसी हाथ की तर्जनी उँगली से तानपूरे को बजाते हुए तानरंग ने अपने कण्ठ से भी तीन ग्रामों (षड्ज, मध्यम और गांधार) और सात स्वरों (निषाद आदि) को अलापा। केवल उसी के श्रवण से सबके मुग्ध होने पर यह रागमाला नाम का गाना गाया।

हे सखि, नन्दनन्दन आ रहे हैं। मुरली की मन्दमन्द सुमधुर ध्वनि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भैरव—रूपः पापिजनानां सतां सुख-करो देवः।
कलित-ललित-मालती-मालिकः सुरवर-वाञ्छित-सेवः॥
सारङ्गैः सारङ्ग-सुन्दरो दृग्भिर्निपीयमानः।
चपला-चपल-चमत्कृति-वसनो विहित-मनोहर-गानः॥
श्रीवत्सेन लाञ्छितो हृदये श्रीलः श्रीदः श्रीशः।
सर्वश्रीभिर्युतः श्रीपतिः श्री-मोहनो गवीशः॥

आऽऽह-**पापिजनानाम्** = अधिनराणम्। **भैरवरूपः** = भयङ्करः। तमः-प्रकृतीनां राक्षसायमानानामपजलखानप्रभृतीनामपि पापित्वात्तेषामपि भैरव एवेति ध्वनिः। **सताम्** = सत्त्ववतां सज्जनानाम्, शिवादीनाम्। कलिता ललिता मालतीमालिका येन सः। **सुरवरैः**=इन्द्रादिभिः, वाञ्छिता सेवा यस्य सः। **सारङ्ग इव सुन्दरः**। "सारङ्गोमृगपक्षिणोः"। **सारङ्गैः, दृग्भिः**=नयनैः। **निपीयमानः** = सलालसं वीक्ष्यमाणः, **चपलेव** = विद्युदिव, चपला चमत्कृतिर्यस्य **तादृशम्** = चञ्चलचाकचक्यम्, वसन यस्य सः। **विहितं मनोहरम्** = श्रोतृचित्ताकर्षकम्, **गानम्** = गीतिर्येन सः। **श्रीवत्सेन** = भृगुपदेन। **लाञ्छितः**=चिह्नितः। **श्रीलः**=श्रीमान्, "श्रीलः श्रीमान् स्निग्धस्तु वत्सल" इत्यमरः। श्रियं=धनं ददातीति **श्रीदः**। **श्रियाः** = लक्ष्म्या **ईशः**। **सर्वश्रीभिः**=सर्वाभिः शोभाभिः। **गवाम्**=वाणीनाम्, **ईशः** =

से खूब आनन्द दे रहे हैं। वे देव पापियों के लिए भयङ्कर रूप हैं, सन्तों को सुख देने वाले हैं, उन्होंने सुन्दर मालती-माला पहनी है, इन्द्र आदि श्रेष्ठ देवता भी उनकी सेवा के लिये लालायित रहते हैं, वे कामदेव के समान सुन्दर हैं, मृग अपने नयनों से आदरपूर्वक उनका दर्शन कर रहे हैं, उनके वस्त्र बिजली की-सी चञ्चल चमचमाहट वाले हैं, वे चित्त को आकृष्ट करने वाला गाना गा रहे हैं, उनका हृदय श्रीवत्स नाम के चिह्न से सुशोभित है, वे लक्ष्मी को अपनानेवाले, सम्पत्ति देनेवाले, लक्ष्मी के स्वामी, सम्पूर्ण शोभाओं से सम्पन्न, श्रीपति, श्री को मोहित करनेवाले और वेदवाणी के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौरी—पतिना सदा भावितो वर्हिण-वर्ह-किरीटः।
कनककशिपु-कदनो वलि-मथनो विहत-दशानन-कीटः॥

अथ एतावदेव श्रुत्वा अतितरां प्रसन्नेषु पारिषदेषु, ससाधुवादं

प्रादुर्भावकः, वेदाविष्कारकर्त्तेति यावत्। **गवाम्** = इन्द्रियाणाम्, ईशः, इन्द्रियजिदिति वा। **गवाम्** = वृन्दावनपशूनां, स्वामी वा। **गौर्याः** = हिमतनयायाः, **पत्या** = भगवता शिवेन। भावितः = ध्यातः। **बर्हिणबर्हकिरीटः** = मयूरपिच्छमुकुटः। **कनककशिपुकदनः** = हिरण्यकशिपुसंहारकः, वराहः, **वलिमथनः** = बलिध्वंसी, वामनः। **विहतः** = नाशितः, दशानन एव **कीटः** = क्षुद्रजन्तुः, येन सः, श्रीरामः। अत्र भैरव-ललित-सारङ्ग-श्री-गौरी-नामानि रागाणाम्। तत्र **भैरवः** प्रथमः प्रातःकालिकश्च। सप्त स्वरा अपेक्ष्यन्त इत्ययं सम्पूर्ण इत्युच्यते। ऋषभ-मध्यम-धैवता निम्नका लगन्ति, गांधार-निषादौ चोच्चकौ। गांधार-मध्यमपञ्चमा अत्र प्रधानानि। **ललिते** ऋषभधैवतौ निम्नकौ गान्धारनिषादौ चोच्चकौ। अत्र पञ्चमो नापेक्ष्यत इति वैशिष्ट्यम्। **सारङ्गे** मध्यमनिषादौ निम्नकौ ऋषभधैवतौ चोच्चकौ। गान्धारोऽत्र नितरां वर्जितः। धैवतोऽपि केवलमवरोहेऽपेक्षितः। **श्रीरागोऽपि** सम्पूर्णः। ऋषभधैवतौ निम्नकौ, गान्धारनिषादावुच्चकौ, मध्यमश्चोभयथा लगति। निम्नमध्यमयोजनं चातुर्यकृत्यम्। यद्यप्यत्राऽऽरोहे गान्धारधैवतौ वर्जितौ, तथापि विज्ञाः संलगयन्त्येव क्वचित्। **गौरी** सम्पूर्णा रागिणी, ऋषभधैवतौ निम्नकौ गान्धारमध्यमनिषादाश्चोच्चकाः। आरोहेऽत्र नियमेन चर्षभं त्यजन्ति, कदाचिच्च पञ्चमं धैवतञ्चेत्यादिकं बहुतरमूहनीयम्। संगीतशास्त्रविदां मोदाय तु कियन्मात्रमत्र संगृहीतम्।

पारिषदेषु, परिषदि=सभायां साधवः पारिषदास्तेषु। "परिषदो ण्य"

आविष्कर्ता हैं। श्रीशङ्कर जी सदा उनका ध्यान करते हैं, वे मोरमुकुटधारी हिरण्यकशिपु का नाश करनेवाले, बलि का विध्वंस करनेवाले और रावण रूपी कीड़े के विनाशक हैं।

इतना ही सुन कर सब सभासद मारे प्रसन्नता के लट्टू हो गये और

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वितीर्णकङ्कणे च अपजलखाने, तानरङ्गोऽपि सप्रसादं तानपूरिकां भूमौ संस्थाप्य अपजलखानस्य गुणग्राहितां प्रशशंस।

अथ अपजलखानः क्रमशो मैरेय-मद-परवशतां वहन् उवाच—यत् कथ्यतामस्मिन् प्रान्ते भवादृशानां गुण-ग्राहकाः के सन्ति? के वा कवितायाः संगीतस्य च मर्मावगच्छन्ति?

ततस्तानरङ्गोऽचकथत्—को नामापरः शिववीरात्? स एव राजनीतौ निष्णातः, स एव सैन्धवाऽऽरोह-विद्या-सिन्धुः, स एव चन्द्रहास-चालने चतुरः, स एव मल्ल-विद्या-मर्मज्ञः, स एव पण्डित-मण्डल-मण्डनः, स एव बाण-विद्या-वारिधिः, स एव धैर्यधारि-धौरेयः, स एव वीर-वार-वरः, स एव पुरुष-पौरुष-परीक्षकः, स

इत्यत्र योगविभागाद् णोऽपि। **गुणग्राहिताम्** = गुणज्ञताम्।

मैरेयम्=मद्यम्, तस्य यो मदः, **तत्परवशताम्**= तदधीनताम्। **शिववीरा**दित्यत्रापरशब्दयोगे "अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति पञ्चमी। **सैन्धवारोहविद्यायाः** = अश्वारोहणकलायाः, **सिन्धुः** = सागर इति रूपणम्। **वीरवारवरः**, वीराणां **वारः** = समूहः, तत्र **वरः**=

अफ़ज़ल खाँ ने तानरंग को शाबाशी के साथ सोने का कड़ा दिया, तानरंग ने भी प्रसन्नता के साथ तानपूरे को जमीन पर रखकर अफ़ज़ल खाँ की गुण-ग्राहकता की प्रशंसा की।

उसके बाद अफ़ज़ल खाँ क्रमशः मदिरा के नशे में चूर होता हुआ बोला—कहिये, इस प्रान्त में आपके सरीखे गुणी लोगों के गुण-ग्राहक कौन हैं? अथवा कौन कविता या संगीत का रहस्य जानते हैं?

तानरंग ने कहा—वीर शिवाजी के बिना और कौन है? वही राज-नीति में निष्णात हैं, वही अश्वारोहण-विद्या के सागर हैं, वही तलवार चलाने में दक्ष हैं, वही मल्लविद्या के मर्मज्ञ हैं, वही पण्डितमण्डली का भूषण हैं, वही बाणविद्या के समुद्र हैं, वही धीरों के अग्रगण्य हैं, वही वीरों के समुदाय में सर्वश्रेष्ठ हैं, वही पुरुषों के पौरुष की परीक्षा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एव दीन-दुःख-दाव-दहनः, स एव स्वधर्म रक्षण-सक्षणः, स एव विलक्षण-विचक्षणः, स एव च मादृश-गुणि-गण-गुण-ग्रहणाऽऽग्रही वर्तते।

अथ अपजलखाने "तत् किं शिव एव एवं गुण-गण-विशिष्टोऽस्ति? एवं वा वीरवरोऽस्ति?" इति सचकितं सभयं सतर्कं सरोमोद्गमं च कथयति, किञ्चिद् विचार्यैव नीति-कौशल-पुरःसरं गौरः पुनरवादीत्

भगवन्! सामान्य-राजभृत्यस्य पुत्रः शिववीरो यदि नाम नाभविष्यत्स्वयमीदृश ऊर्जस्वलः, तत्कथं स्वर्णदेव-सदृशं सहचरं प्राप्स्यत्? तद्द्वारा समस्तं कल्याण-प्रदेशं कल्याण-दुर्गं च स्वहस्तगतमकरिष्यत्? कथं तोरण-दुर्ग-भोग-भाजनतामकलयिष्यत्? कथं तोरण-दुर्गाद् दक्षिण-पूर्वस्यां पर्वतस्य शिखरे महेन्द्रमन्दिर-

---

श्रेष्ठः। दीनानाम्=अनाथानाम्, दुःखदावस्य=क्लेशविपिनस्य, दहनः=अग्नितुल्यः। स्वधर्मरक्षणे सक्षणः=सोत्साहः। हर्षवाची क्षणशब्दः। विलक्षणविचक्षणः=विशिष्टविद्वान्। गुणिनां गणस्य गुणग्रहणे, आग्रही। अनुप्रास एषु।

ऊर्जस्वलः=बलशाली। दक्षिणपूर्वस्याम् = दक्षिणस्याः पूर्वस्याश्च

लेनेवाले हैं, वही दीन-दुखियों के दुःखरूपी बन के लिए वनाग्निरूप हैं, वही स्वधर्म की रक्षा में उत्साह रखते हैं और वही मेरे ऐसे गुणियों के गुण के कदरदान हैं।

तदुपरान्त अफ़जल खाँ के "क्या यह शिव इस प्रकार के गुणगणों से मण्डित है और इस तरह के वीर शिरोमणि है?" यों आश्चर्य, भय, व्यङ्ग्य और रोमाञ्च के साथ कहने पर कुछ सोच कर-सा गौरसिंह ने नीतिज्ञता-पुरस्सर फिर कहा—

"भगवन्! राजा के एक साधारण कर्मचारी के बेटे वीर शिवाजी यदि स्वयं ऐसे प्रतापवान् न होते तो स्वर्णदेव सरीखा साथी कैसे पाते? उसके द्वारा सारे कल्याण प्रदेश और कल्याण दुर्ग को कैसे अपने हस्तगत करते? और तोरण दुर्ग को अपना भोग्य कैसे बनाते? कैसे तोरण दुर्ग से दक्षिण पूर्व की ओर पर्वत के शिखर पर देवेन्द्र-प्रासाद के एक अंश

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

खण्डमिव धर्षितारि-वर्ग्गं डमरु-हुडुक्कार-तोषित-भर्गं रायगढना-मकं महादुर्ग्गं व्यरचयिष्यत् ? कथं वा तपनीयभित्तिका-जटित-महारत्न-किरणावली-वितन्यमान-महावितान-वितति - विरोचित - प्रताप-तापित-परिपन्थि-निवहं चन्द्रचुम्बन-चतुरचारु-शिखर-निकरं भुशुण्डिका-किणाङ्कित-प्रचण्ड-भुजदण्ड-रक्षककुल-विधीयमान-पर-

दिशोर्यदन्तरालं सा दक्षिणपूर्वा, तस्याम् । **महेन्द्रमन्दिरस्य** = देवेन्द्रस-दनस्य, **खण्डमिव** = अंशमिव । **धर्षितः** = भयं प्रापितः, अरिवर्गो येन तम् । उपमयाऽरिवर्गाजेयत्वं व्यनक्ति । **डमरुहुडुक्कारेण,** तोषितः, **भर्गः**= शिवो यस्मिंस्तम् । कथं वा प्रतापदुर्गं निरमापयिष्यदिति सम्बन्धः । प्रतापदुर्गं विशिनष्टि—**तपनीयस्य** = हिरण्मयस्य, **भित्तिकासु** = कुड्येषु, **जटिता-नाम्** = खचितानाम्, **महारत्नानाम्** = हीरकादीनाम्, **किरणाव-लीभिः**=मयूखसमूहैः, **वितन्यमानस्य**=विस्तार्यमाणस्य, **महावितानस्य**= महोल्लोचस्य, **वितत्या** = विस्तारेण, **विरोचितेन**=शोभितेन, **प्रतापेन** = तेजसा, **तापितः** = ज्वलितः, **परिपन्थिनिवहः** = शत्रुसमूहो येन तम् । शिवराजविभूतिवर्णनादुदात्तालङ्कारः । **चन्द्रचुम्बने** = इन्दुस्पर्शे, **चतुरः** = समर्थः, **चारुः** = शोभनः, **शिखरनिकरः** = ऊर्ध्वभागसमूहो यस्य तम् । उच्छ्रायवर्णनपरमिदम् ; चन्द्रस्पर्शासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिः, अनुप्रासश्च स्पष्ट एव । भुशुण्डिकानां **किणैः**=आघातैः, **अङ्किताः** चिह्निताः, भुजा दण्डा इव येषां तेषाम्, **रक्षकाणाम्** = रक्षानिरतानाम्, **कुलेन** =

ऐसे शत्रुवर्ग को भय में डालने वाले, डमरू की हुडुक्-हुडुक् ध्वनि से शिव जी को सन्तुष्ट करनेवाले रायगढ़ नाम के महादुर्ग का निर्माण करते ? प्रतापदुर्ग को जो सोने की दीवारों पर जड़े हुए हीरे आदि महारत्नों की किरण राशियों से ताने जा रहे बड़े भारी मण्डप (चँदवे) के विस्तार से सुशोभित तेज से शत्रुवर्ग को सन्ताप पहुँचाता है, अनेक चन्द्रचुम्बी सुन्दर शिखरों से विभूषित है, बन्दूकों के आघात से चिह्नित प्रचण्ड भुज-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्सहस्र-परिक्रमं धमद्धमद्दोधूयमानानेक-ध्वज-पटल-निर्मथित-महाकाशं प्रताप-दुर्गं निरमापयिष्यत् ? कथं वा 'आगत एष शिववीरः' इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिता निपतन्ति, अन्ये विस्मृत-शस्त्रास्त्राः पलायन्ते, इतरे महात्रासाऽऽकुञ्चितोदरा विशिथिल-वाससो नग्ना भवन्ति, अपरे च शुष्कमुखा दशनेषु तृणं सन्धाय साम्रेडं प्रणिपात-परम्परा रचयन्तो जीवनं याचन्ते ।

ततस्तस्य महाप्रतापमवगत्य, किञ्चिद्भीते इव तच्छत्रूणां चावहेलामाकलय्य किञ्चिदरुण-नयने इव, दक्षिण-हस्ताङ्गुष्ठ-तर्जनीभ्यां श्मश्रुवग्रं परिमृजति यवन-सेनापतौ; तानरङ्गः पुनर्न्यवेदयत्—

समूहेन, विधीयमानाः परस्सहस्राः **परिक्रमाः**=मण्डलानि यस्य तम् । धमद्धमदिति शब्देन **दोधूयमानानाम्** = भृशं सञ्चलताम् , अनेकेषां ध्वजानां पटलेन **निर्मथितः**=विलोडितः, महाकाशो येन तम् । **महात्रासेन** = महाभयेन, **आकुञ्चितानि** = कृशिमानमायान्ति, उदराणि येषां ते । अत एव विशेषतः शिथिलानि वासांसि येषां ते, **याचन्ते** = प्रार्थयन्ते ।

दण्डवाले हजारों प्रहरी जिसकी बराबर परिक्रमा करते रहते हैं, कैसे रचते ? "ये वीर शिवाजी आ गये" यों भ्रान्तिवश भी सम्भावना कर इनके विरोधियों में कोई मूर्च्छित होकर गिर पड़ते हैं, तो कोई अस्त्र-शस्त्रों को जहाँ के तहाँ छोड़कर भाग खड़े होते हैं, किन्हीं का पेट मारे महाभय के ऐसा कृश हो जाता है कि बदन पर वस्त्र टिकते ही नहीं, अतः नंगे हो पड़ते हैं और कुछ का तो मुँह सूख कर काँटा हो जाता है, वे दाँतों के तले तिनका दबाकर बार बार प्रणाम पर प्रणाम करते हुए गिड़-गिड़ा कर जीवन-भिक्षा माँगते हैं ।"

जब यवनसेनापति उनका महाप्रताप जान कर कुछ भयभीत-सा, उनके शत्रुओं का तिरस्कार सुन कर कुछ क्रुद्ध-सा हो दाहिने हाथ के अँगूठे और तर्जनी से मूँछ के अगले भाग को सुहलाने लगा (मूँछों पर ताव देने लगा) तो तानरंगने पुनः निवेदन किया—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परन्त्वद्य सिंहेन सह शिवस्य साम्मुख्यमस्ति, तन्मन्ये इयमस्तमनवेला तत्प्रतापसूर्यस्य ।

तत् कर्णे कृत्वा सन्तुष्ट इव सकन्धराकम्पं सेनापतिरुवाच-अथात्र संग्रामे कस्य विजयः सम्भाव्यते ?

स उवाच—श्रीमन् ! यदि शिवस्य साहाय्यं साक्षाच्छिव एव न कुर्यात् ; तद् विजयपुरस्यैव विजयः ।

अथ सहासं सोऽब्रवीत्—को नाम खपुष्पायितः शशशृङ्गायितः कमठी-स्तन्यायितः सरीसृप-श्रवणायितः भेकरसनायितः वन्ध्या-पुत्रायितश्च शिवोऽस्ति ? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभिः पाशैर्बद्ध्वा चपेटैस्ताड्यमानो विजयपुरं नीयते ।

अस्तमनवेला, तत्प्रतापरूपसूर्यस्य समाप्तिवेलेत्यर्थः । सूर्यास्तोदयौ तु न भवतः, केवलं तत्खण्डवासिभिस्तदनवलोकनेन तादृशशब्दव्यवहार एवाऽऽस्थीयते । तदुक्तम् "नैवास्तमनमर्कस्य नोदयः सर्वदा सत" इति ।

खपुष्पमिवाऽऽचरितः खपुष्पायितः । खपुष्पम् , शशशृङ्गम् , कमठी-(कच्छपी) दुग्धम् , सरीसृपश्रवणम् , भेकरसना, वन्ध्यापुत्रश्चेत्यसम्भवाली-ढवस्तूनि । यथैतानि न सन्त्येवं भूतनाथः सदाशिवोऽपि नास्तीत्यर्थः ।

लेकिन आज सिंह के साथ शिवाजी का सामना हुआ है, सो मैं तो समझता हूँ कि यह उनके प्रतापरूपी सूर्य की अस्तमन वेला है ।

यह सुन कर प्रसन्न-से हुए सेनापति ने गरदन हिलाकर कहा—अच्छा, इस संग्राम में किसकी विजय की सम्भावना करते हैं ?

उसने कहा—श्रीमन् , यदि साक्षात् शिवजी ही शिवाजी की सहायता न करें, तो बीजापुर की ही विजय निश्चित है ।

तदनन्तर हँस कर वह बोला—भला आकाशपुष्प-सा, शश (खरगोश) के सींग-सा, कछुई का दूध-सा, सर्प के कान-सा, मेढक की जीभ-सा, वन्ध्या-पुत्र-सा शिव भी कोई वस्तु है, जो उसकी रक्षा करेगा । देखना कल ही रस्सों से बाँध कर थप्पड़ पर थप्पड़ मार रहे हम लोग उसे बीजापुर ले जायँगे ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

-इति सकष्टमाकर्ण्य, "स्यादेवं भगवन् !" इति कथयति तानरङ्गे; अभिमान-परवशः स स्वसहचरान् सम्बोध्य पुनरादिशत् "भो-भो योद्धारः ! सूर्योदयात् प्रागेव भवन्तः पञ्चापि सहस्राणि सादिनां दशापि च सहस्राणि पत्तीनां सज्जीकृत्य युद्धाय तिष्ठत। गोपीनाथ-पण्डित-द्वाराऽऽहूतोऽस्ति मया शिव-वराकः, तद् यदि विश्वस्य स समागच्छेत्, ततस्तु वद्ध्वा जीवन्तं नेष्यामः, अन्यथा तु सदुर्गमेनं धूलीकरिष्यामः। यद्यप्येवं स्पष्टमुदीरणं राजनीति-विरुद्धम्, तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम्"।

तदवधार्य समस्तक-कूर्चान्दोलनम्-"यदाज्ञाप्यते यदाज्ञाप्यते" इति वाचां धारासंपातैरिव स्नापयत्सु पारिषदेषु; "गोपनीयोऽयं

सादिनाम् = अश्वारोहिणाम्। "अश्वारोहास्तु सादिन" इत्यमरः। पत्तीनाम् = पदातीनाम्। "पदातिपत्तिपतगपादातिकपदाजय" इत्यमरः। विश्वस्य=विश्वासं कृत्वा। समस्तककूर्चान्दोलनम् = सशिरोदाढिका-सञ्चालनम्। क्रियाविशेषणम्। अदुर्मनसो दुर्मनसो भवन्तीति दुर्मनायमानास्तेषु। "भृशादिभ्यो भुव्यच्वेर्लोपश्च हल" इति सूत्रेणाभूततद्भावविषये

तानरंग ने यह वाक्य बड़े कष्ट के साथ सुना और कहा—"भगवन् ऐसा हो सकता है !" फिर तो मारे अभिमान के अपने साथियों को सम्बोधित कर उसने फिर आदेश दिया—"ऐ सैनिकों, कल सूर्योदय से पहले ही आप लोग पाँच हजार घुड़सवारों और दस हजार पैदलों को सुसज्जित कर युद्ध के लिए तैयार रहो। मैंने गोपीनाथ पण्डित द्वारा क्षुद्र शिवाजी को बुला भेजा है, सो यदि वह विश्वास कर आ जाय, तब तो बाँध कर जीवित को ही ले जायँगे, नहीं तो किले के साथ इसे धूल में मिला डालेंगे। यद्यपि इस तरह खुल्लम-खुल्ला कहना राजनीति के विरुद्ध है, लेकिन मेरा आवेश (जोश) विवेक की पर्वाह नहीं करता।"

उक्त आदेश सुन कर सहयोगियों के "जो आज्ञा, जो आज्ञा' यों मानो वाणियों की मूसलाधार वृष्टियों से स्नान कराने पर और 'यह गोपनीय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृत्तान्तः, कथं स्पष्टं कथ्यते ?" इति दुर्मनायमानेष्विव च अकस्मादेव प्रविश्य सूदेनोक्तम् "श्रीमन् ! व्यत्येति भोजनसमयः" तत् श्रुत्वा "आ ! एवं किलैतत्" इति सोत्प्रासं सविस्मयं सकूर्चोद्धूननं सोपबर्हताडनमुच्चार्य सपद्युत्थाय, "पुनरागम्यताम्" इति तानरङ्गं विसृज्य सेनापतिरन्तः प्रविवेश। तानरङ्गश्च यथागतं निववृते।

इतस्तु प्रतापदुर्गे विहिताहार-व्यापारे रजत-पर्य्यङ्किकामेकामधिष्ठिते किञ्चित् तन्द्रा-परवशे इव गोपीनाथे; शिववीरः शनैरुपसृत्य प्रणम्य, उपाविशदवोचच्च—अहो ! भाग्यमस्माकं यदालयं युष्मादृशा भूदेवाः स्वचरणरजोभिः पावयन्ति-इति।

क्यङि शानच् । भावसप्तमी । **सूदेन** = पाककर्त्रा । **सोत्प्रासम्**=ईषद्धास्येन सह, क्रियाविशेषणम् । "सोत्प्रासः समनाक्स्मितम्" इत्यमरः । **सकूर्चोद्धूननम्** = श्मश्रूल्लासनेन सह । **सोपबर्हताडनम्** = उपधानप्रहारेण साकम् । गर्वहर्षाभ्यामिदं ताण्डवं सर्वम् ।

रजतेन = दुर्वर्णेन, खचिताम्, **पर्यङ्किकाम्** = लघुपर्यङ्कम् । मञ्चिकामिति यावत् । **तन्द्रा-परवशे**=निद्रापूर्वालस्याधीने ।

वृत्तान्त क्यों खुले आम कहा जाता है' यों कुछ नाराज-से होने पर रसोईदारने प्रविष्ट होकर कहा—"श्रीमन्, भोजनवेला बीत रही है।" यह सुनकर सेनापति व्यङ्ग्य और विस्मय के साथ विचित्र ढंग से दाढी हिलाकर और मसनद पर हाथ पटककर बोला "ओ क्या ऐसा है !" और झटपट उठकर "फिर आइएगा" यों तानरंगको विदाकर भीतर चला गया। तानरंग भी जिस मार्ग से प्रविष्ट हुआ था, उसी मार्ग से लौट आया।

इधर प्रतापदुर्ग में गोपीनाथ पण्डित भोजन-भाजन से निवृत्त होकर जब एक चाँदी के पलंग पर बैठे-बैठे कुछ ऊंघ-से रहे थे, वीर शिवाजी धीरे से प्रविष्ट होकर प्रणाम कर बैठे और बोले—

"अहा ! हमारा भाग्य अतिसराहनीय है, जिनके घर को आप ऐसे भूमिदेव अपनी चरणरज से पवित्र करते हैं।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ तयोरेवमभूवन्नालापाः ।

गोपीनाथः—राजन् ! कोऽत्र सन्देहः ? सर्वथा भाग्यवानसि, परं साम्प्रतं नाहं पण्डितत्वेन कवित्वेन वा समायातोऽस्मि, किन्तु यवनराज-दूतत्वेन । तत् श्रूयतां यदहं निवेदयामि ।

शिववीरः—शिव ! शिव ! खलु खलु खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्य-मुद्रयेव मुद्रितं विभाति; न तेषां ब्राह्मण-कुल-कमल-दिवाकराणां यवन-कैङ्कर्य-कलङ्क-पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ । तथाऽपि कुलीना निरभिमाना भवन्ति-इति आनीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण-कमल-चञ्चरीकः ।

गोपीनाथः—वीर ! कलिरेष कालः, यवनाऽऽक्रान्तोऽयं भारत-

खल्विदमुक्त्वा=निषेधार्थकः खलुशब्दः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" । यवनानां कैङ्कर्यम् = किङ्करस्य भावः, दासता, तदेव कलङ्कपंकः । स्फुटत इव = दीर्येते इव । कुलीनाः = सद्वंशजाः ।

इसके बाद उन दोनों में यों वार्तालाप हुआ—

गोपीनाथ—इसमें क्या सन्देह ? आप सचमुच भाग्यवान् हैं । लेकिन इस समय मैं पण्डित या कवि के रूप में नहीं आया हूँ, अपितु यवनराज का दूत बनकर आया हूँ, इसलिये उसे सुनने की कृपा कीजिये ।

शिवाजी—शिव ! शिव !! यह न कहिये, जिन आप लोगों के चरण से अङ्कित भगवान् विष्णु का भी वक्षःस्थल ऐश्वर्य की मुद्रा से मुद्रित हुआ-सा सुशोभित होता है; उन ब्राह्मण-कुल-कमल दिवाकरों को यवनों की किङ्करता (चाकरी) रूप कलङ्क कीचड़ शोभा नहीं देता, जिसे सुनकर भी मेरे कान फूट-से रहे हैं, यह दूसरी बात है कि कुलीन पुरुष निरभिमान होते हैं, इसलिए कोई सन्देश आप लाये हों, तो इस जन को, जो श्रीमान् के चरण-कमलों का भ्रमर है, आज्ञा दीजिये ।

गोपीनाथ—वीरवर, यह कलिकाल है, यह भारतभूमि यवनों से आक्रान्त

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूभागः, तन्नास्माकं तथा तानि तेजांसि, यथा वर्णयसि। साम्प्रतं तु विजयपुराधीश-वितीर्णां भृतिं भुञ्जे—इति तदाज्ञामेव परिपालयामि। तत् श्रूयतां तदादेशः।

शिववीरः—आर्य! अवदधामि।

गोपीनाथः—कथयति विजयपुरेश्वरो यद्-"वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयम्, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति। तच्छुभमात्मन इच्छसि चेत् त्यक्त्वा निखिलां चञ्चलताम्, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य, समागच्छ मत्सभायाम्, मत्तः प्राप्त-पदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहतः कथावशेषः संवत्स्यसि। तत् केवलं त्वयि दययैव सन्देशं

भृतिम्=जीविकाम्। अवदधामि=सावधानोऽस्मि।

हैं, इसलिये हम में वह ओज नहीं रहा जैसा आप वर्णन कर रहे हैं। इस समय बीजापुर के नरेश द्वारा प्रदत्त जीविका (वेतन) से अपना निर्वाह करता हूँ, अतः उसी की आज्ञा का पालन करता हूँ। इसलिए आप उसका आदेश सुनिये।

वीर शिवाजी—पूज्य, ध्यान से सुनता हूँ।

गोपीनाथ—विजयपुराधिपति कहते हैं—"वीर, हमारे साथ युद्ध ठानने की नूतन चञ्चलता का त्याग करो, तुम्हारी अपेक्षा हम बहुत अधिक बलवान् हैं, हमारा खजाना बहुत बड़ा है, सेना बड़ी विशाल है, बहुत किले हैं और बहुत-से वीर हैं। इसलिए यदि अपना भला चाहो, सारी चपलता को तिलाञ्जलि देकर, अस्त्र-शस्त्र का सर्वथा परित्याग कर, मेरी अधीनता स्वीकार कर मेरी सभा में आओ। मुझसे कोई बड़ा ओहदा पा कर चिरकाल तक जीवित रहोगे, नहीं तो दुर्गति के साथ मारे जाओगे, तुम्हारा केवल वृत्तान्त ही शेष रह जायगा। सो केवल तुम्हारे ऊपर दया से ही सन्देश भेज रहा हूँ,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रेषयामि, अङ्गीकुरु । मा स्म वृद्धायाः प्रसविन्या रजतश्वेतां पक्ष्म-पङ्क्तिमश्रु-प्रवाह-दुर्दिने पातय"–इति।

शिववीरः—भगवन्! कथयेदेवं कश्चिद् यवनराजः, परं किं भवानपि मामनुमन्यते–यद् ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा वेद-पुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति, तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ् मां कुलकलङ्कं क्लीवम्; यः प्राणभयेन सनातनधर्मद्वेषिणां दासेर-कतां वहेत्। यदि चाहमाहवे म्रियेय, वध्येय, ताड्येय वा तदैव

प्रसविन्याः = जनन्याः। रजतश्वेताम् = रूप्यधवलाम्। पक्ष्म-पङ्क्तिम्=नेत्रलोमश्रेणीम्। अश्रुप्रवाहेण=अस्रधारया, दुर्दिने= भरिते। मेघच्छन्नाहस्य वाचकमत्र लक्षणया प्रयुक्तम्। अस्माभिर्हतस्य तव विरहेण त्वन्माता शोकाकुला मा भूदिति भावः।

पक्कणीकृत्य=शबरसदनीकृत्य। "पक्कणः शबरालय" इत्यमरः। लालाटिकताम्=भृत्यताम्। "लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः।" इत्यमरः। म्रियेय, वध्येय, ताड्येय वा, क्रियादीपकम्।

इसे स्वीकार करो। वृद्धा माता की चाँदी ऐसी सफेद आँख की बरौनियों को आँसुओं की झड़ी में मत डुबाओ।"

वीर शिवाजी—भगवन्, कोई यवनराज भले ही ऐसा कहे, किन्तु क्या आप भी मुझे अनुमति देते हैं कि जो हमारी इष्टदेव-मूर्तियों को तोड़ कर, मन्दिरों को मटियामेट कर, तीर्थ स्थानों को भीलों की बस्ती बन कर, पुराणों को पीस कर, वेदग्रन्थों को फाड़ कर हिन्दुओं को (आर्यवंशजों को) जबरन् मुसलमान बना रहे हैं, उन्हीं के चरणों में अञ्जलि बाँध कर मैं उनका चेरा बनूं? यदि मैं ऐसा करूँ तो मुझ कुल-कलङ्क कायर को धिक्कार है, जो अपने प्राणों के मोह से सनातन धर्म के शत्रुओं की चाकरी बजावे। यदि मैं संग्राम में मर जाऊँ, मारा जाऊँ, पीटा जाऊँ तो मेरा अहोभाग्य है, मेरे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धन्योऽहम्, धन्यौ च मम पितरौ। कथ्यतां भवादृशां विदुषामत्र का सम्मतिः?

गोपीनाथः-(विचार्य) राजन्! धर्मस्य तत्त्वं जानासि, तन्नाहं स्वसम्मतिं कामपि दिदर्शयिषामि। महती ते प्रतिज्ञा, महत्तवोद्देश्यमिति प्रसीदामितमाम्। नारायणस्तव साहाय्यं विदधातु।

शिववीरः—करुणानिधान! नारायणः स्वयं प्रकटीभूय न प्रायेण साहाय्यं विदधाति, किन्तु भवादृश-महाशय-द्वारैव। तत् प्रतिज्ञायतां काऽपि सहायता।

गोपीनाथः—राजन्! कथ्यतां किमहं कुर्याम्, परं यथा न मामधर्मः स्पृशेत्; तथैव विधास्यामि।

शिववीरः-शान्तं पापम्! कोऽत्राधर्मः? केवलं श्वोऽस्मिन्नुद्यान-प्रान्तस्थ-पट-कुटीरे यवन-सेनापतिरपजलखान आनेयः, यथा-

---

दिदर्शयिषामि=दर्शयितुमिच्छामि। प्रसीदामितमाम्=अत्यन्तं प्रसीदामि।

माता-पिता धन्य हैं। कहिए आप ऐसे विद्वानों की इस विषय में क्या सम्मति है?

गोपीनाथ—(विचार कर) राजन्, आप धर्म का रहस्य जानते हैं, इसलिए मैं अपनी कोई भी सम्मति नहीं दर्शाना चाहता। आपकी बड़ी प्रतिज्ञा है, बड़ा भारी उद्देश्य है, इससे मुझे अत्यन्त प्रसन्नता होती है। भगवान् आपकी सहायता करे।

वीर शिवाजी—कृपासागर, भगवान् प्रायः स्वयं प्रकट होकर सहायता नहीं करते, किन्तु आपके सरीखे महाशयों के द्वारा ही करते हैं। इसलिए मेरी कोई सहायता करने का वादा कीजिये।

गोपीनाथ—राजन् कहिये, मैं क्या करूँ? लेकिन जैसे मुझे पाप न लगे वैसा ही मैं करूँगा।

वीर शिवाजी—शिव! शिव!! शिव!!! इसमें पाप की कौन बात है। बस, कल इस बगीचे के छोर पर तने खेमे में यवन-सेनापति अफ़ज़ल

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि।

गोपीनाथः—तत् सम्भवति।

ततः परं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभूवन्; यैः शिववीरस्य उदारहृदयतां धार्मिकतां शूरताञ्चावगत्य गोपीनाथोऽतितरां पर्य्यतुष्यत्।

अथ स तमाशीर्भिरनुयोज्य यावत्प्रतिष्ठते तावदुपातिष्ठत ससहचरस्तानरङ्गः। गोपीनाथस्तु तमनवलोकयन्निव तस्मिन्नेव निशीथे दुर्गादवातरत्। कपट-गायको गौरसिंहस्तु शिववीरेण सह बहुश आलप्य, सेनाऽभिनिवेश-विषये च सम्मन्त्र्य, तदाज्ञातः स्ववासस्थानं जगाम।

शिववीरोऽप्यन्य-सेनापतीन् यथोचितमादिश्य, स्वशयनागारं

निशीथे = अर्धरात्रे। सेनाभिनिवेशविषये = सेनासंस्थानसम्बन्धे, सम्मन्त्र्य=परामृश्य।

"प्राचीरं = प्रान्ततो वृतिरि"त्यमरः। उदक् चावाक् च उच्चावचम्। "मयूरव्यंसकादयश्च" इति समासः। होरात्रयम्=घण्टात्रिकम्। अहोरात्र-

---

खाँ को ले आइए जिस तरह कि अकेला मैं अकेले उसके साथ मिलकर कुछ वार्तालाप कर सकूँ।

गोपीनाथ—यह हो सकता है।

तदुपरान्त गोपीनाथ के साथ वीर शिवाजी की अनेक बातें हुईं, जिनसे शिवाजी की उदारहृदयता, धार्मिकता और शूरता जान कर गोपीनाथ को अत्यन्त सन्तोष हुआ।

इसके बाद ज्योंही गोपीनाथ शिवाजी को आशीर्वाद देकर चलने लगे त्योंही सहचर कुमार के साथ तानरंग आ पहुँचे। गोपीनाथ उन्हें अनदेखा कर उसी आधी रात के समय किले से उतरे। गायकवेषधारी गौरसिंह वीर शिवाजी के साथ खूब बातें कर सेना की व्यूह-रचना के विषय में सलाह कर उनकी आज्ञा से अपने निवास-स्थान को गये।

वीर शिवाजी भी अन्य सेनापतियों को यथायोग्य आदेश देकर अपने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रविश्य होरात्रयं यावत्किञ्चन निद्रा-सुखमनुभूय, अल्पशेषायामेव रजन्यामुदतिष्ठत् ।

शिववीर-सेनास्तु यथासङ्केतं प्रथममेव इतस्ततो दुर्ग-प्राचीरान्तरालेषु गहन-लता-जालेषु उच्चावच-भूभाग-व्यवधानेषु सज्जाः पर्यवातिष्ठन्त । वहवोऽश्वारोहा यवन-पट-कुटीर-कदम्बकं परिक्रम्य ततः पश्चादागत्य, अवसरं प्रतिपालयन्ति स्म ।

इतश्च सूर्यप्रभाभिररुणीक्रियमाणे भूभागे अरुण-श्मश्रवोऽपि सेनाः सज्जीकृतवन्तः ।

वहवो—"वयमद्य शिवमवश्यमेव विजेष्यामहे ; परं तथापि न जानीमहे किमिति कम्पत इव हृदयम् , अहो ! विलक्षणः प्रताप

शब्दस्याद्यन्तयोर्विलोपे 'होरा' इति दिनरात्रिवाचकम्, तदादायैव होराशास्त्रमित्युच्यते ज्यौतिषम् । सम्प्रति घटिकायां घण्टायाञ्च प्रयुज्यत इति वेदितव्यम् ।

अरुणश्मश्रवः=यवनाः । विजेष्यामहे, "विपराभ्यां जेः" इत्यात्मनेपदम् । प्रवहति-पतति-मर्मरीभवतीति त्रयमपि शत्रन्तं सप्तम्येकवचनम् ।

शयनागार में प्रवेश कर तीन घण्टे नींद का थोड़ा आनन्द लेकर थोड़ी रात रहते ही जाग गये ।

वीर शिवाजी की सेना संकेत के अनुसार पहले ही इधर-उधर किले की चहारदीवारी के अन्दर, घनी झाड़ियों में, ऊँच-नीच (विषम) भूभाग की ओट में शस्त्रास्त्र से लैस होकर खड़ी राह देख रही थी ।

वहुतसें घुड़सवार यवनों के खेमों का चक्कर लगा लौट आकर समय की प्रतीक्षा कर रहे थे ।

इधर सूर्य की आभा से भूतल में अरुणिमा फैलने पर यवनों ने भी सेना सुसज्जित की ।

बहुत से "हमारी बहुत बड़ी संख्या है, अतः हम लोग आज शिवाजी पर अवश्य विजय पाएँगे, परन्तु फिर भी न मालूम क्यों हृदय काँपता-सा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, 'स एवाऽऽगत' इत्यभिशङ्क्यतेऽस्माभिः। अहह !! विचित्रोऽयं वीरो यो दुर्ग-प्राचीरमुल्लङ्घ्य, प्रहरि-परीवारमविगणय्य, लोहार्गल-शृङ्खलासहस्र-नद्धानि करि-कुम्भाघात-सहानि द्वाराणि प्रविश्य, विकोश-चन्द्रहासासिधेनुका-रिष्टि-तोमर-शक्ति-त्रिशूल-मुद्गर-भुशुण्डी-कराणां रक्षकाणां मण्डलमवहेल्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेतस्य चञ्चच्चन्द्रहास-चमत्कार-चाकचक्य-चिल्लीभूत-चक्षुष्काः समराङ्गणे स्थास्यामः ?" इति चिन्ता-चक्रमारूढा अपि कथं कथमपि कैश्चिद् वीरवरैर्वर्द्धितोत्साहाः समर-भूमिमवातरन्।

प्रहरिपरीवारम्=दौवारिकसंघम्। विकोशः = कोशान्निःसारितः, नग्न इति यावत्। "नंगी तलवार" इति हिन्दी। अवहेल्य=उपेक्ष्य। प्रत्यर्थिनाम्=शत्रूणाम्। निद्रा = सुषुप्तिः, जहाति=त्यजति। स्वप्नः=तत्पूर्वावस्था। चञ्चतश्चन्द्रहासस्य चमत्कारेण यच्चाकचक्यं तेन चिल्लीभूतानि=क्लिन्नीभूतानि, मुकुलप्रायाणि इति यावत्, चक्षूंषि=नेत्राणि येषां ते।

है, ओह ! उसका प्रताप विलक्षण है, वायु के बहने पर भी, पक्षी के उड़ने पर भी, पत्तों की खड़खड़ाहट होने पर भी 'वही आ गया' ऐसी हम लोगों को आशङ्का होती है। ओहो ! यह विचित्र वीर है, किले की चहरदीवारी लाँघ कर, अनेक पहरेदारों को तृणवत् गिन कर लोहे के हजारों व्योड़े और जंजीरों से जकड़े हुए हाथी के मस्तक के आघात को भी सह सकनेवाले दरवाजों में घूसकर, हाथ में नंगी तलवार, कृपाण, छूरे, बर्छे, शक्ति, त्रिशूल, मुद्गर और बन्दूक धारण किये प्रहरियों को चकमा देकर, प्रियाओं के साथ पलंगों पर सोये हुए शत्रुओं की छाती पर चढ़ जाता है, गाढ़ी नींद में भी उन्हें नहीं छोड़ता, स्वप्नावस्था में भी चीर डालता है। इसकी चल रही तलवार के चमत्कार की चमचमाहट से चकाचौंध में पड़े नयनवाले हम लोग संग्राम-भूमि में कैसे टिकेंगे ?" इस प्रकार चिन्ताओं में फँसे हुए भी सैनिक लोग किन्हीं वीरवरों द्वारा उत्साहित होने पर किसी प्रकार संग्राम-भूमि में उतरे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ कथंचित् प्रकाश-बहुले संवृत्ते नभःस्थले, परस्परं परिचीयमानासु आकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु, भ्रमरालिष्विव परितः प्रस्फुरन्तीषु असि-पङ्क्तिषु, चाटकैर-चकचकायितेष कवच-चकत्कारेषु, गोपीनाथ-पण्डितो वारमेकं शिववीर-दिशि परतश्च यवन-सेनापति-दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिंश्चित् पट-कुटीरे अपजलखानमानेतुं प्रबबन्ध।

शिववीरोऽपि कौशेय-कंचुकस्यान्तर्लौह-वर्म्म परिधाय, सुवर्ण-सूत्र-ग्रथितोष्णीषस्याप्यधस्तादायसं शिरस्त्राणं संस्थाप्य, सिंहनख-नामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्ध-कटिरपजलखानसाक्षात्काराय सज्जस्तिष्ठति स्म।

विकचताम्=विकासभावम्। उपमालङ्कारः। एवं परत्र। चटकाया अपत्यानि पुमांसः **चाटकैराः**, तेषां **चकचकायितेषु** = चकचकमिवाचरितेषु, चकचक इत्यनुकरणशब्दः। **कवचानाम्** = उरश्छदानाम्, **चकत्कारेषु** = तादृशशब्देषु। **गतागतम्** = यातायातम्। **प्रबबन्ध** = व्यवस्थापितवान्।

इसके बाद जब आकाश में पर्याप्त प्रकाश फैल गया, परस्पर चेहरे पहचाने जाने लगे, कमलों की तरह वीरों के मुख प्रफुल्लित हो गये, भ्रमरावलियों की तरह चारों ओर तलवारें सरकने लगीं और कवचों की गौरैयों के चहचहाने की-सी चट-चट आवाज होने लगी, तब गोपीनाथ पण्डित ने एकबार शिवाजी की ओर और दूसरी बार यवन सेनापतिकी ओर चक्कर लगा कर दोनों सेनाओं के बीच में ही किसी एक खेमे में अफजल खाँ को लाने का प्रबन्ध किया।

शिवाजी भी रेशमी चोगे के अन्दर लोहे का कवच पहन कर, सोने के तारों से गुंथी हुई पगड़ी के नीचे लोहे का टोप रख कर, सिंहनख नाम के एक विशेष शस्त्र को दोनों हाथों में चढ़ा कर, दृढ़ता से कमर कस कर अफ़जल खाँ से मिलने के लिए तैयार बैठे थे। और दूसरी ओर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपजलखानोऽपि च—"यदाऽहमेनं साक्षात्कृत्य, करताडनमेकं कुर्याम्, तदैव तालिकाध्वनि-समकालमेव अमुकामुकैः श्येनैरिवाभिपत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झञ्झया घनघटेवापनेया"–इति संकेत्य, सूक्ष्म-वसन-परिधानः, वज्रक-जटितोष्णीषिकः, गल-विलुलित-पद्मराग-मालः, मुक्ता-गुच्छ-चोचुम्ब्यमान-भालः, निश्वास-प्रश्वास-परिमथित-मद्य-गन्ध-परिपूरित-पार्श्व-देशान्तरालः, शोण-श्मश्रु-कूर्च-विजित-नूतन-प्रवालः, कञ्चुकस्यूत-काञ्चन-कुसुम-जालः विविध-वर्ण-वर्णनीय-शिविकामारुह्य निर्दिष्टपटकुटीराभिमुखं प्रतस्थे।

अमुकामुकैः="फलाना फलाना" इति हिन्दी। **झञ्झया**=झञ्झावातेन, "झञ्झावातः सवृष्टिकः" इत्यमरः। **घनघटेव**=मेघसमूह इव।

वज्रकेण = हीरकेण, **जटिता** = खचिता, उष्णीषिका यस्य सः। निश्वासप्रश्वासाभ्यां परिमथितो यो **मद्यगन्धः** = मैरेयामोदः, तेन। **परिपूरितम्** = भरितम्, पार्श्वदेशान्तरालं येन सः। **शोणाभ्याम्** = लोहिताभ्याम्, श्मश्रुकूर्चाभ्यां विजितो **नूतनः**, **प्रवालः** = नवपल्लवं येन सः। कञ्चुके **स्यूतानि** = खचितानि, **काञ्चनानि** = हैरण्यानि, कुसुमजालानि यस्य सः। **विविधैः** = नानाप्रकारैः, **वर्णैः** = रंगैः, अक्षरैर्वा,

---

अफ़ज़ल खाँ भी "जब मैं उससे मिल कर एक बार ताली बजाऊँ, ताली बजते ही तुरन्त अमुक अमुक लोग बाज के समान उस पर टूट कर उसे बाँध दें और हमारी सेना जैसे आँधी घनघटा को तितर-बितर कर देती है वैसे ही उसकी सेना को तितर-बितर कर दे।" इस तरह संकेत कर विविध रंगों से मनोहर पालकी में बैठकर मिलने के लिए पहले से निश्चित खेमे की ओर रवाना हुआ। उसके बदन पर महीन कपड़ों का पहनावा था, सिर पर हीरों से जटित टोपी थी, गले में पुखराज की माला झूल रही थी, कपाल पर मोतियों का गुच्छा लगा था, उसके आसपास का वातावरण श्वासोच्छ्वास से प्रकट मदिरा की गंध से परिपूर्ण था, लाल मूँछदाढ़ी से नये नये पल्लव भी मात हो रहे थे और चोगा सोने के फूलों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन् रश्मि-ग्राह-वेषेण गौरसिंहेनानुगम्यमानः माल्यश्रीक-प्रभृतिभिर्वीर-वरैर्युद्ध-सज्जैः सतर्कं निरीक्ष्यमाणः शिववीरोऽपि तस्यैव संकेतितस्य समागमस्थानस्य निकटे एव सव्य-करेण वल्गामाकृष्याश्वमवारुधत् ।

ततस्तु-इतोऽश्वात् शिववीरः, ततस्तु शिविकातोऽपजलखानः, अपि युगपदेवावातरताम् , परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्याम् , सत्वराभ्यां पादाभ्याम् , स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां कौशेयास्तरणविरोचितायां बहिर्वेदिकायां धावमानौ परस्परमालिलिङ्गतुः ।

शिववीरस्तु आलिङ्गनच्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं

वर्णनीयाम्=प्रशंसनीयाम् । कुरङ्गमिवेति, तुरङ्गस्य शीघ्रगामिताध्वननाय । रश्मिग्राहः=प्रग्रहधारी । "सईस" इति हिन्दी । वल्गाम्=कविकाम् "लगाम" इति हिन्दी । आकृष्य=आकुञ्च्य । अवारुधत्=निरुद्धवान् ।

स्वागताम्रेडनम् = वारं वारं स्वागतनिवेदनम् । आश्लेषाय = आलिङ्गनाय । धावमानौ = शीघ्रं गच्छन्तौ । अन्योन्यं हर्षप्रदर्शनायेदम् ।

से भरा था । इधर वीर शिवाजी ने भी जो अपने घोड़े को हरिन की तरह नचा रहे थे, सईस के वेष में गौरसिंह जिनके पीछे चल रहा था, माल्यश्रीक आदि चुने हुए वीर, जो युद्ध के लिए सुसज्ज थे, सतर्कता से जिनका निरीक्षण कर रहे थे, उसी पहले से निश्चित सम्मिलन स्थान के निकट ही बाँए हाथ से लगाम खींच कर घोड़े को रोका ।

इधर वीर शिवाजी घोड़े से, उधर अफ़ज़ल खाँ पालकी से—दोनों साथ ही उतरे, परस्पर एक दूसरे को देख कर उत्कण्ठित नेत्रों से, त्वरित गति पैरों से बार बार 'स्वागत स्वागत' कहने में तत्पर मुँह से और आलिङ्गन के लिए फैलाई गई भुजाओं से युक्त दोनों ने रेशमी चाँदनी से सुशोभित चबूतरे पर दौड़ते हुए आपस में आलिङ्गन किया ।

वीर शिवाजी ने आलिङ्गन के बहानेसे ही अपने हाथों से उसके

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गृहीत्वा, सिंहनखैर्जत्रुणी कन्धरां च व्यपाटयत्। रुधिरदिग्धं च तच्छरीरं कटि-प्रदेशे समुत्तोल्य भूपृष्ठेऽपोथयत्।

तत्क्षणादेव च शिववीर-ध्वजिन्यां महाध्वज एकः समुच्छ्रितः। तत्समकालमेव यवन-शिविरस्य पृष्ठस्थिता शिववीर-सेना शिविरमग्निसात्कृतवती, पुरःस्थित-सेनासु च अकस्मादेव महाराष्ट्र-केसरिणः समपतन्। तेषां 'हरहर-महादेव'-गर्जनपुरस्सरं छिन्धि-भिन्धि-मारय-विपोथय-इति कोलाहलः, प्रत्यर्थिनां च 'खुदा-तोबा-अल्लादि' पारस्य-पदमयः कलकलो रोदसी समपूरयत्।

ततो यवन-सेनासु शतशः सादिनः, गगनं चोचुम्ब्यमानाः, कृत-दिगन्त-प्रकाशाः, कडकडा-ध्वनि-धर्षित प्रान्त-प्रजाः, उड्डीयमान-

जत्रुणी = स्कन्धस्य सन्धी, 'स्कन्धो भुजशिरोऽंसोऽस्त्री सन्धी तस्यैव जत्रुणी' इत्यमरः। व्यपाटयत् = व्यदारयत्। अपोथयत् = न्यपातयत्। "पटका" इति हिन्दी।

ध्वजिन्याम्=सेनायाम्, रोदसी=द्यावापृथिव्यौ।

शतशः सादिनो ज्वालमाला अवलोक्य तदभिमुखं प्रयाता इति सम्बन्धः। ज्वालमाला विशिनष्टि—गगनं चोचुम्ब्यमामा इत्यादिभिः। कृतो दिगन्तस्य = दिक्प्रान्तभागस्य, प्रकाशो याभिस्ताः। कडकडाध्वनिभिर्धर्षिताः प्रान्तप्रजा याभिस्ताः। उड्डीयमानैः, दन्दह्यमानैः = नितरां

दोनों कन्धे जोर से पकड़कर कन्धे के जोड़ और गर्दन चीर डाली। रुधिर से लथपथ उसका शरीर कमर से उठाकर जमीन पर पटक दिया।

उसी क्षण वीर शिवाजी की सेना में एक बड़ी भारी पताका खड़ी हुई। उसी समय यवनों के शिविर के पीछे तैनात खड़ी वीर शिवाजी की सेना ने शिविर में आग लगा दी। आगे की कतार में खड़ी यवन-सेनाओं में एकाएक महाराष्ट्रसिंह टूट पड़े। उनके 'हर हर महादेव' की गर्जना के साथ मारो काटो नोचो पटको के कोलहाल ने और शत्रुओं के 'खुदा तोबा अल्ला' आदि फारसी शब्दप्रचुर होहल्ले ने आकाश को पाट दिया।

तदुपरान्त यवनों की सेनाओं में सैकड़ों घुड़सवार—आकाश को छू रहीं शिविर को राख में मिला रही ज्वालाएँ, जिन्होंने दिगन्तों को प्रकाशित कर डाला था, अपनी कड़-कड़ाहट से प्रान्त के लोगों के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दन्दह्यमान-परस्सहस्र-पटखण्ड-विहित-हैम-विहङ्गम-विभ्रमाः, ज्योतिरिङ्गणायित-परस्कोटि-स्फुलिङ्ग-रिङ्गित-पिङ्गीकृत-प्रान्ताः, दोधूयमानधूम घटा पटल परिपात्यमान भसित-सितीकृतानोकहाः, सकलकलध्वनि पलायमानैः पतत्रि पटलैरिव सोसूच्यमानाः, शिविरघस्मरा ज्वालमाला अवलोक्य, स हाहाकारं तदभिमुखं प्रयाताः। अपरे च महाराष्ट्रासि-भुजङ्गिनीभिर्दन्दश्यमानाः, केचन 'त्रायस्व-त्रायस्व'' इति साम्रेडं व्याहरमाणाः पलायमानाः, अन्ये धीरा वीराश्च-

ज्वलद्भिः, परस्सहस्रैः पटखण्डैर्विहितो **हैमानाम्** = सौवर्णानाम्, **विहङ्गमानाम्**=पतत्रिणाम्, विभ्रमो याभिस्ताः। **ज्योतिरिङ्गणायितानाम्** = खद्योतायितानाम्, **परस्कोटीनाम्** = असंख्यानाम्, पारस्करादित्वात् सुट्, टित्वेन पराद्यवयवत्वात् न विसर्गः। **स्फुलिङ्गानाम्** = अग्निकणानाम्, **रिङ्गितैः** = उड्डयनैः, **पिङ्गीकृताः**=पिञ्जरीकृताः, **प्रान्ताः** = परिसरभूमयो याभिस्ताः। **दोधूयमानानाम्** = नितान्तं वृद्धिं गच्छन्तीनाम्, **धूमघटानाम्**=धूमलेखानाम्, **पटलेन**=समूहेन, **परिपात्यमानैः** = समन्ततो विकीर्यमाणैः, **भसितैः** = भस्मभिः, **सितीकृताः**=स्वच्छीकृताः, **अनोकहाः**= वृक्षाः, याभिस्ताः। **सकलकलध्वनि** = कलकलशब्देन सह, पलायमानैः, **पतत्रिपटलैः**=पक्षिसमूहैः। **सोसूच्यमानाः** = बोबुध्यमानाः। उड्डीना भयात्कलकलं कुर्वन्ति विहगाः, इह च स एव सूचनमुखेनोत्प्रेक्षितः। **शिविरघस्मराः**=पटगृहभक्षिकाः, **दन्दश्यमानाः**=भृशं दश्यमानाः, खण्ड्यमाना इत्यर्थः। **साम्रेडम्**=वारं वारम्।

मन में भय उत्पन्न कर दिया था, उड़ते हुए अधजले हजारों कपड़ों के टुकड़ों से उड़ रहे सोने के पक्षियों की भ्रान्ति पैदा कर दी थी, जुगुनू-सी करोड़ों चिनगारियों के उड़ने से सारे प्रान्त को पीला बना दिया था, बराबर लगातार बढ़ रही धूम घटाओं द्वारा चारों ओर बिखेरी जा रही भस्म राशि से सबके सब वृक्ष सफेद बना दिये थे, कल-कल ध्वनि वाले उड़ते हुए पक्षिगण जिनकी सूचना दे रहे थे, देख कर हाहाकार के साथ उनकी ओर दौड़े गये, और लोग मरहट्टों की तलवार रूपी सर्पिणी से डसे जा रहे थे, कोई बार बार "बचाओ बचाओ" कहते भाग रहे थे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"तिष्ठत रे तिष्ठत धूर्त धुरीणाः ! महाराष्ट्र हतकाः ! किमिति चौरा इव लुण्ठका इव दस्यव इव च यवन-सेनापतीनाक्रामयथ ? समागच्छत सम्मुखम्, यथा शाम्येदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्र रुधिराऽऽस्वाद तृषा"

—इति सक्ष्वेडं संगर्ज्य, युद्धाय सज्जाः समतिष्ठन्त ।

तेषां चाश्वानां सव्यापसव्य-मार्गैः खुर-क्षुण्णा व्यदीर्यत वसुधा । खड्ग-खटखटा-शब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः । रुधिर-धाराभिः जपा-सुमनस्समाच्छन्नमिवाभूद्रणाङ्गणम् ।

तदवलोक्य गौरसिंहो मृतस्यापजलखानस्य शोणित-शोणं शोणं शरीरं प्रलम्ब वेणु-दण्डाग्रेपु बद्ध्वा समुत्तोल्य सर्वान् सन्दर्श्य सभेरीनादं घोषितवान् यद्—"दृश्यतामितो हतोऽयं यवन-सेनापतिः, ततश्चाग्निसात् कृतानि ससकल-सामग्री-जातानि शिवि-

सक्ष्वेडम्=ससिंहनादम् ।

सुमनसः=पुष्पाणि । "स्त्रियः सुमनसः पुष्पमि"त्यमरः ।

शोणितशोणं शोणम्=रुधिरार्द्रत्वात् प्रकृत्या च रक्तवर्णमित्यर्थः । प्रलम्बानाम्=दीर्घाणाम्, वेणुदण्डानाम्=वंशानाम्, अग्रेषु, समुत्तोल्य

कुछ धीर वीर भट "अरे धूर्त्त राजो, अरे दुष्ट मरहट्टों, खड़ रहो खड़े रहो, क्यों चोरों की नाईं, डाकुओं की भाँति, दस्युओं की तरह यवनसेनापतियों पर आक्रमण करते हो ? सामने आओ, ताकि हमारे तलवारों की चिरकाल से बढ़ी हुई मरहट्टों के रक्तपान की प्यास शान्त हों ।" यों सिंहनाद पूर्वक गरज कर युद्ध के लिए तैयार खड़े हो गये ।

उनके घोड़ों के दाये बाँये पैंतरे से खुरों से क्षुण्ण-सी भूमि विदीर्ण हो गई । तलवारों की खटखट ध्वनियों के साथ चिनगारियाँ आविर्भूत होने लगीं । रुधिर की धाराओं से रणभूमि अढ़ौल के फूलों से आच्छन्न-सी हो गई ।

यह देख कर गौरसिंह ने मृत अफ़जल खाँ के खून से लथपथ लाल शरीर को लम्बे बासों के अगले हिस्से में बाँध खड़ा कर सबको दिखा कर डुग्गी के साथ घोषणा की कि "देखिये, देखिये इधर यह यवन सेनापति मारा गया है, उधर सारी रण-सामग्रियों के साथ सब

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राणि, परितश्च बहूनि विनाशितानि यवन-वीर-कदम्बकानि, तत् किमिति अवशिष्टा यूयं मुधा वक-गृध्र-शृगालानां भोज्याः संवर्तध्वे? शस्त्राणि त्यक्त्वा पलायध्वं पलायध्वम्, यथा नेयं भूः कदुष्णैर्भवतां सद्यश्छिन्न-कन्धरा-गलद्रुधिर-प्रवाहैर्भवद्रमणीनां च कज्जल-मलिनैर्बाष्प पूरैरार्द्रा भवेद्"-इति। तदवधार्य, दृष्ट्वा च रुधिर-दिग्धं क्रीडापुत्तलायितं स्वस्वामिशरीरम्, सर्वे ते हतोत्साहा विसृज्य शस्त्राणि कान्दिशीका दिशो भेजुः।

ससेनः शिववीरश्च विजय-शङ्खनादै रोदसी संपूर्य, रणाङ्गण-शोधनाधिकारं माल्यश्रीकाय समर्प्य, प्रताप-दुर्गं प्रविश्य मातुश्चरणौ प्रणनाम। *इति द्वितीयो निश्वासः।*

उत्थाप्य। कदुष्णैः=ईषदुष्णैः। रुधिरदिग्धम्=रक्तक्लिन्नम्। क्रीडा-पुत्तलायितम्=खेलार्थं निर्मितपुत्तलवदाचरितम्।

कान्दिशीकाः=भीताः। "कान्दिशीको भयद्रुत" इत्यमरः।

मातुः=जनन्याः। प्रणनाम=नमस्कृतवान्।

इति श्रीशिवराजविजयवैजयन्त्यां द्वितीयनिश्वासविवरणम्।

शिविर राख की ढेरी बना दिये हैं, चारों ओर बहुत से यवन वीरों के झुण्ड तलवार के घाट उतारे गये हैं, सो बचे हुए आप लोग क्यों व्यर्थ बगुले, चील, सियारों के भोजन बनते हैं? हथियार डाल कर भाग जाओ, भाग जाओ, जिससे कि यह रणभूमि आप लोगों के तुरन्त कटी गरदन से बह रही गरम गरम रुधिर धाराओं और आप लोगों की विधवाओं के काजल से मैले आँसुओं के प्रवाहों से गीली न हो।"

उसे सुन कर और खिलौना बनाये अपने स्वामी के शरीर को खून से लथपथ देख कर सभी का उत्साह पस्त पड़ गया, मारे भय के शस्त्रों को डाल कर सब चारों ओर भाग खड़े हुए।

वीर शिवाजी ने सेना के साथ विजय शंख के घोष से अन्तरिक्ष और पृथ्वी के अन्तराल को पूर्ण कर और माल्यश्रीक को रणभूमि की सफाई का अधिकार सौंप कर प्रताप दुर्ग में प्रविष्ट हो माता के चरणों में प्रणाम किया। इति हिन्दी अनुवाद समाप्त।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"जीवन् नरो भद्रशतानि पश्येत्"

—स्फुटकम्

"संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम् ?"

—भर्तृहरिः ।

तत्र पर्ण-कुटीरे तु कथंकथमपि दाडिमाद्यास्वादन-तत्परां कुसुम-गुच्छैर्मनो विनोदयन्तीं बालिकां गुरोः समीपे परित्यज्य, तदाज्ञया तत्पितरौ समन्वेष्टुम् , अन्तर्गोपित-क्षुर-प्रच्छुरिकां यष्टिकामेकां हस्तेन धृत्वा, तैरेव श्याम-श्यामैः गुच्छ-गुच्छैः, लोल-लोलैः कुञ्चित-कुञ्चितैः कचैः, ब्रह्मचारि-वटु-वेष एव श्यामवटुरासन्न-ग्रामटिका-दिशि समगात् ।

ततो "हन्त ! कथमद्यापि शूली त्रिशूलेन नैतान् शूलाकरोति ?

गौरवटुश्यामवटुनाम्ना प्रसिद्धयोरुदयपुरराज्यैकभूभागस्वामिश्रीखड्गसिंहतनययोः समागमश्चिराद्विमुक्तया सौवर्णीनामिकया भगिन्या पुरोहितेन च काकतालीयन्यायेन जात इति तृतीयपरिच्छेदकथामुपक्षिपति-**"जीवन्नरो भद्रशतानि पश्येदि"**ति ।

अघटितघटनापटीयस्या मायया प्रपञ्चजातमेवेन्द्रजालन्न तु ततोऽन्यत्किञ्चिदित्यपि स्मारयति भर्तृहरिपद्यखण्डेन—**"संसारेऽपी"**ति ।

कुसुमगुच्छैः = पुष्पस्तबकैः । **श्यामश्यामैः** = अतिश्यामैः । एवमग्रेऽपि । "नित्यवीप्सयोरि"त्याभीक्ष्ण्ये द्वित्वम् । **आसन्ना** = समीपवर्त्तिनी, **ग्रामटिका** = लघुग्रामः । "स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनै" रित्यादिषु महाकविभिः प्रयुक्तोऽयं शब्दस्तद्धित इति महासज्ञास्वारस्य-कल्प्यमान"ग्रामट्टिकनि"ति प्रत्ययनिष्पन्नः । "गंवई" इति हिन्दी ।

शूली = शिवः, **शूलाकरोति** = शूलेन पचति । "शूलात्पाके" डाच् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कथं खड्गिनी खड्गेन न खण्डयति ? कथं चक्री चक्रेण न चूर्णयति ? कथं पाशी पाशैर्न पाशयति ? कथं हली हलेन नावहेलयति ? कथं वा जम्भारातिर्दम्भोलिघातैर्दम्भिन एतानम्भोधि-जल-स्तम्भा-रम्भेषु न पातयति ? अहह ! क इतोऽप्यधिकोऽनर्थो भविता यद् भगवानवतरिष्यति। शिव ! शिव !! न शक्यते द्रष्टुमपि यदेतै-र्निर्दय-हृदयैः परमपूजनीयानां ब्राह्मणानामपि अत्यल्पवयस्का अपि बालिका अपह्रियन्ते। धिगेतान् ! धर्मादपि निर्भीकान् अभी-कान्''-इति चिन्ता-सन्तान-वितानैकतान एव ब्रह्मचारि-गुरौ; सप-द्येव न्यविशत श्यामवटुः सह देवशर्म्मणा वर्षीयसा ब्राह्मणेन। सतु बाष्पक्षालितोपनयनः शोकाधिक-कम्पित-गात्रयष्टिः प्रविश्यैव, दृष्ट्वैव तां बालिकां "कुतः कुतः कोशले!" इत्युदीर्य तामङ्के जग्राह।

साऽपि प्रक्षिप्य दाडिम-खण्डम्, निरस्य च कोरक स्तवक-क्रीडनकम्, तं कराभ्यां कण्ठे गृहीत्वा मुक्तकण्ठं रुरोद।

खड्गिनी = दुर्गा। चक्री = विष्णुः। पाशी=वरुणः। "प्रचेता वरुणः पाशी"त्यमरः। पाशैः = बन्धनसाधनैर्वरुणास्त्रैः, हली = बलः, अवहेल-यति = तिरस्करोति। जम्भस्य = तन्नाम्नोऽसुरस्य, अरातिः = रिपुः, इन्द्रः। दम्भोलीनाम् = वज्राणाम्, "दम्भलिरशनिर्द्वयोरि"त्यमरः, घातैः= ताडनैः। अम्भोधेः = क्षीरनिधेः, जलस्तम्भानाम्, आरम्भेषु= उपक्रमेषु। क्वचिज्जलधिमारभ्य मेघपर्यन्तं जलस्तम्भा आविर्भवन्तीति पदार्थ-विद्या-वेदिनां नाविदितचरम्। अनुप्रासः। धर्मादपि निर्भीकान् = धार्मिकभय-शून्यान्। अभीकान्=कामुकान्। "अभीके कामुके निर्भयं त्रिषु"। चिन्तायाः सन्तानस्य = समूहस्य, वितानेविस्तारीकरणे, एकतानः = स्थिरचित्तः। न्यविशत=प्रविष्टः। वर्षीयसा=वृद्धेन। बाष्पेण=रोदनजलेन क्षालितम्= धौतम्, उपनयनम्=उपनेत्रम्, 'चश्मा' इति हिन्दी, यस्य सः। शोकेन, अधिकम्, कम्पिता=वेपमाना, गात्रयष्टिः=शरीरं यस्य सः।

मुक्तः=अप्रतिहतः, कण्ठो यस्यां क्रियायां तदिति क्रियाविशेषणमिदम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृद्धोऽपि च एकं करं तत्पृष्ठे विन्यस्य, अन्येन च तस्याः शिरः परिमृशन्, "कोशले! कानि पातकानि पूर्वजन्मनि कृतवत्यसि?—यद् बाल्य एव त्वत्पिता सङ्ग्रामे म्लेच्छ-हतकैर्धर्मराज-नगराध्व-न्यध्वन्यः कृतः। माता च तव ततोऽपि पूर्वमेव कथावशेषा संवृत्ता, यमलौ भ्रातरौ च तव द्वादशवर्षदेश्यावेव आखेट-व्यसनिनौ महार्ह-भूषण-भूषितौ तुरगावारुह्य वनं गतौ दस्युभिरपहृताविति न श्रूयते तयोर्वार्ताऽपि, त्वं तु मम यजमानस्य पुत्रीति स्वपुत्रीव मयैव सह नीता, वर्द्धसे च। अहह! कथं वारं वारं बालैव सुन्दर-कन्या-विक्रय-व्यसनिभिर्यवन-वराकैरपह्रियसे? भगवदनुग्रहेण च कथं कथमपि मत्कर-मुक्ता पुनः प्राप्यसे। परमात्मन्! त्वमेव रक्षैनाम-नाथां दीनां क्षत्रिय-कुमारीम्"—इति सकरुणं विललाप।

तदाकर्ण्य सर्वेऽपि चकिताः स्तब्धा अश्रुमुखाश्च संवृत्ताः। कुटीराध्यक्षो ब्रह्मचारी च निजमपि किञ्चिद् बन्धु-वियोगदुःखं स्मारित इव बाष्प-व्रजोद्गम-दुर्दिन-ग्लपित-मुखः कथंकथमपि धैर्यमाधाय वदनं पटेन परिमृज्य पुनरवदधे।

तावत्कुटीराद् बहिः कस्मिंश्चित् कार्ये व्यासक्तो गौरबटुर्विलापे-

---

क्रियाविशेषणानामेकत्वं कर्मत्वञ्च स्वाभाविकप्रायम्।

धर्मराजस्य=वैवस्वतस्य, नगरस्य, **अध्वनि** = मार्गे। **अध्वन्यः**= पान्थः। मरणं न वाच्यमितीत्थं कथयति। **यमलौ**=सह जातौ, **द्वादश-वर्षदेश्यौ** = आसन्नद्वादशवर्षौ। **आखेटे**=मृगयायाम्, व्यसनं ययोस्तौ। **महार्हैः**=बहुमूल्यैः, **भूषणैः**=अलङ्करणैः, भूषितौ।

बन्धुवियोगदुःखं स्मारितः=इष्टविरहक्लेशमनुभावितः;**बाष्पाणाम्**= अश्रूणाम्, **व्रजस्य** = समूहस्य, **उद्गमेन** = प्रादुर्भावेण, यद् **दुर्दिनम्**, तत्तुल्यम्, "मेघच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः, तेन **ग्लपितम्** = ग्लानम्, **मुखम्**=आननम् यस्य सः। अविच्छिन्नाश्रुधाराम्लानमुख इत्यर्थः। **अवदधे**= सावधानोऽभूत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नैतेन कर्णयोराकृष्यमाण इव त्वरितमन्तः प्रविवेश। पौनःपुन्येन दृष्ट्वा च तां कन्यां देवशर्माणं वृद्धं ब्राह्मणश्च, परिपक्व-ताली-दली-भूत-कपोल-पालीकः, उदञ्चितरोममाली, त्वरित-कोष्ण-श्वास-प्रश्वास-शाली, शारदा-शर्वरी-सार्वभौम-किरण-किरणोद्भूतोद्भूत-कीलालाली-व्यालीढ-चन्द्रकान्त-जालीभूत-लोचनः, वाष्पावरुद्ध-कण्ठः, कमपि वृत्तान्तं स्मारित इव कमपि चिरविनष्टं प्रेयांसं प्रापित इव किमपि चिरानुभूतं दुःखं पुनरनुभावित इव च स्मारं स्मारमिव किमपि स्वसमानदशं श्यामवटुं सम्बोध्य कातरेण भज्यमानेन कम्पमानेन च स्वरेणाचकथत्—

"श्याम! श्याम! शृणोषि शृणोषि?" इति

अथ श्यामवटुरपि अश्रुभिः स्नातो गौरस्य करं गृहीत्वा "तात! शृणोमि, सेयं सौवर्णी अस्मद्भगिनी, स चायं पूज्यपादः पुरोहितः" इति कथयन् गौरमपि प्रकटं रोदयन् रुरोद।

परिपक्वं यत्तालीदलं तत्समतामापादिता या **कपोलपाली** = गण्डप्रान्तो यस्य सः। शोकेनेषत्पातगण्डस्थल इति भावः। **उदञ्चिता**—प्रोद्गता, **रोममाला** = लोमावली यस्य सः। इनिः। **त्वरिताभ्याम्** = शैघ्र्ययुताभ्याम्, **कोष्णाभ्याम्** = ईषदुष्णाभ्यां श्वासाभ्यां **शालते** = शोभते। इनिरत्रापि। शरदि भवा **शारदी**, सा चासौ **शर्वरी** = निशीथिनी, तस्याः **शर्वरीसार्वभौमस्य** = शशाङ्कस्य, **किरणानाम्** = दीधितीनाम्, **किरणेन** = क्षेपणेन, **उद्भूतोद्भूतम्** = अत्यन्तं निर्यातम्, यत् **कीलालम्** = पानीयम्, "पयः कीलालममृतमि"त्यमरः, तस्य **आली** = पंक्तिः, तया **व्यालीढः** = भूषितः, यः **चन्द्रकान्तः** = तन्नामा मणिविशेषः, तस्य **जालीभूते** = समुदायभूते लोचने यस्य सः। स्रवद्बाष्प इत्यर्थः। शर्वरी-शर्वरी, किरण-किरणेत्यत्र यमकम्, अनुप्रासस्तु सर्वत्र। प्रसादो गुणः, गौडी रीतिः। **प्रेयांसम्** = अतिशयप्रियम्। **प्रापितः** = लम्भितः। स्वेन **समाना दशा** = अवस्था यस्य तम्। **भज्यमानेन** = त्रुट्यता। **कम्पमानेन** = सवेपथुना। **तात!** =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदाकर्ण्य क्षणं सर्वेऽपि कुटीरस्थाः काष्ठविग्रहा इव चित्र-लिखिता इव च संवृत्ताः ।

देवशर्माऽपि च स्तब्धीभूतामिव कन्यकां तस्मिन्नेव कुशविष्टर उपवेश्य चक्षुषी स्थिरीकृत्य "वत्सौ! किं वीरस्य खड्गसिंहस्य तनयौ युवाम् ?" इति कथयन् वली-पलितौ वार्द्धक्य-वेपमानौ बाहू प्रससार। तौ चाऽऽत्मनः पित्रोरपि पूजनीयं पुरोहितं साष्टाङ्गं प्रणेमतुः । स च कथमप्युत्थाय, उत्थाप्य च तौ, समाश्लिष्य स्वनयन-वारिधाराभिस्तावभ्यषिञ्चत् ।

ततो मुहूर्त्तं यावत्तु परितः प्रसर्पिभिः करुणोद्गार-प्रवाहैरेव पर्यपूर्यत सा कुटी ।

अथ कथमपि रिङ्गत्तुङ्ग-तिमिङ्गिल-गिल-परिवर्त्त-प्रसङ्ग-सङ्ग-सभङ्ग-तरङ्ग-रङ्ग-प्राङ्गण-सोदरीभूतं हृदयं वशीकृत्य, अनुजां सुवर्ण-वर्णां सौवर्णीनाम्ना बाल्य एव प्रसिद्धां कोशलामङ्के संस्थाप्य, समुपविष्टे गौरे श्यामेऽपि च तस्या एव समीपे समुपविश्य तस्या

भ्रातः, वलीपलितौ = जरसा शौक्ल्ययुतकेशौ । अभ्यषिञ्चत् = आर्द्रीकृतवान्, "प्राक्सितादड्व्यवायेऽपी"ति षत्वम् ।

प्रसर्पिभिः=विसारिभिः, करुणोद्गारस्य=करुणरसोद्गमस्य, प्रवाहैः= धाराभिः । उत्प्रेक्षा । पर्यपूर्यत=पूरिताऽभूत् ।

अथ कुटीराध्यक्षो गौरश्यामौ समुवाचेति सम्बन्धः । रिङ्गन् = सञ्चलन्, यः—तुङ्गः = सुमहान्, तिमिङ्गिलगिलः = तन्नामा मत्स्यविशेषः । "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः । तिमिङ्गिल-गिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः" इति हनुमद्वचनम्, तस्य परिवर्तः = पार्श्वपरिवर्तनम्, तस्य प्रसङ्गस्य = अवसरस्य, सङ्गेन = संसर्गेण, सभङ्गानाम् = समुच्छलितानाम्, तरङ्गाणाम् = वीचीनाम्, रङ्गप्राङ्गणस्य=नर्त्तनचत्वरस्य, सोदरीभूतम्=सदृशम् । भृशं व्याकुलं क्षुभितमिति यावत् । हृदयम् = "हृदयं स्वान्तं हृन्मानसं मन" इत्यमरः । अनुप्रासः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एव पृष्ठं परिमृजति पूज्यपादे पुरोहिते च क्रियासमभिहारेणोद्गच्छतो बाष्पान् पटान्तेन परिहरति; कुटीराध्यक्षः कुतुक-परवशः सम्बोध्य गौर-श्यामौ समुवाच—

"वत्सौ गौर-श्यामौ ! जानेऽहं वां क्षत्रियोचिताचारेषु चातन्द्रितौ सनातनधर्म-विप्लवासहनौ नीतिकुशलौ परोपकारव्यसनिनौ दुर्बलात्कार-परायण-तुच्छ-यवन-च्छेदेच्छोच्छलच्छटाच्छन्नौ, बालावप्यबाल-पराक्रमौ, सकल-कला-कलाप-कोविदौ गुणि-गण-गणनीयौ च, किन्तु नाद्यावधि कदापि भवतोर्जन्मस्थानादि-प्रश्न-प्रसङ्गोऽभूत्, आकर्ण्य च भवतोर्दुःखमयमपि विलापमयमपि चाऽऽलापं महत् कुतूहलमस्माकं वर्वर्ति। तत्समाश्वस्य धैर्यमाधाय संक्षेपेण कथ्यतां का भवतोर्जन्मभूः ? कथमत्राऽऽगतौ ? किमेषा सहोदरा स्वसा ? सत्यमेव किं ध्रुवं विरहय्य लोकान्तरं सनाथितवन्तौ युष्मत्पितरौ ? क्व यौष्माकीण-पैतृपितामहिक-सम्पत्तिः ? किं भवतोरुद्देश्यम् ? इत्यादि।"

प्रौढिरर्थगुणः। परिमृजति = हस्तस्पर्शं कुर्वति। क्रियासमभिहारेण = भृशं पौनःपुन्येन च। कुतुकपरवशः=सकौतूहलः।

सनातनधर्मस्य विप्लवासहनौ = विनाशं प्रलयं वा असहमानौ। दुर्बलात्कारे = दुष्टसाहसे, परायणानाम् = निरतानाम्, तुच्छानाम् = नीचानाम्, छेदस्य = खण्डनस्य, इच्छया = अभिलाषेण, उच्छलन्त्या= उद्गच्छन्त्या, छटया=हार्दावस्थाविशेषेण, आच्छन्नौ=व्याप्तौ। अनुप्रासः। अबालपराक्रमौ = महाबलौ। बालौ कथमबालपराक्रमाविति विरोधाभासः। सकलस्य = भेदोपभेदसहितस्य, कलाकलापस्य = कलासमूहस्य, कोविदौ = विज्ञातारौ। गुणिनाम् = कलाविदां, गणे = समुदाये, गणनीयौ = गण्यौ। समाश्वस्य = समाधाय। धैर्यमाधाय = धीरतामानीय। यौष्माकीणा = युष्मत्स्वामिका। पैतृपितामहिकी=वंशपरम्पराप्राप्ता, सम्पत्तिः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदाकर्ण्य चक्षुषी विमृज्य मुखं प्रोञ्छ्य कण्ठं रुन्धतो बाष्पान् कथमपि संरुद्ध्य इन्दीवरयोरुपरि भ्रमतो भ्रमरानिव लोचनयोरञ्चितान् कुञ्चित-कुञ्चितान् मेचकान् कचानपसार्य निस्तन्द्रेण मन्द्रेण स्वरेण गौरसिंहो वक्तुमारभत—

"अस्ति कश्चन धैर्य-धारि-धुरन्धरैः, धर्मोद्धार-धौरेयैः, सोत्साह-साहस-चञ्चच्चन्द्रहासैः, सुशक्ति-सुशक्तिभिः, सद्यश्छिन्न-परिपन्थि-गल-गलच्छोणित-च्छुरित-च्छन्न-च्छुरिकैः, भयोद्भेदनभिन्दिपालैः, स्व-प्रतिकूल-कुलोन्मूलनानुकूल-व्यापार-व्यासक्त-शूलैः, घन-विघ्न-

---

लोचनयोरञ्चितान् केशानपसार्येति सम्बन्धः । उत्प्रेक्षते-इन्दीवरयोः = कमलयोः, उपरि भ्रमतः = ऊर्ध्वं चलतः । भ्रमरानिवेति कचोपमानम् । अपसार्य=अपवार्य । निस्तन्द्रेण=तन्द्राशून्येन, मन्द्रेण=गम्भीरेण ।

अस्ति कश्चन राजपुत्रदेश इति सम्बन्धः । देशं विशिनष्टि-धैर्यधारिधुरन्धरैः = विशालधीरताशालिभिः । धर्मोद्धारे धौरेयैः = अग्रेसरैः । सोत्साहेन = साध्यवसायेन, साहसेन चञ्चन्तः = चलन्तः, चन्द्रहासाः = असयो येषां तैः । सुशोभनायाः अकुण्ठतायाः, शक्तेः = कृपाण्याः, सुशक्तिः = शोभनसामर्थ्यं येषां तैः । सद्यश्छिन्नेभ्यः = तत्कालभिन्नेभ्यः ; परिपन्थिनाम् = शत्रूणाम्, गलेभ्यः = कण्ठेभ्यः गलताम् = स्रवताम्, शोणितानाम्, छुरितैः = बिन्दुभिः, छन्नाः = लिप्ताः, छुरिकाः = असिधेनवो येषां तैः । भयोद्भेदना भिन्दिपाला येषां तैः । भिन्दिपालाः = नालिकास्त्राणि, "पिस्तौल" इति हिन्दी । स्वप्रतिकूलानाम् = शत्रूणाम्, कुलानाम् = अन्वयानाम्, उन्मूलनानुकूलव्यापारेषु = विध्वंसनोचितकर्त्तव्येषु, व्यासक्तानि = संलग्नानि, शूलानि = कुन्ता येषां तैः । घनानाम् = विपुलानाम्, विघ्नानाम् = प्रत्यूहानाम् । शत्रुकृतोपद्रवाणां, विघट्टिकाः = विमर्दिकाः । घर्घराघोषेण = घर्घरध्वनिना, अथवा घर्घर इति आघोषो यासां ताश्च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विघट्टक-घर्घराघोष-घोर-शतघ्नीकैः, प्रत्यर्थि-शुण्डि-शुण्डा-खण्ड-नोद्दण्ड-भुशुण्डीकैः, प्रचण्ड-दोर्दण्ड-वैदग्ध्यभाण्ड-प्रकाण्ड-काण्डैः, क्षत्रिय-वर्यैरार्य-वर्यैय वर्यैरर्य-व्याप्तो राजपुत्र-देशः।

यत्र कोष-पूरिताः काञ्चनमया इव सानुमन्तः, महार्हमणि-गण-जटित-जाम्बूनद-भूषण-भूषिता गन्धर्वा इव जनाः, विचित्र-गवाक्ष-जालाट्टालिकाङ्गण-कपोतपालिका-चत्वर-गोष्ठ-भित्तिका विश्वकर्मरचिता

ताः, **घोराः** = भयावहाः, **शतघ्न्यः**=शतमारिकाः, येषां तैः, शतघ्नी लोके "तोप" इति कथ्यते। णभतुभ-हिंसायामित्यस्मान्निष्पन्न—"तोभ" शब्दापभ्रंशोऽसौ "तोप" शब्द इति "सप्तद्वीपा वसुमती"त्यादिभाष्यतत्त्ववेदिनः। **प्रत्यर्थिशुण्डिनाम्**=शत्रुकरिणाम्, **शुण्डानाम्**=कराणाम्, **आखण्डने**=कर्तने, उद्दण्डा भुशुण्ड्यो येषां तैः। **प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्डानि**=प्रवलबाहुदण्डपाण्डित्यसदनानि। यानि **काण्डप्रकाण्डानि**=प्रशस्तबाणा येषां तैः। "प्रशंसावचनैश्चे" ति प्रकाण्डपदस्य परनिपातः, प्रकाण्डं क्लीबमजहल्लिङ्गम्। **आर्येषु वर्यैः** = ब्राह्मणश्रेष्ठैः। क्षत्रियाणां प्रथमोच्चारणं तु तेषामेव तत्राधिक्यप्रदर्शनार्थम्, संग्रामे तेषामेव प्राबल्यप्रबोधनार्थञ्च। ब्राह्मणा अपि देशरक्षणार्थं सन्नद्धा एवासन्निति तत्त्वम्। **अर्याः** = वैश्याः। "अर्यः स्वामिवैश्ययोः"विश्वः। **कोषपूरिताः**=निधानपूर्णाः। **काञ्चनमया इव**=हिरण्मया इव। **सानुमन्तः** = शिखरिणः। **महार्हाणाम्**=बहुमूल्यानाम्, **मणीनाम्** = हीरकादीनाम्, **गणेन**=समूहेन, **जटितैः** = मिलितैः, **जाम्बूनदभूषणैः** = सुवर्णालंकरणैः, **भूषिताः**=शोभिताः। **गन्धर्वा इव**=देवयोनिविशेषा इव। **विचित्राः** = विविधा गवाक्षाद्या येषु तादृशाः। **गवाक्षः** = वातायनम्, "झरोखा" इति हिन्दी। **जालम्** = वायुप्रवेशार्थमार्गः, "जाली" इति हिन्दी। **अट्टालिका** = प्रस्तरादिनिर्मितं महासदनम्। **अङ्गणम्**=अजिरम्। **कपोतपालिका** = काष्ठरचितं पक्षिवासस्थानं विटङ्कम्। **चत्वरम्** = लक्षणया चतुष्पथबोधकम्। अङ्गणस्य पृथगुच्चारणेन नात्र तद्वाचकतेति वेदितव्यम्। **गोष्ठम्** = गोशाला। **भित्तिः**=कुड्यं येषां ते। **विश्वकर्मणा**=देवशिल्पिना, **रचिता इव**=निर्मिता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इव गृहाः, सादि-करस्थ-कशाग्र-चालन-सङ्केत-सञ्चलित-सप्ति-समूह-शफ-सम्मर्द-समुद्धूत-धूलि-धूसरिताश्च मार्गाः । अस्ति तस्मिन्नेव राजपुत्रदेशे उदयपुरनाम्नी काचन राजधानी, यत्रत्याः क्षत्रियकुल-तिलका यवनराज-वशंवदता-कर्दम-सम्मर्दैर्न कदाऽप्यात्मानं कलङ्कयामासुः" इति कथयत्येव गौरसिंहे; ब्रह्मचारिगुरुरपि कोष्णं निःश्वस्य,-

"को न जानीते उदयपुर-राज्यम् ? यदीय-चित्रपर- दुर्गे पर-स्सहस्राः क्षत्रिय-कुलाङ्गनाः, कमला इव विमलाः, शारदा इव विशारदाः, अनसूया इवानसूयाः, यशोदा इव यशोदाः, सत्या इव

इव । **सादिकरस्थानाम्**=अश्वारोहहस्तस्थितानाम्, **कशानाम्**=अश्वताडनीनाम्, **अग्रस्य** = प्रान्तस्य, **चालनसङ्केतेन** = धावनप्रेरणेन, **सञ्चलितस्य** = गच्छतः, **सप्तिसमूहस्य**=वाजिनिवहस्य, **शफसम्मर्दैः** = खुरकुट्टनैः, **समुद्धूताभिः**=उच्छलिताभिः, **धूलिभिः**=रजोभिः, **धूसरिताः** =ईषच्छुभ्राः । "ईषत्पाण्डुस्तु धूसरः" इत्यमरः । यवनराजवशंवदतैव कर्दमः तत्सम्मर्दैः=तल्लेपैः । न **कलङ्कयामासुः**=न सदूषणं चक्रुः ।

चित्रपूरदुर्गे="चित्तौड़ गढ़" इति नितरां प्रसिद्धे । केचित् "चित्रकूट"शब्दापभ्रंशं मन्यन्ते "चित्तौड़" शब्दम् । भगवद्रामभद्रतनयलववंशीया हि भूमिपाला उदयपुरीया इति रामविपिनचित्रकूटनाम्ना तत्प्रसिद्धतायामनुकूलस्तर्कः । अमरमङ्गले तर्करत्नभट्टाचार्यास्तु चितम् व्यूढम्, उरो यस्येति व्याख्याय "चितोरः" शब्दमेवाग्रहन्निति वेदितव्यम् । **कमला इव**=श्रिय इव । "कमला श्रीर्हरिप्रिये" त्यमरः । **शारदाः**=सरस्वती । **विशारदाः** = पण्डिताः । शारदा कथं विगतशारदेति विरोधाभासः । **अनसूया** = अत्रिपत्नी । **अनसूयाः** = असूयारहिताः । **असूया** = गुणेषु दोषाविष्करणम् । **यशोदाः** = कृष्णमाता । **यशोदाः** = यशोदायिन्यः । न केवलं पतिव्रताभिस्तासामेव कीर्तिरेधतेऽपि तु तत्पतीनामपि । "व्यालग्राही यथा व्यालं बिलादुद्धरते बलादि"ति मानवश्च शासनमत्र भवति । **सत्याः** = सत्यभामाभिधाना श्रीकृष्णपत्नी,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्याः, रुक्मिण्य इव रुक्मिण्यः, सुवर्णा इव च सुवर्णाः, सत्य इव सत्यः, सम्भाव्यमान-यवन-बलात्कार-धिक्कारोर्जस्वल-तेजस्काः योगाग्निनेव पतिविरहाग्निनेव स्वक्रोधाग्निनेव च सन्दीपितासु ज्वाला-जालाञ्चितासु चितासु, स्मारं स्मारं स्वपतीन् पश्यतामेव स्वकीयानां परकीयाणां च क्षणात् पतङ्गतामङ्गीकृत्य, गङ्गाधरस्याङ्ग-भूषणतामगमन्"–इति मन्दं व्याजहार।

तदाकर्ण्य करुणया दुःखेन कोपेन आश्चर्येण वैमनस्येन ग्लान्या च क्षालित-हृदयेषु निखिलेषु, गौरसिंहः पुनः स्व-वृत्तान्तं वक्तुमुप-चक्रमे यत्—

नामैकदेशग्रहणन्यायात्। **सत्याः** = सत्यभामिण्यः। "अर्श आद्यजन्तम्"। **रुक्मिण्यः**=कृष्णपत्नी। **रुक्मिण्यः**=सुवर्णवत्यः। **सुवर्णा इव**=कनक-पदार्था इव। **सुवर्णाः**=शोभनवर्णवत्यः। सुन्दर्य इति यावत्। **सती** = शङ्करगेहनी। **सत्यः** = पतिव्रताः। "सती साध्वी पतिव्रता" इत्यमरः। यशोदादिषु व्यक्तिमात्रवाचकेषु बहुत्वं गौरवप्रदर्शनाय, तन्मुखेनोपमानोमेय-भावनिर्वाहाय च। **सम्भाव्यमानस्य** = समनुचिन्त्यमानस्य, यवनबलात्का-रस्य, **धिक्कारे** = तिरस्करणे, **ऊर्जस्वलम्** = बलवत्, तेजो यासां ताः। **सन्दीपितासु** = सुप्रज्वलितासु। कीदृशाग्निहेतुकं प्रज्वलनमित्युत्प्रेक्षते— **योगाग्निनेव** = योगसामर्थ्यात्समुत्पन्नेनाग्निनेव। **पत्युर्विरहा**ज्जायमानेन वह्निनेव। स्वक्रोधादुद्भूतदहनेनेव। **ज्वालाजालाञ्चितासु**=कीलसमूहसम-वेतासु। **पतङ्गताम्**=शलभताम्। **गङ्गाधरस्याङ्गभूषणम्**=भस्म, तद्भा-वम्, भस्मताम्।

"पतिलोकमभीप्सन्ती" त्यादिभिः पतिलोकप्राप्तेः फलस्य प्रदर्शितत्वेऽपि शिवधामप्राप्त्याद्यर्थोऽपि उपलक्षणविधया घटत एवेति मन्तव्यम्।

करुणया क्षालितहृदयेष्वित्यादिरूपेण तृतीयान्तषट्कस्य क्षालनेऽन्वयः, क्षालनञ्चात्रोपचारेण व्यापनार्थकम्, करुणाद्यतिशयव्यञ्जनाय च तदाश्रयणम्, दीपकालङ्कारः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तद्राज्यस्यैवान्यतमो भू-स्वामी खड्गसिंहो नामास्मत्तात-चरण आसीत् ।

खड्गसिंहनाम्ना परिचित इव ब्रह्मचारी समधिकमबाधित । स च पूर्ववदेव वक्तुं प्रावृतत् ।

अस्मज्जननी तु बालावेवाऽऽवां स्तनन्धयामेव चास्मत्सहोदरां सौवर्णीं परित्यज्य, भुवं विरहयाम्बभूव । अस्मत्तातचरणश्च कैश्चित्तुरुष्कैर्लुण्ठकप्रायैर्युद्ध-क्रीडां कुर्वन् पृष्ठतः केनापि विशालभल्लेनाऽऽहतो वीरगतिमगमत् । ततः पुरोहितेनैव पाल्यमानावावामपि यमलौ भ्रातरौ गौर-श्यामौ एकदा मित्रैः सहाऽऽखेटार्थं निःसृतौ तुरगौ चालयन्तौ मार्ग-भ्रष्टौ अकस्मात् काम्बोजीय-दस्युवारेणाऽऽवृतौ तेनैवापहृत-महार्ह-भूषणौ गृहीताश्वौ बद्धौ च सहैव वनाद्वनमनायिष्वहि । "यद्यपि शत्रुसन्ताना निर्दयं हन्तव्या एव; तथापि नासा-भूषण-मौक्तिके इव वीणा-तुम्बाविव श्यामकर्ण-हयाविव च मनोहर-रूपौ समानाकारौ समानवयस्कौ समान-परिणाहौ समानस्वभावौ समान-स्वरौ समान-गुणौ केवलं वर्णमात्रतो भिन्नौ रामकृष्णाविवामू गौर-श्यामौ बालकौ । तदवश्यं बहुमूल्याविति कुत्रापि कस्य-

---

समधिकम् = अत्यन्तम् , अबाधित = पीडामन्वभूत् । प्रावृतत् = प्रवृत्तः । स्तनन्धयाम्=पयःपानरताम् । शिशुमित्यर्थः । विरहयाम्बभूव= परितत्याज । तुरुष्कैः = "तुर्क" इति हिन्दी । वीराणां गतिम्=मोक्षम् ।

"द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥" इति स्मृतिः ।

यमलौ=सहजौ । "जुड़वाँ" इति हिन्दी । मार्गभ्रष्टौ=विस्मृतमार्गौ । काम्बोजीयदस्युवारेण = कम्बोजदेशीयतस्करसमूहेन । अपहृतमहार्ह-भूषणौ = लुण्ठितबहुमूल्यालंकरणौ । अनायिष्वहि = नीतौ । शत्रुसन्तानाः = रिपुवंशाः । "वंशोऽन्ववायः सन्तान" इत्यमरः । समानपरिणाहौ = समविशालतौ । वर्णमात्रतो भिन्नौ, ज्येष्ठस्य शुभ्रत्वात् कनिष्ठस्य च श्यामलत्वात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चिदपि महाधनस्य हस्ते विक्रयणीयौ" इति तेषां घोरतरान् सँल्ला-पान् शृण्वन्तौ "कथं पलायावहे ? कथं वा मुच्यावहे ?" इत्यनव-रतं चिन्तयन्तौ कथं कथञ्चित् कञ्चित् समयमयापयाव ।

अथैकदा कञ्चित्पान्थ-सार्थमवलोक्य तल्लुलुण्ठयिषया सर्वेष्वपि तस्य पन्थानमेवानुसृतेषु आवाभ्यामपि पलायनावसरो लब्धः । यावच्चाऽऽवां वस्त्राणि परिधाय, परिकरे असिधेनुकां बद्ध्वा बाहु-मूले निस्त्रिंशं चर्म्म च लम्बयित्वा, तद्भुशुण्डिकानामेवैकामेकामल्पी-यसीमात्मोत्तोलन-योग्यां सज्जां करे धृत्वा, उपकारिकाया बहिर्निर्गतौ; तावद् दृष्टम्-यदेको रक्षकः खड्गहस्तो नौ बहिर्गमनाद् वारयतीति ।

अथाऽऽवाभ्यां भुशुण्डिकां सन्धायोक्तम्-"अलमलं कदर्य ! किमप्यधिकं वक्ष्यसि तत्स्थानात्पादमेकमपि च प्रचलिष्यसि चेत् ; क्षणेन परेतपति-पालित-पुरी-पान्थं विधास्यावः" इत्याकलय्य भयेन काष्ठभूते तस्मिन् मूढ-रक्षके; मयि च तथैव बद्ध-लक्ष्ये स्थिते; मदि-ङ्गितानुसारेण श्यामसिंहस्तस्या एवोपकार्य्यायाः प्रान्ते बद्धानां फेनवर्षिणामश्वानां कौचिच्चण्डवेगौ श्यामकर्णावाजानेयौ उन्मुच्य,

---

पान्थसार्थम् = पथिकव्रजम् । **तल्लुलुण्ठयिषया**=तस्य पान्थसार्थस्य धनापजिहीर्षया, **परिकरे** = गात्रबन्धे । "भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः । प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपी"ति विश्वः । **असिधेनुकाम्**=छुरिकाम्, "छुरिका चासिधेनुके"त्यमरः । **बाहुमूले** = कक्षे, **निस्त्रिंशम्** = खड्गम् । **आत्मोत्तोलनयोग्याम्** = स्वोत्थापनार्हाम् । **सज्जाम्** = गोलिकापूर्णाम् । सिद्धामिति यावत् । **उपकारिकायाः** = पटभवनात् । "उपकार्योपकारिके"-त्यमरः । "तम्बू" इति हिन्दी ।

परेतपतिना = यमेन, **पालितायाः** = रक्षितायाः, **पुर्याः पान्थम्** । मूढश्चासौ रक्षकः, तस्मिन् । भयेन, काष्ठभूते "डर से काठ हुए" इति भाषायां किञ्चिदकुर्वाणः कोलाहलमपि नाकर्षीदिति मूढत्वम् । **फेनवर्षिणाम्**, भोजन-कालोपस्थितात् सुखोपविष्टाः फेनं वमन्त्यश्वा इति स्वभावः । **आजानेयौ** = कुलीनौ । "शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदे पदे । आजानन्ति यतः संस्था-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वल्गामायोज्य सर्वतः सज्जीकृत्य चैकमारुह्य रक्षकोपरि भुशुण्डिकां तथैव सज्जीकृतवान्। ततश्चाहमप्यपरं हयमारुह्य तस्य ग्रीवामास्फोट्य नर्तयन् रक्षकं साम्रेडं तर्जनैर्हतोत्साहं मृतप्रायं च विधाय, श्यामसिंहमिङ्गितवान्।

अथाऽऽवां द्वावपि वायुवेगाभ्यामश्वाभ्यामज्ञातेनेव पथा, उपत्यकात उपत्यकाम्, वनाद् वनम्, प्रान्तराच्च प्रान्तरमुल्लङ्घमानौ तेनैव दिनेन गव्यूति-पञ्चकं प्रयातौ। सायं समये च कामपि ग्रामटिकामासाद्य अन्यतमस्य गृहस्य द्वारं गतौ। तच्च हनुमन्मन्दिरमवगत्य तस्मिन् प्रविष्टौ तदध्यक्षेण केनचित् साधुना च सस्वागतमाग्रहेण वासितौ, तत्रैव निवासमकृष्वहि।

अथ तत्प्रदत्तमेव हनूमत्प्रसादीभूतं मोदकादि समास्वाद्य, तस्यैव भृत्येनाऽऽनीतं यवस-भारं वाजिनोरग्रे पातयित्वा, मन्दिरस्यैव वहिर्वेदिकायामितस्ततः पर्यटन्तौ मुहूर्त्तमावामवास्थिष्वहि।

ततश्च दुग्धधाराभिरिव प्रथमं प्राचीं संक्षाल्य, भसितच्छुरितामिव विधाय, चन्दनैरिव संचर्च्य,कुन्द-कुसुमैरिवाऽऽकीर्य,गगन-

---

माजानेयास्ततः स्मृताः ॥" इत्यश्वशास्त्रम्। तर्जनैः=भर्त्सनैः। इङ्गितवान्=चेष्टया बोधितवान्, गन्तुमिति शेषः।

पथा = मार्गेण, **प्रान्तरम्** = दूरशून्यो मार्गः। "प्रान्तरं दूरशून्योऽध्वे"त्यमरः। "पान्तर" इति हिन्दी। **वासितौ** = स्थापितौ।

यवसभारम् = घासभारम्। **अवास्थिष्वहि**=स्थितौ, "समवप्रविभ्यः स्थ" इत्यात्मनेपदम्।

ततश्च समुदिते चैत्रचन्द्रखण्डे परितो हक्पातमकार्षमिति सम्बन्धः। सुधादीधितिदीधितिभिर्भासितत्वमुत्प्रेक्षते-दुग्धधाराभिरिवेति। **भसितम्** = भस्म, "भूतिर्भसितभस्मनी" इत्यमरः। **तच्छुरितामिव** = तद्रूषितामिवेत्युत्प्रेक्षा, **संचर्च्य** = अनुलिप्य। देवीं विधिवत्संपूज्य जना उदयं प्राप्नुवन्ति यथा तथा सुधादीधितिः प्राचीं संपूज्योदयं लेभ इति ध्वनयति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सागर-मीने इव, मनोज-मनोज्ञ-हंसे इव, विरहि-निकृन्तन-रौप्य-कुन्त-प्रान्ते इव, पुण्डरीकाक्ष-पत्नी-कर-पुण्डरीकपत्रे इव, शारदाभ्र-सारे इव, सप्तसप्ति-सप्ति-पाद-च्युते राजत-खुरत्रे इव, मनोहरता-महिला-ललाटे इव, कन्दर्प-कीर्तिलताङ्कुरे इव, प्रजा-जन-नयन-कर्पूरखण्डे इव, तमी-तिमिर-कर्त्तन-शाणोल्लीढ-निस्त्रिंशे इव च समुदिते चैत्र-चन्द्र-खण्डे, तत्प्रकाशेन स्फुटं प्रतीयमानासु सर्वासु दिक्षु, अहं परितो दृक्पातमकार्षम्, अद्राक्षं च यदुत्तराभिमुखं तद् विशालं मन्दिरमस्ति-तद्द्वारस्योभयतः सुधालिप्त-भित्तिकायां विशालैः सिन्दूराक्षरैः

चन्द्रखण्डं विशिनष्टि–गगनम् = नभः तदेव सागरः = समुद्रः तस्य मीने = मत्स्य इवेति रूपकानुविद्धोत्प्रेक्षा। मनोजस्य = मनसिजस्य, मनोज्ञे = चेतोहरे, हंस इव। विरहिणाम्=वियोगिनाम्, निकृन्तनाय= कर्त्तनाय, रौप्यस्य = रजतवदवभासमानस्य, कुन्तस्य = भल्लस्य, प्रान्त इव। पुण्डरीकाक्षपत्न्याः=विष्णुस्त्रियाः, लक्ष्म्याः, करपुण्डरीकपत्रे= हस्तस्थकमलदले। शरदि भवं शारदम्, अभ्रम् = मेघः, तस्य सारे =तत्तत्त्वांशे। सप्तसप्तिः = सूर्यः, तस्य सप्तिः = अश्वः। तत्पादच्युते = तत्पादपतिते। राजते = रौप्ये च तस्मिन् खुरत्रे = "नाल" इति लोके ख्याते। मनोहरस्य भावो मनोहरता = सुन्दरता, सैव महिला = वनितेति रूपकम्, तल्लाटे। सुन्दर्याः स्त्रिया ललाटं चन्द्रार्धखण्डसदृशमिति सुप्रसिद्धमुपमानोपमेयविदाम्। कन्दर्पकीर्त्तिरेव लता=व्रततिः, तदङ्कुर-तुल्ये। शशाङ्केन हि कन्दर्पकीर्तिर्वर्ध्यते। प्रजाजननयनानाम्, कर्पूर-खण्डे = हिमवालुकाखण्डे। तमीतिमिरकर्त्तनाय=रात्र्यन्धकारनाशाय। शाणेन = कषेण, उल्लीढे = तेजिते, निस्त्रिंशे = खड्गे। यद्यपि खड्गधाराश्यामतावर्णनमेव कविसमयख्यात्यनुकूलम्, तथापि शाणोल्लीढत्वस्य चमत्कृतिविशेषाधायकत्वेनेह इत्थमभिहितमिति वेदितव्यम्। प्रतीयामानासु = दृश्यमानासु। सुधया=चूर्णेन, "चूना" इति हिन्दी, लिप्तायां भित्तिकायाम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'जयति हनुमान्' 'रामदूतो विजयतेतराम्' 'विजयतामन्नयकारी' इति बहूनि वाक्यानि गदादि-चिह्नानि च लिखितानि सन्ति । तत उत्तरस्यामेकः स्वल्पः शैलखण्डः, पूर्वस्यां गहनं वनम् , पश्चिमायां च स्वल्पमेकं पल्वलमासीत् । यद्यप्यसौ पर्वत-खण्डो नात्यन्तं भयानक इव, तथापि विविधगण्डशैलावृतः, झर-झर्झर-ध्वनि-पूरित-दिगन्तरालः, महीरुह-समूह-समावृतः, उच्चावच सानु-प्रचय-सूचित-विविधकन्दरश्चाऽऽसीत् । चन्द्र चन्द्रिका-चाकचक्यात् स्फुटमवालोक्यन्तैतस्योपत्यकाः ।

ततश्च झिल्ली-झङ्कारेणेव केनचित् विलक्षणेन अनाहतध्वनिनेव पर्य्यपूर्यत वसुधा,विचित्र एष कश्चन परस्सहस्र तानपूर-षड्जस्वर-सोदरो वन-रात्रि-ध्वनिः, तमेव स्वरं गम्भीरं विशकलय्य आकर्णयता समश्रावि कीचकध्वनिरपि, तत्राप्यवदधता साक्षादकारि मधुकर-

---

अतिशयेन विजयते **विजयतेतराम्** , "तिङश्चेति" तरपि 'किमेत्तिङव्यये" त्याम् । **पल्वलम्** = अल्पोदकं सरः । **झरस्य** = वारिप्रवाहस्य, "वारिप्रवाहो निर्झरो झर" इत्यमरः । झर्झरध्वनिना पूरितानि दिगन्तरालानि यस्य सः । **महीरुहाणाम्** = वृक्षाणाम् , **समूहेन समावृतः**=आच्छन्नः, अतिघनीभूतवृक्षक इति भावः । **उच्चावचानाम्** = निम्नोन्नतानाम् , **सानूनाम्** = अद्रिनितम्बानाम् , **प्रचयेन** = समूहेन, **सूचिताः** = प्रकटीकृताः, **विविधाः** = अनेकाः, कन्दरा यस्य सः । **चन्द्रचन्द्रिकाचाकचक्यात्** = ज्योत्स्नादीप्तेः ।

झिल्ली = भृङ्गारी, तस्याः **झङ्कारेण** । रात्रावदृश्या स्वनति झिल्ली प्रावृट्काले । **विलक्षणेन** = विजातीयेन । **अनाहतध्वनिना** = अव्यक्तशब्देन, इवेन तुल्यत्वम् । वास्तविकोऽनाहतध्वनिस्तु योगिगम्य एव । **परस्सहस्राणाम्** , तानपूराणां यः षड्जस्वरः, **तत्सोदरः**=तत्तुल्यः । **विशकलय्य** = विविच्य । **कीचकध्वनिः** = वेणुविशेषशब्दः । "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता" इत्यमरः । **समश्रावि**=श्रुतः । **अवदधता**=ध्यानं ददता । **साक्षादकारि**=प्रत्यक्षीकृतः । **मधुकरनिकरझङ्कारः**=द्विरेफव्रातगुञ्जनम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निकर-झंकारः, पुनरेकाग्रतामङ्गीकुर्वता समाकर्णि स्रोतस्संसरण-सरत्कारः, तस्मिन्नपि च लयमिवाऽऽकलयता समन्वभावि समीरणेरित-किशलय-परिप्लवता-प्रभूत स्वनः, तत्रापि च स्थिरतां बिभ्रता प्रत्यक्षीकृतं सुधा-धारामप्यधरीकुर्वत्, वीणा-रणनमपि विगणयत्, मधु विधुरयत्, मरन्दं मन्दयत्, कल-काकली-कलन-पूजितं कोकिल-कुल-कूजितम्! ततश्च बहूनामेव मधुर-कण्ठानां वन्य-पतत्रिणां स्थगित-मन्थराऽऽरावाः समाकर्णिषत। अथानुभवन् धीर-समीर-स्पर्श-सुखम्, साम्रेडमवलोकयंश्च तारकितं नभः, स्मारं स्मारं स्वगृहस्य, महाचिन्ता-पारावारे इवाहं न्यमाङ्क्षम्। ततः पृष्ठतो भित्तिकामाश्रित्य, करौ कटि-प्रदेशे संस्थाप्य, साम्मुखीन-शिखरि-

---

एकाग्रताम् = एकचित्तताम्। **अङ्गीकुर्वता** = स्वीकुर्वाणेन। स्रोतसाम्, **संसरणस्य**=वहनस्य। सवेगचलनस्येति भावः। **सरत्कारः**=सरदित्यनुक्रियमाणः शब्दः। **आकलयता**=सम्मेलयता। **समीरणेन** = पवनेन, **समीरितानाम्**=सञ्चालितानाम्, **किशलयानाम्**=पल्लवानाम्, **पारिप्लवतया** =स्फुरमाणतया, **प्रभूतः**=प्रचुरः, स्वनः। तत्रापि स्थिरतां बिभ्रता प्रत्यक्षीकृतं कोकिलकुल-कूजितमिति सम्बन्धः। कूजितं विशिनष्टि-**सुधाधारामिति**। **अधरीकुर्वत्** = निम्नांशे स्थापयत्, ततोऽपि मधुरतरमिति भावः। **विगणयत्** = अभिभवत्। **मधु** = क्षौद्रम्। **विधुरयत्** = तिरस्कुर्वत्। **कला** = मधुरा, या **काकली** = सूक्ष्मोऽव्यक्तध्वनिः, "काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुट" इत्यमरः, तस्याः **कलनेन** = अनुरणनेन, **पूजितम्** = सत्कृतम्। **स्थगितमन्थराः** = मान्थर्यशून्याः। **आरावाः**=शब्दाः। **समाकर्णिषत** = श्रुताः। कर्मणि के। तारकाः संजाता अस्मिन्निति **तारकितम्** = उडुगणसमेतम्। "तदस्य संजातं तारकादिभ्य इतच्"। **स्वगृहस्य**, "अधीगर्थदयेशां कर्मणी"ति षष्ठी। महतीनां चिन्तानां **पारावारे** = समुद्रे। **न्यमाङ्क्षम्** = निमग्नोऽभवम्। करयोः कटिप्रदेशे संस्थापनं चिन्तामुद्रा। **साम्मुखीनशिखरिशिखरे** =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिखरे चक्षुषी स्थिरयित्वा, आत्मानमपि विस्मृत्य व्यचारयं यत्—

अहह ! दुरदृष्टोऽस्मि !! धन्यावावयोः पितरौ; यौ सुखिनावेवाऽऽवां परित्यज्य दिवं सनाथितवन्तौ, न तयोरदृष्टे पुत्र-विश्लेष-दुःखं व्यलेखि धात्रा। नितान्तं पापिनौ चाऽऽवाम् ;यौ बाल्य एवेदृशीषु दुरवस्थासु पतितौ। का दशा भवेत् साम्प्रतमावयोरनुजायाः सौवर्ण्याः ? हन्तः !! हतभाग्या स बालिका, या अस्मिन्नेव वयसि पितृभ्यां परित्यक्ता, आवयोरप्यदर्शनेन क्रन्दनैः कण्ठं कदर्थयति। अहह ! सततमस्मत्क्रोडैक-क्रीडनिकाम् , सततमस्मन्मुख-चन्द्र-चकोरीम् , सततमस्मत्कण्ठ-रत्नमालाम् , सततमस्मत्सह-भोजिनीम् , बाल्य-लुलितैः, मधुर-मधुरैः, सुधा-स्यन्दनैः, दाद-दादेति-भाषणैः, आवयोर्हृदयं हरन्तीम् , क्षणमात्रमस्मदनवलोकनेनापि बाष्प-प्रवाहैः कपोलौ मलिनयन्तीम् , कथमेनां वृद्धः पुरोहितः सान्त्वयिष्यति ? अस्मज्जनकाविशेषः पुरोहित एव वा कथं नौ विना जीविष्यति ? परमेश्वर ! तथा विधेहि, यथा जीवन्तं वृद्धं पुरोहितं सौवर्णीं साक्षात्कुर्वः—

पुरोवर्त्तिपर्वतश्रृङ्गे । **आत्मानमपि विस्मृत्य,** विचारैकतानताध्वननायेदम् । लोकोक्तिरेषा ।

क्रन्दनैः = रोदनैः । "क्रन्दने रोदनाह्वाने" इत्यमरः । **कदर्थयति** = दूषयति, अस्मत्क्रोडमेवैकं **क्रीडनकम्**=खेलसाधनम्, "खिलौना" इति हिन्दी यस्यास्ताम् । अस्मन्मुखचन्द्रस्य **चकोरीम्** , चकोरी यथा चन्द्रमसं निभालयति तथैव साऽस्मन्मुखम् । **सुधास्यन्दनैः** = अमृतप्रस्रवणैः, **दाद-दादेति** = "तात तात" इति संस्कृतम् , तदपभ्रंशः । प्राकृते ताद तादेति । अस्माकम् , **जनकाविशेषः** = पितृतुल्यः । **नौ**=आवाम् । "षष्ठीचतुर्थीद्वितीयास्थयोर्वानावौ" इत्यनेन नावादेशः, "पृथग्विनानानाभिस्तृतीयान्यतरस्यामि"ति समुच्चयाद् द्वितीया । **सौवर्णीम्** , चं विनाऽपि समुच्चयः, "गौरश्वः, पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इती"ति भाष्यादनुमीयते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति चिन्ता-चक्रमारूढ एव आत्मानं विस्मृत्य भित्तिकासंसक्त एव शनैरस्खलम्। प्राप्तसञ्ज्ञश्च समपश्यं यत् श्यामसिंहो मन्दिरपूजकाश्च मामुत्थापयन्ति—इति।

अथाऽऽवां तेन साधुना मन्दिरस्यान्तर्नीतौ महावीर-मूर्ति-समीपे चोपवेशितौ।

ततोऽवलोक्य तां वज्रेणेव निर्मिताम्, साकारामिव वीरताम्, गदामुद्यम्य दुष्ट-दल-दलनार्थमुच्छलन्तीमिव केशरि-किशोर-मूर्तिम्, न जाने कथं वा कुतो वा किमिति वा प्रातरन्धकार इव वसन्ते हिम इव बोधोदयेऽबोध इव ब्रह्मसाक्षात्कारे भ्रम इव च झटित्यपससार आवयोः शोकः। प्राकाशि च हृदये यद्—

"अलं बहुल चिन्ताभिः! कश्चन पुरुषार्थः स्वीक्रियताम्, न खलु बुद्ध्यतां यदावामेव दुरदृष्टवशात् त्यक्त-कुटुम्बौ वने पर्य्यटावः—इति, किन्तु कोशलेश्वरतनयौ राम-लक्ष्मणावपि चतुर्दशवर्षाणि यावद् दण्डकारण्ये भ्रान्तवन्तौ।"

ततः साधोश्चरणयोः प्रणम्य मयोक्तम्—भगवन्! नास्त्यविदितं किमपि भवादृशानां सदाचार दृढव्रतिनाम्। तत्कथ्यतां किमावां करवाव? कुतो गच्छाव? कथमावयोः श्रेयःसम्पत्तिः स्याद्? इति।

भित्तिकासंसक्त एव=कुड्यसंलग्न एव। **शनैः**=मन्दं, **अस्खलम्** = अपतम्। **प्राप्तसंज्ञः** = प्राप्तचेतनः।

वज्रेण = इन्द्रायुधेन। **साकाराम्**=शरीरधारिणीम्। **केशरि-किशोरस्य** = केशरितनयस्य, **मूर्तिम्**, हनूमत्प्रतिमाम्। **झटित्यपससार शोकः**, इदमेव मूर्तिपूजारहस्यम्। हनुमद्दर्शनेन रामलक्ष्मणस्मरणं तयोश्च स्मरणेन तद्वनवासादीनाम्। **प्राकाशि** = स्फुरितम्।

श्रेयःसम्पत्तिः = कल्याणावाप्तिः। **काष्ठपट्टिकायाम्**=दारु-फलके। "काठ की पटरी" इति हिन्दी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततो हनुमत्पूजकेन सर्वमस्मद्वृत्तान्तं पृष्ट्वा ज्ञात्वा च काष्ठपट्टिकायां घृतोन्मथित-सिन्दूरेण किमपि यन्त्रमिवोल्लिख्य, चन्दनैः संचर्च्य, कुसुमैराकीर्य, धूपेन धूपयित्वा, किमपि क्षणं ध्यात्वेव च मम हस्ते पूगीफलमेकं दत्त्वा, "वत्स! अस्मिन् यन्त्रे कस्मिन्नपि कोष्ठे यथारुचि क्रमुकफलमिदं स्थापय" इत्यवाचि। तत एकतमे कोष्ठे निहित-क्रमुके मयि मुहूर्त्तं अङ्गुलिपर्वसु किमपि गणयित्वेव स मामवादीत्—

वत्स! कदाऽपि मा स्म गमो गृहं प्रति, यतो मार्गे पर्वततटीषु अरण्यानीषु च बहवः काम्बोजीया यवन-दस्यवो भवतोर्ग्रहणाय विचरन्ति। दस्युभिः क्रियासमभिहारेण चङ्क्रम्यमाणं देशमवलोक्य भवद्ग्रामवासिनः सर्वेऽपि स्वं स्वमालयं परित्यज्य इतस्ततो गताः।

"ततः सौवर्णि! सौवर्णि! पुरोहित! पुरोहित!" इति सक्षोभं व्याहृतवतोरावयोः पुनः स साधुरवोचद्, यत्—

पुरोहितोऽपि युष्मद्रत्नादिनिधिं क्वचन सङ्केतित-भूमि-कुहरे स्थापयित्वा, एकां धात्रीं दास-चतुष्टयमेकं चाश्वं सह नीत्वा महाराष्ट्र-पञ्चानन-परिपूरितां कोङ्कणभूमिं प्रति प्रस्थितः।

तदाकलय्य, "सत्यं सत्यमेवमेवम्" इति समस्तकान्दोलनं

घृतेन = सर्पिषा, **उन्मथितम्** = मेलितम्, सिन्दूरं तेन। "महावीरी" प्रश्नप्रथेयम्। **अङ्गुलिपर्वसु** = हस्ताङ्गुलिग्रन्थिषु।

मास्म गमः = मा याहि। **अरण्यानीषु** = महारण्येषु।

सङ्केतितभूमेः **कुहरे** = विवरे। "कुहरं गह्वरे छिद्रे क्लीवं नागान्तरे पुमानि"ति कोषः। **धात्रीम्** = उपमातरम्। "धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपी"त्यमरः। महाराष्ट्रा एव **पञ्चाननाः** = सिंहाः, तैः **परिपूरिताम्** = भरिताम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वीकृतवति पुरोहिते; 'ततस्ततः' इति मुखरीभूतेषु च कुटीरस्थ-सकल-जनेषु, भूयस्तदुक्तिं व्याजहार गौरसिंहो यद्—

न शोचनीयं भवद्भ्यां किमपि तयोर्विषये, गन्तव्यं च तस्मिन्नेव शिववीराधिष्ठिते गिरि-गरिष्ठे कोङ्कणदेशे, कियत्समयानन्तरं तत्रैव भगिन्या पुरोहितेन च सह साक्षात्कारोऽपि भविष्यतीति प्रावोचत्।

ततस्तु भ्रमर झङ्कारेणेव "अहो ! अहो ! आश्चर्यमाश्चर्यम्, धन्यो मन्त्राणां प्रभावः, धन्यमिष्टबलम्, चित्रा धर्मनिष्ठा, अवितर्क्यस्तपःप्रतापः, विलक्षणा नैष्ठिकी वृत्तिः" इति मन्द्र-स्वर मेदुरेण श्रोतृजन-वचन-कलापेन झङ्कृते तस्मिन् निकुञ्जे; "ततः कथं प्रचलितौ ? कथमत्राऽऽयातौ ? का घटना घटिता ? क उपायः कृतः ? किमाचरितम् ?" इति कुतूहल-परवशे विस्फारितनयने उद्ग्रीवे समनुकूलितकर्णे विस्मृतान्यकथे कृतावधाने च परिकर-वर्गे, श्यामसिंहस्याङ्के दत्तदृष्टिं सौवर्णी तदङ्के संस्थाप्य, पातितोभयजानु समुपविश्य, राजत-राजिका इव कपोलयोरुत्तरोष्ठे च समुद्भूताः स्वेदकणिका उत्तरीय-प्रान्तेन परिमृज्य पुनरात्म-वृत्तान्तं वक्तुं प्रारभत गौरसिंहो यद्—

अथ "भगवन् ! श्रूयते सुदूरमस्मात्स्थानात् कोङ्कणदेशः, मध्ये च विकटा अटव्यः, शतशः शैल-श्रेण्यः, त्वरितधारा धुन्यः, पदे

तदुक्तिम् = हनूमत्पूजकोक्तिम्। अतिशयेन गुरुर्गरिष्ठः, गिरिभिर्गरिष्ठस्तस्मिन्।

अहो ! अहो, "ओत्" इति प्रगृह्यसंज्ञा ततश्च प्रकृतिभावः। कुतूहल-परवशे=कौतुकाधीने, विस्फारितनयने=विकासितनेत्रे। शुश्रूषातिरेकादिदं सर्वम्। उद्ग्रीवे = उत्थितकण्ठे। समनुकूलितकर्णे = अभिमुखीकृतश्रोत्रे, विस्मृतान्यकथे = प्रस्मृतान्यप्रसङ्गे। पातितोभयजानु, क्रियाविशेषणम्। राजतराजिका इव = दौर्वर्णकणिका इव।

त्वरिता = द्रुतगामिनी, धारा = प्रवाहो यासां ताः। धुन्यः =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पदे च भयानक-भल्लूकानामम्बूकृत-सङ्कुलानाम्, मुस्ता-मूलोत्खनन-घुर्घुरायित-घोर-घोणानां घोणिनाम्, पङ्क-परीवर्त्तोन्मथित-कासाराणां कासराणाम्, नरमांसं बुभुक्षूणां तरक्षूणाम्, विकट-करटि-कट-विपाटन-पाटव-पूरित-संहननानां सिंहानाम्, नासाग्रविषाण-शाणन-च्छल-विहित-गण्डशैल-खण्डानां खड्गिनाम्, दोदुल्यमान-द्विरेफ-दल-पेपीयमान-दानधारा-धुरन्धराणां सिन्धुराणाम्, कृपा-कृपण-कृपाण-च्छिन्न-

---

नद्यः । **भयानकानाम्** = भीतिजनकानाम्, **भल्लूकानाम्** = ऋक्षाणाम् । **अम्बूकृतैः** = निष्ठीवसहितशब्दैः, "अम्बूकृतं सनिष्ठीवमि"त्यमरः, **सङ्कुलानाम्** = व्याप्तानाम् । सर्वथा साक्षात्कारसम्भव इत्यनेनान्वयः । एवमितरषष्ठ्यन्तानामपि । **मुस्तामूलोत्खनने** = कुरुविन्दमूलोत्पाटने, घुर्घुरायिता **घोणा**= नासा, येषां तेषाम् । "कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियामि"त्यमरः । **घोणिनाम्** = शूकराणाम् । **पङ्कपरीवर्त्तेन**=कीचोल्ललनेन, **उन्मथिताः**= विलोडिताः, **कासाराः** = सरांसि, "कासारः सरसी सर" इत्यमरः, यैस्तेषाम् । **कासराणाम्** = महिषाणाम् । "लुलायो महिषो वाहद्विषत्कासरसैरिभा" इत्यमरः । **नरमांसम्, बुभुक्षूणाम्**= खादितुमिच्छूनाम् । "न लोकाव्ययनिष्ठाखलर्थतृनामि"ति षष्ठीनिषेधः । **तरक्षूणाम्**, "स्यात्तरक्षुस्तु मृगादन" इत्यमरः । "चीता" इति हिन्दी । **विकटाः**=उद्दामानः, **करटिनः**=हस्तिनः, तेषां **कटः** = गण्डः, तस्य यत् **विपाटनम्**=विदारणम् तत्र यत् **पाटवम्**= कौशलम्, तेन पूरितं **संहननम्** अङ्गं येषां तेषाम् । **नासाग्रे** = घोणाग्रे, विद्यमानस्य, **विषाणस्य**=शृङ्गस्य, **शाणनच्छलेन**=तेजनव्याजेन, विहिता गण्डशैलखण्डा यैस्तेषाम् । **खड्गिनाम्**=गण्डकानाम् । "गैंडा" इति हिन्दी । **दोदुल्यमानानाम्**=अतिशयेन पुनः पुनर्वा समुत्पतताम्, "दुल उत्क्षेप" इत्यस्य रूपम्, द्विरेफाणां दलेन **पेपीयमानया**=पुनः पुनरास्वाद्यमानया, **दानधारया**=मदपंक्त्या, **धुरन्धराणाम्**=अग्रेसराणाम् । **सिन्धुराणाम्**= गजानाम् । "इभो मतङ्गजो हस्ती सामजः सिन्धुरः कपिरि"ति वैजयन्ती । **कृपाकृपणैः**=दयादरिद्रैः, **कृपाणैः** = असिभिः, **छिन्नेभ्यः** = कृत्तेभ्यः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दीनाध्वनीन – गल–तल – गलत्पीन – धार-शोणित – विन्दु–वृन्द-रञ्जित-वारवाण-सारसनोष्णीष- धारणाकलिताखर्व-गर्व-वर्वराणां लुण्ठक-निकराणां च सर्वथा साक्षात्कार-सम्भवः। बालावावाम्, अविज्ञातोऽध्वा, भोग-समयो दुर्ग्रहाणाम्, अश्वावेव सहायौ, जनपद-शून्यमेतत् प्रान्तरम्, तत्कथं गच्छेव ? कथं धैर्यं धारयेव ? कथं वा कोङ्कणदेशं प्राप्स्याव इति विश्वसेव ?" इति सचिन्तं विनिवेदितवति मयि; स साधुरावयोः पृष्ठे हस्तं विन्यस्य—

"हनूमान् सर्वं साधयिष्यति, मास्म चिन्ता-सन्तान-वितानैरात्मानं दुःखाकुरुतम्। यथा सरलेनोपायेन कोङ्कणदेशं प्राप्स्यथस्तथा प्रभाते निर्देक्ष्यामि, साम्प्रतमित आगम्यताम्, पीयतामिदमेला-गोस्तनी-केसर-शर्करा-सम्पर्क-सुधा-विस्पर्द्धि महिषी-दुग्धम्। दासा इमे पाद-संवाहनैस्तैल-सम्मर्दैर्व्यंजन-चालनैश्च भवन्तौ विगतक्लमौ विधास्यन्ति। न किमपि भयमधुना वां हनूमतश्चरणयोः शरणमायातयोः। सुखेन सुप्यताम्। असंशयमेव प्रातरेव हनूमत्पूजन-समये सर्वं कार्यं सेत्स्यति"—इति समाश्वासयत्।

गलतलविशेषणम्। दीनानाम् अध्वनीनानाम्=पथिकानाम्, गलतलेभ्यः=कण्ठस्थानेभ्यः, गलत्पीनधारस्य=निपतत्स्थूलप्रवाहस्य, शोणितस्य, बिन्दु-वृन्देन=पृषत्समूहेन, रञ्जितानाम्, वारवाण-सारसनोष्णीषाणाम्=कञ्चुक–मेखला–शिरस्त्राणानाम्, धारणेन, आकलितः=आहितः, अखर्वः,=विपुलः, गर्वः=अहङ्कारः, यैस्ते च ते वर्वराः=मूर्खास्तेषाम्। दुर्ग्रहाणाम्=दुष्टखेचराणाम्, शन्यादिनाम्।

मास्मेत्यत्र न माङ्, अपितु निषेधार्थको मेति निपातः। अत एव न लुङ्, दुःखाकुरुतम्=दुःखिनं विधत्तम्। "सुखप्रियादानुलोम्य"इत्यत्रत्य "दुःखाच्चेति वक्तव्यमि"ति डाच्। एला=चन्द्रबाला, गोस्तनी=द्राक्षा, केसरम्=काश्मीरजम्, शर्करा = सिता, एतेषां सम्पर्केण = सम्मेलनेन सुधाविस्पर्धि = अमृततुल्यम्, प्रतियोगिताकरम्, सदृशमिति यावत्। समाश्वासयत् = धैर्यमापादयत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आवां च तन्निर्दिष्टेनैव सोपानेन अट्टालिकामारुह्यैकस्मिन् गृहे प्रविष्टौ, तत्र च राजकुमार-योग्यां पर्यङ्कादि-सामग्रीमवलोक्य नितान्तं चकितौ प्रसन्नौ च अभूव। अथ भूयस्तत्प्रदत्तं मोदकादि किञ्चिद् भुक्त्वा, पयः पीत्वा, ताम्बूलं चर्वयन्तौ, दासैः पादयोः पीड्यमानौ, व्यजनैर्वीज्यमानौ, स्वभाग्योदय-सोपानं साधोः साधुतां मनस्येव प्रशंसमानावेव चाशयिष्वहि। अयं चिरकालानन्तरमावाभ्यां निःशङ्क-शयन-समयो लब्धः, इत्येकयैवाऽऽनन्दमय्या वितर्क-विचारादि-सम्पर्क-शून्यया असम्प्रज्ञात-समाधि-सोदरयेव निद्रया

स्वभाग्योदयस्य = स्वदिष्टप्रादुर्भावस्य, **सोपानम्** = अधिरोहिणी। "सीढी" इति हिन्दी। नित्यक्लीबम्। अत एव नित्यस्त्रीलिङ्ग-साधुताशब्दविशेषणत्वेऽपि न तल्लिङ्गता। **अशयिष्वहि**=अस्वाप्स्व।

आनन्दमय्या=आनन्दसंवलितया। गाढनिद्रायामानन्दानुभवाभावेऽपि समुत्थितौ "सुखमहमस्वाप्समि"ति समुल्लेखेन वृत्त्यन्तरशून्यायामेव तस्यामानन्दमयत्वं कल्प्यते। असंप्रज्ञातयोगस्य तु भूमानन्दमयता स्पष्टा योगशास्त्रे। **वितर्कः**=विविध ऊहः, **विचारः** = कर्त्तव्याकर्त्तव्यत्वविवेकः, **आदिना**=कामादिः, तेषां **सम्पर्केण**=संसर्गेण, **शून्यया**= विरहितया। निद्रयेति विशेष्यम्। उत्प्रेक्षते—**असंप्रज्ञातसमाधिसोदरयेव**। "वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञात" इति योगसूत्रानुसारेण वितर्कादिचतुष्टयविशिष्टः संप्रज्ञातः, इतरथा तु "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य" इति सूत्रानुसारेणासंप्रज्ञात इत्यसंप्रज्ञाते वितर्कादिसंपर्कशून्यता। सूत्रे वितर्कादीनां प्रत्येकमनुगमेऽन्वयः। तथा च सवितर्क-सविचार-सानन्दसास्मिताभिधभेदचतुष्टयसहितः, "संप्रज्ञायते= सम्यग् ज्ञायते यस्मिन् स" इति विग्रहार्थकः संप्रज्ञातः। विरामप्रत्ययस्य=वृत्त्युपरमकारणकस्य, अभ्यासः=पौनःपुन्येन सम्पादनम्, तत्पूर्वः=तत्कारणकः संस्कारमात्रावशिष्टोऽसंप्रज्ञात इति द्वितीयसूत्रार्थः। तदुक्तम्—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः।
असंप्रज्ञातनामाऽसौ समाधिरभिधीयते ॥ इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समस्तां रजनीमजीगमाव ।

ततः केनापि धमद्धमद्ध्वनिनेव बोधितौ, दक्षतो वामतश्च परिवृत्य, चक्षुषी परिमृज्य, साङ्गुलि-ग्रथन-हस्त-प्रसारणं सस्नायु-पीडनं च विजृम्भ्य, भूमिं प्रणम्य, पर्य्यङ्कादुत्तीर्य, कोष्ठाद् बहिरागत्य, साञ्जलि मारुति-ध्वजमवलोक्य, करतले निरीक्ष्य, भित्तिकावलम्बित-मुकुरेष्वात्मानं साक्षात्कृत्य, भगवन्नामानि जपन्तौ, कांश्चित्प्रातःस्मरण-श्लोकांश्च रटन्तौ, परस्परं "सुखमावामस्वाप्स्व, प्रसन्नं नौ चेतः" इति शनैरालपन्तौ च, तस्मिन्नेव मन्दिरस्योर्ध्वे खण्डे शतपदीमकरवाव । तावदश्रूयत स एव बहुलीभूतो ध्वनिः । ततो गवाक्षतो निकुब्जीभूय दृष्टं यत् पञ्चषाः साधवो वस्त्र-वेष्टित-मस्तकाः समीप-स्थापित-जलपूर्ण-पात्राः पाषण-खण्डैर्दन्तधावन-मुखं मृदूकर-

---

अजीगमाव=अयापयाव ।

परिवृत्य = परिवर्त्तनं कृत्वा । स्वभावोक्तिः । साङ्गुलिग्रथनहस्त-प्रसारणम्, करयोरङ्गुलीः परस्परं संयोज्य हस्तौ प्रसारयन्ति त्यक्तनिद्रा जना इति स्वभावः । विजृम्भ्य='जम्भाई लेकर' इति भाषायाम् ।
भूमिं प्रणम्य,

समुद्रवसने ! चोर्वि ! पर्वतस्तनमण्डले ! ।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति नैत्यिकविधानम् । भूमेर्मातृत्वकल्पनायां प्रातरेव स्मारितायां तद्दुःखत्रातवारणायोत्सुका भवेयुर्लोका इति तत्प्रचारकाणां सुमनीषा । कोष्ठम्, "कोठरी" इति हिन्दी । करतले निरीक्ष्य, प्रभाते करतलदर्शनं श्रेयस्करमिति धर्मशास्त्रानुशासनम् । शतं पदानि शतपदी = भ्रमणम् । "भुक्त्वा शतपदं गच्छेदि" त्यत्रापि तदेव तात्पर्यम् । पञ्च वा षड् वा पञ्चषाः, "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येय" इति बहुव्रीहिः । समासान्तोऽच् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णाय कुट्टन्ति। अवलोकितं च यदस्मिन्नपि समये शर्वरी-तमांसि नाम्बरं साकल्येन जहति। स्वच्छापि प्राची नाधुनाऽप्यरुणिमानमङ्गीकरोति। विराव-बहुलान्यपि वयांसि न सम्प्रत्यपि विहाय नीडाधिष्ठान-कुटानुड्डीयन्ते। गिरि-ग्रामटिका-गृहेभ्यो व्यावर्तमाना अपि विटपिनो न स्वफल-पुष्प पत्राऽऽकार-परिचय-प्रदानैर्जातीः प्रकटयन्ति। उत्तरोत्तरतस्तार-तार-तरै रुतै रतार्त्तिमीरयन्त्यपि तरुणतित्तिरी न तरोरवतरति। आलोकाऽऽलोक-कृत किञ्चिच्छोकमोकोऽपि च कोको न वराकीं कोकीमुपसर्पति।

अथेदृशीमेव मनोहारिणीं शोभामवलोकयन्तौ कम्पित-कुन्द-कलापस्य, उन्मीलन्मालती-मुकुल-मकरन्द-चौरस्य पाटलि-पटल-

---

शर्वरीतमांसि = रात्र्यन्धकाराः। **अम्बरम्** = नभः, कर्म, **जहति** = त्यजन्ति। **अरुणिमानम्** = लौहित्यम्। **नीडस्य** = कुलायस्य, **अधिष्ठानानि** = निवासभूमितां गतानि च ते **कुटाः**=वृक्षाः, तान्। "अनोकहः कुटः शाल" इत्यमरः। **व्यावर्त्तमानाः** = भिन्नत्वेन प्रतीयमानाः। जातेर्व्यावर्त्तकत्वं स्वभावः। सम्यक् प्रकाशाभावात्। **उत्तरोत्तरतः** = अधिकाधिकम्। **तारतारतरैः** = अत्युच्चैः। **रुतैः**=आरावैः। **रतार्त्तिम्** = कामपीडाम्। **ईरयन्ती** = कथयन्ती, **तरुणतित्तिरी** = युवक-तित्तिरिवधूः। स्वभावोक्तिः, अनुप्रासः। **आलोकस्य** = प्रकाशस्य, **आलोकेन** = विलोकनेन, **कृतः** = उत्पन्नः, कस्यचित् शोकस्य मोको यस्य सः। **कोकः**=चक्रवाकः, **वराकीम्**= दुःखिनीम्। "बेचारी" इति हिन्दी।

अथ समीरस्य स्पर्शसुखमनुभवतौ पर्यटन्तौ मुहूर्त्तमयापयावेति सम्बन्धः। समीरं विशिनष्टि-**कम्पितः** = दोलितः, **कुन्दकलापः** = माघ्यसमूहो येन तस्य। **उन्मीलन्तीनाम्** = विकाशमभ्यागच्छन्तीनाम्, **मालतीनाम्** = जातीनाम्, **मुकुलानाम्**=कलिकानाम्, **मकरन्दस्य**=पुष्परसस्य, **चौरस्य** = अपहर्तुः। **पाटलिः** = "गुलाब" इति ख्यातः, **तत्पटलस्य** =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पराग-पुञ्ज-पिञ्जरितस्य शनैः शनैः फरफरायमाण शुक-पिकादि-पतत्रोन्मथ्यमानस्य पलाशि-पलाशाग्र-विलुलत्तुषार-कणिकापहरणशीतलस्य समीरस्य स्पर्शसुखमनुभवन्तौ, तत्रैव पूर्वस्या अट्टालिकाया दक्षिणस्याम्, दक्षिणस्याश्च पश्चिमायाम्, पश्चिमाया अप्युत्तरस्याम्, ततश्च पुनः पूर्वस्यामिति पौनःपुन्येन पर्य्यटन्तौ मुहूर्त्तमयापयाव ।

तस्मिन्नेव समये एकेन ब्रह्मचारिवटुनाऽऽगत्य निवेदितं, यत्- "सपदि प्रभात-क्रिया निर्वहणीयेत्यादिशति तत्रभवान् साधु-शिरोमणिः" तदाकर्ण्य, बाढमित्यङ्गीकृत्य,षष्टिसहस्र-वालखिल्य-काषाय-वसन-विधूतायामिव, मन्देह-देह-शोणित-शोणितायामिव, अरुणा-

---

तत्समूहस्य, परागपुञ्जेन=धूलिव्रजेन, पिञ्जरितस्य=पीतवर्णस्य । फरफरायमाणानाम्=पक्षास्फोटनं कुर्वताम्, शुकपिकादीनां पतत्रैः=पक्षैः, उन्मथ्यमानस्य=विलोड्यमानस्य । वृद्धिं गमितस्येति यावत् । पलाशिपलाशाग्रेषु = वृक्षपत्राग्रेषु, विलुलताम् = विलुठताम्, तुषाराणाम् = अवश्यायानाम्, कणिकानाम्=बिन्दूनाम्, अपहरणेन शीतलस्य । अयापयाव= अगमयाव ।

प्राभातकालिकीं प्राचीं विशिनष्टि—षष्टिसहस्रस्य = तादृशसंख्यापरिमितानाम्, वालखिल्यानाम्=तदाख्यऋषिविशेषाणाम्, काषायैः=कषायराग-रक्तैः, वसनैः=वस्त्रैः, विधूतायामिव = उत्कम्पितायामिवेत्युत्प्रेक्षा । मन्देहानाम् = राक्षसविशेषाणाम्, देहस्य शोणितेन शोणितायामिव = रक्तीकृतायामिव । स्वाभाविकं शोणत्वं मन्देह-देह-शोणित-सम्पर्कजातत्वेनोत्प्रेक्षितम् । सायंकाले प्रत्यहं मरणं शरीराणामक्षयत्वञ्चेति विधिशापयन्त्रिता मन्देहाभिधा राक्षसाः सूर्यं खादितुमिच्छन्ति, तैश्च संग्रामं करोति भास्करः, तत्कालक्षिप्तानि च गायत्र्यभिमन्त्रितानि वारीणि वज्रीभूतानि तान् घ्नन्तीत्यर्थवादः सूर्योद्देश्यकजलदानस्य ब्राह्मणग्रन्थेषु पुराणेषु च दृश्यते । एतदीयं वास्तविकत्वं पुराणमतदीपिकायां समवलोकनीयम् । अरुणस्य = सूर्यसारथेः, 'सूरसूतोऽरुणोऽनूरुरि'त्यमरः, अरुणिम्ना =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुणिम-रञ्जितायामिव, मोमुद्यमान-नरीनृत्यमान-परस्कोटि-ताम्रचूड-चूडा-प्रतिविम्ब-संवलितायामिव, पोस्फुट्यमान-स्वर्गङ्गा-कोकनद-पट-लव्याप्तायामिव, भक्तजन-भक्ति-प्रभाव-भाविताविर्भाव-छिन्नमस्ता-कन्धरोच्छल-च्छोणित-स्नातायामिव, वसन्तोत्सवोच्छालित-सिन्दू-रान्धकारान्धीकृतायामिव तातप्यमान-ताम्रद्युति-चौरायां प्राच्याम्, तत्प्रभया शोण-शोणैः सोपानैरवतीर्य, मारुतिमन्दिर-द्वारि मस्तक-मवनमय्य, झटित्येव स्नान-पूर्वाः क्रियाः समाप्य, तेनैव ब्रह्मचारि-बटुना निर्दिश्यमान-मार्गौ, पूर्वावलोकित-वेशन्तादारादेव पश्चिमतः किञ्चिदमृतोदं नाम महासरः समासादितवन्तौ।

तत्र वरटाभिरनुगम्यमानानां राजहंसानाम्, पक्षति-कण्डूति-

लौहित्येन, रञ्जितायाम्। **मोमुद्यमानानाम्**=परमं हर्षमधिगच्छताम्, अत एव **नरीनृत्यमानानाम्** = अतिशयेन पुनः पुनर्वा नृत्यताम्, **परस्कोटीनाम्** = कोटयधिकानाम्, **ताम्रचूडानाम्** = कुक्कुटानाम्, **चूडानाम्** = शिखानाम्, प्रतिबिम्बेन, **संवलितायाम्** = प्रावृतायाम्। **पोस्फुट्यमानानाम्** = अत्यन्तं विकासमधिगच्छताम्, **स्वर्गङ्गायाः** = सुरदीर्घिकायाः, **कोकनदानाम्** = रक्तोत्पलानाम्, पटलेन **व्याप्तायाम्** = छन्नायाम्। **भक्तजनानाम्**=भागवतानाम्, **भक्तेः** = सेवायाः, **प्रभावेण** = सामर्थ्येन, **भावितः** = सम्पादितः, **आविर्भावः** = प्रकटीभवनम्, यया सा चासौ **छिन्नमस्ता**=तन्नाम्ना तन्त्रेषु प्रसिद्धा महाविद्यान्यतमा, तस्याः **कन्धरायाः** = ग्रीवायाः, **उच्छलता**=उद्गच्छता, शोणितेन स्नातायामिव। **वसन्तोत्सवे**= होलोत्सवे, **उच्छालितेन** = उत्क्षालितेन, सिन्दूराणाम्। **अन्धकारेण**= तिमिरेण, अन्धीकृतायामिव। **तातप्यमानस्य** = सुतप्तस्य, ताम्रस्य **द्युतेः**= शोभायाः, **चौरायाम्** = अपहारिकायाम्। **पूर्वम्** = प्राक्, अवलोकितात्, **वेशन्तात्** = अल्पसरसः। "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति पञ्चम्याराच्छब्दयोगे।

वरटाभिः = हंसीभिः। "हंसस्य योषिद् वरटे"त्यमरः। **राजहंसानाम्**, "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः। मलिनैर्मल्लिकाक्षास्ते" इत्यमरः। पक्षस्य मूलं पक्षतिः, "पक्षात्तिः" तत्र या **कण्डूतिः** = खर्जूः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कषण-चञ्चल-चञ्चुपुटानां मल्लिकाक्षाणाम्, लक्ष्मणा-कण्ठ-स्पर्श-हर्ष-वर्ष-प्रफुल्लाङ्गरुहाणां सारसानाम्, भ्रमद्भ्रमर-झङ्कार-भार-विद्रावितनिद्राणां कारण्डवानाञ्च तास्ताः शोभाः पश्यन्तौ, तडागतट एव पस्फुल्यमानानां मकरन्दतुन्दिलानामिन्दीवराणां समीपत एव मसृण-पाषाण-पट्टिकासु कुशासनानि मृगचर्मासनानि ऊर्णासनानि च विस्तीर्योपविष्टानाम् गायात्री-जप पराधीन-दशन-वसनानाम्,कलित-ललित तिलकालकानाम्,दर्भाङ्गुलीयकालङ्कृताङ्गुलीनाम्,मूर्तिमतामिव ब्रह्मतेजसाम्, साकाराणामिव तपसाम्, धृतावताराणामिव च ब्रह्मचर्य्याणां मुनीनां दर्शनं कुर्वन्तौ, कृतनित्यक्रियं परिपुष्ट तुलसी-मालिकाङ्कित-कण्ठं सिन्दूरोर्द्ध्वपुण्ड्र-मण्डित-ललाटं रामचरण-चिह्न-मुद्रामुद्रित-बाहुदण्ड वक्षःस्थलं हनूमन्मन्दिराध्यक्षं प्रणतवन्तौ ।

तया कर्तृभूतया **कषणम्**=घर्षणम् तेन **चञ्चलाः**=चपलाः, चञ्चुपुटा येषां, तेषाम् । **मल्लिकाक्षाणाम्** = मलिनचञ्चुचरणहंसानाम् । उपरिष्टादमरः । **लक्ष्मणायाः** = सारसयोषितः, "सारसस्य तु लक्ष्मणे"त्यमरः, कण्ठस्पर्शेन यद् **हर्षवर्षम्**=आनन्दवृष्टिः, तेन **प्रफुल्लानि**=विकसितानि, **अङ्गरुहाणि**= लोमानि येषां तेषाम् । **भ्रमताम्**=सञ्चरताम्, भ्रमराणाम्, **झङ्कारभारेण**= समधिकझङ्कारशब्देन, **विद्राविता**=उत्सारिता, निद्रा येषां तेषाम् । **पस्फुल्यमानानाम्** = विशरारूणाम् । विशरणार्थकात् ञि-फलाधातोर्यङन्तात् शानच् । तुन्दमस्त्येषामिति तुन्दिलाः, "तुन्दादिभ्य इलच्च" । **मकरन्देन**= पुष्परसेन, **तुन्दिलानाम्** = पिचण्डिलानाम्, भरितानामिति यावत् । **मसृणपाषाणपट्टिकासु**=चिक्कणप्रस्तरपट्टिकासु । **गायत्रीजपपराधीने दशनवसने**=ओष्ठौ येषां तेषाम् । **कलिताः**=धारिताः, **ललिताः**=शोभनाः, **तिलकालकाः**=तिलकाः, यैस्तेषाम् । "तिलकस्तिलकालक"इत्यमरः । **दर्भाङ्गुलीयकैः** = कुशनिर्मितांगुलिधारणीयैः, पवित्रैरिति यावत्, **अलंकृताः** = भूषिताः अंगुल्यो येषां तेषाम् । मन्दिराध्यक्षं विशिनष्टि—**कृतनित्यक्रिय**-मित्यादि । रामचरणचिह्नमेव **मुद्रा**=मुद्रणसाधनम्, तया **मुद्रितम्** = अङ्कितम्, बाहुदण्डवक्षःस्थलं यस्य तम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेन चाऽऽज्ञप्तम्—"यद्यायुष्मन्तौ सपदि महाराष्ट्रदेशं जिगमिषथश्चेदचिरेणैव मस्तके सम्मृद्यैतद् राम-रजः तडागे निमज्जतम्' इत्यवधार्य्य आवां तथैव व्यधिष्वहि।

तदाज्ञया वस्त्राणि परिधाय च, तत्समीपे समुपविश्य, तेन च समन्त्र-जपं कुश-जलेनाभ्युक्षितौ हनुमदङ्ग-रञ्जित-सिन्दूरेण विहित-तिलकौ स्वकीयौ सैन्धवौ समारुह्य। ततः पञ्चषान् व्यूढवयस्कान् जटिलान् सुपरिणाहान् वाहानारूढान्, आवाभ्यां सह गन्तुमाज्ञाप्य मन्दिराभ्यन्तरोऽभाषिष्ट—

"कुमारौ! इतः पुण्यनगर-पर्य्यन्तं प्रतिगव्यूत्यन्तरालं महाव्रताश्रम-परम्पराः सन्ति। सर्वत्र कुटीरेषु संन्यासिनो भक्ता विरक्ताश्च निवसन्ति। कियद्दूरपर्यन्तं पञ्चषाः सहाया युवयोः सहचरा भविष्यन्ति, परस्ताच्छिथिलिते लुण्ठक-भये एकेनैव केनचिदश्वारोहेण प्रदर्शित-मार्गौ सुखेन यथाभिलषितं देशं यास्यथः। सहायक-परिवर्त्तनं स्थाने स्थाने स्वयमेव भविष्यति, न तत्र युवयोः कयाऽपि विचिकित्सया भाव्यम्, श्रान्तैः श्रान्तैराश्रमेषु विश्रमणीयम्, निदिद्रासद्भिः कुटीरेष्वेव निद्रा द्राघणीया, विलेपनाभ्यङ्गस्नान पानाशन-संवाहनादि-सौकर्यं सर्वत्र सहायकाः साधयिष्यन्ति"—इति।

ततस्तं प्रणम्य तथैव ससहायौ आवां प्रचलितौ। सहचरनिर्दिष्टेनैव सर्वैरविज्ञेयेन वन्य-द्रुम-जाल-रुद्धेन गण्डशैल-परिक्रमणा-

समारुह्य = आरूढौ। व्यूढम् = पृथुलम्, वयो येषां तान् युवकानित्यर्थः। सुष्ठु परिणाहः=विशालता येषां तान्, वाहान्=अश्वान्। विचिकित्सया = संशयेन। "विचिकित्सा तु संशय" इत्यमरः। निदिद्रासद्भिः =निद्रातुमिच्छद्भिः। द्राघणीया=दीर्घयितव्या। करणीयेति यावत्। विलेपनम् = चन्दनकस्तूरिकादिचर्च्चनम्, अभ्यङ्गः=उद्वर्त्तनम्, पिष्टसर्षपादिना, स्नानम् = निर्णेजनम्, पानम्, दुग्धादेः, अशनम् = भोजनम्, संवाहनम् = चरणमर्दनम्, एवमादीनां सौकर्य्यम् = सौलभ्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धित्यकाधिरोहणोपत्यका-परिलङ्घन-तटिनी-तरणाद्यायास-दीक्षा-दक्षेण पथा प्रचलन्तौ मध्ये मध्ये कुटीरेषु विरमन्तौ तत्र तत्र सुस्वादुभोजनैः सकल-समुचित-सामग्री-साहाय्यैः सुखेन विश्रान्ति-सुखमनुभवन्तौ तत्र तत्र परिवर्तितसहायकौ दिनकतिपयैरेकस्या नद्यास्तटमयासिष्व । तत्रैकस्य चिञ्चा-वृक्षस्य स्कन्धे प्रलम्ब-रज्ज्वा निजाजानेयावावध्य निकटस्थ यूप-तरु शाखायां च वस्त्रादीनि संलम्बय्य स्नातुं जलमवागाहिष्वहि । अस्मत्सहचरश्च निजाश्वस्य पृष्ठमार्द्रयन्निव तं वल्गायां गृहीत्वा पर्य्यटयितुमारब्ध ।

ततो जलाद् वहिरागत्य, तिन्तिडी-शाखात उत्तार्य शुष्क वस्त्रे परिधाय, इतस्ततः पर्यट्यापि च कां भूमिमायातौ-इति निश्चेतुं नापारयाव । तावदकस्मात् दृष्टं यद्-उत्तरतः खुर-धूलिभिः पार्श्व परिवर्त्तिलता कुसुम-परागान् द्विगुणयन्तं लाङ्गूल-चामरेण वीजयन्तं मुखफेनैः पुष्पाणीव वर्षन्तं कश्चित् श्यामकर्णं शारदाभ्रश्वेतं वाजिनमारुह्य लोलत्खड्गचर्म्माच्छन्न-पृष्ठदेशः कवच शिञ्जित-विजित-कोकिल-शावक-निकर-कूजितो वीर-वेषः कश्चिच्छ्यामो युवा समायातीति ।

उत्तरतो वाजिनमारुह्य श्यामो युवा समायातीति सम्बन्धः । **द्विगुणयन्तम्**=वर्धयन्तम् । लांगूलमेव **चामरम्**=प्रकीर्णकम्, तेन । श्यामं विशिनष्टि— **लोलद्भ्याम्**=सञ्चलद्भ्याम्, **खड्गचर्मभ्याम्**=असित-त्प्रहाररक्षकाभ्याम्, छन्नदः पृष्ठदेशो यस्य सः । **कवचशिञ्जितेन** = वारबाणशब्देन, "भूषणानाञ्च शिञ्जितमि"त्यमरः, विजितं **कोकिल-शावक-निकर-कूजितम्** = परभृत-शिशु-समूहरणितं, येन सः ।

दिनकतिपयैः = कियद्भिश्चन दिवसैः । "पोटायुवतिस्तोककतिपये"ति कतिपयस्य परनिपातः । **अयासिष्व**=अगच्छाव । **चिञ्चावृक्षस्य** = तिन्तिडीवृक्षस्य । "तिन्तिडी चिञ्चे"त्यमरः । "इमली" इति भाषा । **स्कन्धे** = प्रकाण्डे "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरो" रित्यमरः । **अवागाहिष्वहि** = प्रविष्टौ । **पर्यटयितुम्** = चालयितुम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स च क्षणेनैवाऽऽगत्य, नौ सकलं वृत्तांतं पृष्ट्वा, विज्ञाय च, प्रावोचत्-"अवगतम्, भवतोरेव विषये दृष्टस्वप्नः शिवीरो भवन्तौ स्मरति, तत्सपद्यश्वावारुह्य आगम्यताम्, न वां भयं किमपि, व्यतीतो भवतोर्दुःखमयः समयः"—इति।

ततः साश्चर्यं सपदि वस्त्राणि परिधाय सहचरमाकार्य तेन सहाश्वावारुह्य तमनुसृत्य तत्प्रदिष्टं वासादि-सौकर्यमङ्गीकृत्य सपद्येव निविवृत्सन्तं जटिल-सहचरं साश्लेषमनुज्ञाप्य यथासमयं शिववीरं साक्षात्कृत्यावगतम्—यदेष एव महात्मा भटवेषेणास्मन्निकटे भीमा-नद्यास्तटं गत आसीदिति।

तत्कालमारभ्याद्यावधि तस्यैव करकमलच्छायायां वसावः; भगिनी-वियोग-तापश्चिरादासीत्, सोऽप्यद्य निवृत्तः, पुरोहितचरणावपि दृष्टौ, इति सर्वं शुभमेव परस्तात् सम्भाव्यते,—इत्येष आवयोर्वृत्तान्तः।"

ततो मुहूर्त्तं सर्वेऽप्येतद्वृत्तान्तस्यैव पौर्वापर्य-स्मरण-पराधीना इवाऽऽसिषत। परिशेषे च पुटपाकवदन्तरेव दन्दह्यमानेन वाष्प-व्रातेन आविलस्यापि अप्रकटित-वहिश्चेष्टस्य ब्रह्मचारिगुरोः प्रार्थनया देवशर्म्मणा तोरण-समीपे हनूमन्मन्दिरे एव निवासः स्वीकृतः। तदेव च प्रबन्धु सर्वेऽपि कुटीरादुत्थिताः।

इति तृतीयो निश्वासः

निविवृत्सन्तम् = निवर्त्तितुमिच्छन्तम्। **साश्लेषम्** = सालिङ्गनम्। क्रियाविशेषणम्।

आसिषत = स्थिताः, **परिशेषे**=पर्यन्ते। **पुटपाकवत्**=उभयतः पाकवत्। **आविलस्य**=कलुषस्य, क्षुभितस्येत्यर्थः। शोकः किंमूल इत्यग्रे स्फुटीभविष्यति।

इति श्रीशिवराजविजयवैजयन्त्यां तृतीयनिश्वासविवरणम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"कार्यं वा साधयेयम्, देहं वा पातयेयम्"

—स्फुटकम्

मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूर-द्रव-स्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्कश्चाटकैररुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते। वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति। अथाकस्मात् परितो मेघ-माला पर्वतश्रेणीव प्रादुरभूत्। क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्ड-मण्डित-दिगन्त-दन्तावल-भयानकाकारा, ततः पारस्परिक संश्लेष-विहित-महान्धकारा च समस्तं गगनतलं

श्रीरघुवीरसिंह आवश्यकं वाचिकं पत्रञ्चादाय महता क्लेशेन तोरणदुर्गं विवेश प्रतिपत्रञ्चानयदिति तुरीयनिश्वासीयकथाभागं श्रीशिवराजवीरीयदृढतमप्रतिज्ञयैवोपक्षिपति = **कार्यमिति**। आषाढर्क्षसंवलिता पूर्णमासी यस्मिन्मासे स **आषाढः** = शुचिः। **सिन्दूरद्रवेण** = नागोद्भवरसेन, **स्नातानामिव** = कृतस्नानानामिवेत्युत्प्रेक्षा। **वरुणदिक्**=पश्चिमा, **तदवलम्बिनाम्** = तदाश्रितानाम्। **कलविङ्काः**=चटकाः। "गौरैया" इति हिन्दी। चटकाया अपत्यानि चाटकैराः, "चटकाया एरग्"इत्यपत्ये प्रत्ययः, तेषां **रुतैः**=शब्दैः। **नीडेषु** = कुलायेषु। **प्रतिनिवर्तन्ते**=परावर्तन्ते। पक्षिणः समग्रं दिनमुड्डीय सायं स्वावासतरौ सम्मिलिता भूरि वाशितं कुर्वतीतीयं पक्षिजातिः। **कलयन्ति**=धारयन्ति। **मेघमाला**=वारिदराजिः। **पर्वतश्रेणीव**=भूधरपङ्क्तिरिवेत्युपमा। **प्रकटितम्** = प्रदर्शितम्, **शिखरिशिखराणाम्**=महीधरशृङ्गाणाम्। **विडम्बनम्** = अनुकृतिः, यया सा। **दर्शितः**=प्रकटीकृतः, **दीर्घेण** = लम्बायमानेन, **शुण्डेन** = करेण, **मण्डितस्य**=भूषितस्य, **दिगन्तदन्तावलस्य** = दिक्करिणः, "दन्ती दन्तावलो हस्ती"त्यमरः, **भयानकः**=भीतिप्रदः, **आकारः**=आकृतिः, यया सा। **पारस्परिकसंश्लेषेण**=इतरेतरमिलनेन, **विहितः** = उत्पादितः, **अन्धकारः** = अन्धतमसं यया

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पर्यच्छदीत् ।

अस्मिन् समये एकः षोडशवर्षदेशीयो गौरो युवा हयेन पर्वत-श्रेणीरुपर्युपरि गच्छति स्म । एष सुघटित-दृढ-शरीरः, श्यामश्यामैर्गुच्छ-गुच्छैः कुञ्चित-कुञ्चितैः कच-कलापैः कमनीय-कपोलपालिः, दूरागमनायास-वशेन सूक्ष्म-मौक्तिक-पटलेनेव स्वेद-बिन्दु-व्रजेन समाच्छादित-ललाट-कपोल-नासाग्रोत्तरोष्ठः, प्रसन्न-वदनाम्भोज-प्रदर्शित-दृढ-सिद्धान्त-महोत्साहः, राजत-सूत्र-शिल्पकृत-बहुल-चाकचक्य-वक्र-हरितोष्णीष-शोभितः, हरितेनैव च कञ्चुकेन प्रकटीकृत-व्यूढ-गूढचरता-कार्यः, कोऽपि शिववीरस्य विश्वासपात्रं सिंह-दुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति ।

सा । पर्यच्छदीत्=व्याप्नोत् ।

उपर्युपरि—"उपर्यध्यधसः सामीप्ये" इति द्वित्वम् । तद्योगे द्वितीया ।

"उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यत" इत्युक्तेः ।

गौरं युवानं विशिनष्टि-सुघटितदृढशरीरः = सुसम्पन्नपुष्टाङ्गः । कमनीयकपोलपालिः = मनोहरकण्ठस्थलः । सूक्ष्ममौक्तिकपटलेनेव =लघु-मुक्तानिचयेनेवेत्युत्प्रेक्षा । स्वेदबिन्दुव्रजेन = घर्मजलकणसमूहेन । "घर्मो निदाघः स्वेदः स्यादि"त्यमरः । समाच्छादितम् = व्याप्तम् , ललाटकपोलनासाग्रोत्तरोष्ठं यस्य सः । प्रसन्नेन = विकसितेन-वदनाम्भोजेन = मुख-कमलेन, प्रदर्शितः, दृढः, सिद्धान्तमहोत्साहः = कर्त्तव्यपरायणतामहाहर्षो येन सः । राजत-सूत्रस्य = रोप्यतन्तोः, शिल्पेन, कृतम् , बहुलम् =प्रचुरम् , चाकचक्यं यस्यैवम्भूतं वक्रम्=अनृजु, हरितम् = हरिद्वर्णम् , उष्णीषम् = शिरोवेष्टनम् , तेन शोभितः । प्रकटीकृतम् , व्यूढम् = अङ्गीकृतम् । गूढचरताकार्यम् = गुप्तचरताकृत्यम् , येन सः । विश्वासस्य, पात्रम् = भाजनम् । नित्यक्लीबम् । परिकारालङ्कारो विशेषणानां साभिप्रायत्वादत्र गद्ये द्रष्टव्यः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तावदकस्माद्‌ुत्थितो महान् झञ्झावातः, एकः सायंसमय-प्रयुक्तः स्वभाव-वृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्भूतै रेणुभिः शीर्णपत्रैः कुसुम-परागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः। इह पर्वत-श्रेणीतः पर्वतश्रेणीः, वनाद् वनानि, शिखराच्छिखराणि, प्रपातात् प्रपाताः, अधित्यकातोऽधित्यकाः, उपत्यकात उपत्यकाः, न कोऽपि सरलो मार्गः, नानुद्वेदिनी भूमिः, पन्था अपि च नावलोक्यते, क्षणे क्षणे हयस्य खुराश्चिक्कण-पाषाण खण्डेषु प्रस्खलन्ति, पदे पदे दोधूयमाना वृक्ष-शाखाः सम्मुखमाघ्नन्ति, परं दृढ-संकल्पोऽयं सादी न स्वकार्याद् विरमति। परितः स-हडहडा-शब्दं दोधूयमानानां परस्सहस्र-वृक्षाणाम्, वाताघात-संजात-पाषाणपातानां प्रपातानाम्, महान्धतमसेन ग्रस्यमानानामिव सत्त्वानां क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगन-तलम्। परं नैष वीरः स्वकार्याद् विरमति। कदाचित् किञ्चिद् भीत इव घोटकः पादाभ्यामुत्तिष्ठति, कदाचिच्चलन्नकस्मात् परिवर्त्तते, कदाचिदुत्प्लुत्य च गच्छति। परमेष वीरो वल्गां संयच्छन्, मध्ये मध्ये सैन्धवस्य

झञ्झावातः, "सवृष्टिको महावातो झञ्झावातः प्रकीर्त्तितः"। प्रपतन्त्यस्मिन्निति **प्रपातः** = जलोत्पतनस्थानम्, "प्रपातस्त्वतटो भृगुरि"त्यमरः। **अनुद्वेदिनी** = दुःखादायिनी, सरलेति यावत्। **चिक्कणपाषाणखण्डेषु** = स्निग्धाश्मशकलेषु। **प्रस्खलन्ति**=प्रच्यवन्ते, "खसकते हैं" इति भाषायाम्। **दोधूयमानाः** = वारं वारं चलन्त्यः, **सम्मुखम्** = अभिमुखम्। **आघ्नन्ति** = ताडयन्ति। "आङो यमहन" इत्यात्मनेपदस्य तु नात्र विषयता, अकर्मकात्स्वाङ्गकर्मकादेव च तद्विधानात्। **सादी** = अश्वारोहः। **विरमति**, "व्याङ्परिभ्यो रम" इति परस्मैपदम्। वाताघातेन सञ्जातः पाषाणपातो येषां तेषाम्। **प्रपातानाम्** = भृगूणाम्। **सत्त्वानाम्** = प्राणिनाम्। अन्धकारे स्थितानां महान्धतमसग्रस्यमानत्वेनोत्प्रेक्षा, स्वतः सिद्धायाश्च शब्दव्याप्तेराकाशकवलीकरणत्वेन। **अकस्मात्** = सहसा, **परिवर्तते** = परावर्तते। **संयच्छन्** =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्कन्धौ कन्धरां च करतलेनाऽऽस्फोटयन्, चुचुत्कारेण सान्त्वयंश्च न स्वकार्याद् विरमति। तावदारब्धश्च श्चञ्चल-चामीकर-रेखाकाराभिश्चञ्चलाभिरपि स्वचमत्कारः। यावदेकस्यां दिशि नयने विक्षिपन्ती, कर्णौ स्फोटयन्ती, अवलोचकान् कम्पयन्ती, वन्यांस्त्रासयन्ती, गगनं कर्त्तयन्ती, मेघान् सौवर्ण-कषेणेव घ्नती, अन्धकारमग्निनेव दहन्ती, चपला चमत्करोति; तावदन्यस्यामपि अपरा ज्वाला-जालेनेव वलाहकानावृणोति, स्फुरणोत्तरं स्फुरणं गर्ज्जनोत्तरं गर्ज्जनमिति परश्शतशतघ्नीप्रचार-जन्येनेव कन्दरि-कन्दर-प्रतिध्वनिभिश्चतुर्गुणितेन महाशब्देन पर्यपूर्यत साऽरण्यानी। परमधुनाऽपि "देहं वा पातयेयं कार्यं वा साधयेयम्" इति कृतप्रतिज्ञोऽसौ शिववीर-चरो न निजकार्यान्निवर्त्तते।

यस्याध्यक्षः स्वयं परिश्रमी, कथं स न स्यात् स्वयं परिश्रमी ? यस्य प्रभुः स्वयं साहसी, कथं स न भवेत् स्वयं साहसी ? यस्य स्वामी स्वयमापदो न गणयति, कथं स गणयेदापदः ? यस्य च महाराजः स्वयं सङ्कल्पितं निश्चयेन साधयति, कथं स न साधयेत् स्व-संकल्पितम् ? अस्त्येष महाराज-शिववीरस्य दयापात्रं चरः, तत्कथमेष झञ्झा-विभीषिकाभिर्विभीषितः प्रभु-कार्यं विगणयेत् ? तदितोऽप्येष तथैव त्वरितमश्वं चालयंश्चलति।

अथ किञ्चित् स्रोतस्समुल्लङ्घमानोऽस्य तुरङ्गः कस्यापि दोधूयमानतरोः शाखया तथाऽभिहतो यथोच्छलन् भूमौ पपात, सादिनं

आकर्षन्। **सैन्धवस्य** = घोटकस्य। **स्कन्धौ** = अंसौ, **आस्फोटयन्** = आस्फालयन्। **सान्त्वयन्** = आश्वासयन्, **चञ्चच्चञ्चलस्य** = विशिष्टचाकचक्ययुतस्य, **चामीकरस्य**=सुवर्णस्य, रेखाणामिवाकारो यासां, ताभिः। **चञ्चलाभिः** = विद्युद्भिः। "तडित् सौदामिनी विद्युच्चञ्चला चपला अपी" त्यमरः। अनुप्रासो वर्णसाम्यात्। **अवलोचकान्** = दर्शकान्। **कर्त्तयन्ती** = विदारयन्ती। अतिशयोक्तिरसम्बन्धे सम्बन्धाभिधानात्। **सौवर्णकषेणेव** = हैरण्यशाणेनेवेत्युत्प्रेक्षा। "शाणस्तु निकषः कषः" इत्यमरः। **वलाहकान्**= मेघान्। **पर्यपूर्यत** = परितः पूर्णाऽक्रियत।

अभिहतः = ताडितः। **उच्छलन्**=उत्पतन्। "उछलते हुए" इति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चैकतः समपीपतत्। किन्तु तत्क्षणादेव सादी समुत्थितो वाजिनो वल्गां गृहीत्वा, सचुचुत्कारं ग्रीवां पृष्ठं चाऽऽस्फोट्य, आज्ञासीद्-यदश्वः स्वेदैः स्नातोऽस्तीति। तच्चक्षुषी विस्फार्य, पार्श्वस्थ-पलाशिनं निपुणं निरीक्ष्य, तच्छाखायामेव कानिचिन्नजवस्तून्यासज्य, दक्षिण-कर-धृत-रश्मिरश्वं शनैः शनैः परिभ्रमयितुमारेभे। अश्वश्च फेनान् पातयन् कन्धरामुद्धूनयन् हेषा-रवैश्चिर-परिश्रमं प्रकटयन् प्रस्यन्द-जल-सिक्त-भूभागः, समत्सृष्ट-पुरीषः, शुष्क-स्वेदः, मुहूर्तार्द्धेनैव विस्मृत-परिश्रमः, सगति-स्तभं खुराग्रैर्भूमिमुत्खनन्, कर्णावुत्त-म्भयन्, लाङ्गूलं लोलयन्, सादिनो दक्षिणदेशे पृष्ठं निकटयन्, पुनरेनं वोढुं परतो धावितुं च समीहां समसूसुचत्।

तावदकस्मात् पूर्वस्यामतिरिक्ताऽतिप्रलम्बाऽतिभयानका सक-डकडाशब्दं सौदामिनी समदेदीप्यत, तच्चमत्कार-चकितं चाश्वमेष यावत्स्थिरयति; तावत्स-तडतडा-शब्दं पूग-स्थूलैर्विन्दुभिर्वर्षितु-मारब्ध मघवा, परं रामकार्यार्थं प्रतिष्ठमानेन मारुतिनेव न सह्यते कार्यहानिः शिववीर-चरेण। तत्क्षणमेवासौ पुनः सज्जीभूय समु-

भाषायाम्। **समपीपतत्** = पातयामास। णिजन्तात् सम्पूर्वकात्पतेर्लुङि। **विस्फार्य**=विकास्य। पार्श्वस्थं **पलाशिनम्**=वृक्षम्। "पलाशी द्रुद्रुमागमा" इत्यमरः। **फेनान्**=डिण्डीरान्। **उद्धूनयन्**=कम्पयन्। **प्रस्यन्दजलेन** = स्वेदाम्भसा, **सिक्तः** = क्लिन्नतां नीतः, भूभागो येन सः। **समुत्सृष्टम्** = त्यक्तम्, **पुरीषम्** = गूथं येन सः। **सगतिस्तम्भम्** = सचलनावरोधम्। **उत्खनन्**=उत्पाटयन्। **उत्तम्भयन्**=ऊर्ध्वीकुर्वन्। **लाङ्गूलम्** = पुच्छम्। "लाङ्गूलं पुच्छशेफयोरि"ति हैमः। **निकटयन्** = समीपयन्। **वोढुम्** = नेतुम्। **समीहाम्**=इच्छाम्। **समसूसुचत्**=प्रकटितवान्। अश्वस्वभाववर्ण-नम्। **समदेदीप्यत**=अत्यन्तं चमदकरोत्। **पूगस्थलैः** = क्रमुकफलमह-त्तरैः। **मघवा** = इन्द्रः। **मारुतिना** = मरुत्तनयेन हनूमता। मारुतिरूपो-पमानस्य, शिववीरचरस्योपमेयस्य, कार्यहान्यसहत्वस्य साधारणधर्मस्य,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्प्लुत्य घोटक-पृष्ठमारुरोह। घोटकश्च पुनस्त्वरितगत्या प्रचलितः। यदा यदा विद्युद् विद्योतते; तदा तदा पन्था अवलोक्यते, तदनुसन्धानेनैव वाहोऽयं शिलातलानि परिक्राम्यन् लताप्रतानानि त्यजन् स्रोतांस्युल्लङ्घमानः गर्तांश्च परिजहदुच्चचाल। तावद् दूरत एवाऽऽलोक्यत तोरण-दुर्ग-दीपः, इतश्च चरस्यैतस्य दृढ-प्रतिज्ञतां निर्भीकतां सोत्साहतां स्वामिकार्य-साधन-सत्य-सङ्कल्पतां च परीक्ष्येव प्रशशाम वृष्टिः। अम्ल-वलेन दुग्धमिव च खण्डशोऽभून्मेघमाला, ददृशे च पूर्वस्यां कलानाथः।

अथ क्षणेनैव पार्वत-नदी-वेग इव निर्जगाम झञ्झावातोत्पातोऽपि। ततो नूतन-वारिधारा-क्षालन-प्रकटित-परम-हारित्यानां परस्कोटि-कीर-पटल-परीतानामिव समवालोक्यत लोचन-रोचिका शोभा पलाशिनाम्। सादी च चञ्चच्चन्द्रचमत्कारेण द्विगुणितोत्साहः "मा भूद् द्वार-रोधो मद्गमनात् पूर्वमेव" इति सत्वर-सत्वरः,

---

वाचकस्य चेवशब्दस्योपादानेन पूर्णोपमा। **वाहः**=अश्वः। **परिजहत्** = परित्यजन्, "नाभ्यस्ताच्छतु" रिति नुम्निषेधः। **आलोक्यत** = दृष्टः। **प्रशशाम**=शान्ताऽभूत्। वृष्टौ सत्यामपि कार्यं नावारुणच्चर इति तस्यास्तत्परीक्षात्वेनोत्प्रेक्षणम्। **अम्लबलेन** दुग्धमिवेत्युपमा। **ददृशे** = दृष्टः। कर्मणि तङ्। **कलानाथः**=चन्द्रः।

क्षणेनैव झञ्झावातोत्पातो निर्जगामेति सम्बन्धः। उपमिनोति-**पार्वतनदीवेग इवेति**। ततो **लोचनरोचिका** = नेत्रानन्ददायिनी, पलाशिनां शोभा समवालोक्यतेति सम्बन्धः। पलाशिनो विशिनष्टि—**नूतनया** = अभिनवया, **वारिधारया** = पानीयासारपातेन, **क्षालनेन** = निर्णेजनेन, प्रकटितं परमं **हारित्यम्** = हरिद्वर्णता, यैस्तेषाम्। उत्प्रेक्षते-परस्कोटिना कीरपटलेन **परीतानामिव** = व्याप्तानामिव। **झिल्लीरवेण** = भृङ्गारीशब्देन, "भृङ्गारी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

झिल्ली-रव-मिश्रित-कवच-शिञ्जितः, वार्ष-वारि-व्रज-विधूत-बिन्दु-सन्दोहः, साधुवाद-संवर्द्धित-हेषमाण-हयोत्साहः, सपद्येव तोरण-दुर्ग-यामिक-पादचार-परिमर्द्दितायां भुवि समाजगाम ।

अथ "को भवान् ? कुतो भवान् ?" इति यामिकेन पृष्टः, दत्त-निज-परिचयः, द्वारपालेनापि-"साधु ! साधु ! महता परिश्रमेण समायातोऽसि, उच्चैर्निश्वसिति तेऽश्वः, स्विन्नानि तव गात्राणि, आर्द्राणि तव वस्त्राणि, धन्योऽसि, तथाऽपि खेदं नाऽऽवहसि, समये समागतोऽसि, अवेक्षते तवैव पन्थानं दुर्गाधीशः, प्रविश्यताम्, अश्व उन्मुच्यताम्, सत्वरमेव च तेनापि साक्षात्कारो विधीयताम्" इति सादरमालप्यमानो दुर्गं प्रविवेश ।

अश्वमुन्मुच्य परस्सहस्र-पतग-पटल-कलकलोन्निद्रस्य सुदूर-वितत-काण्ड-प्रकाण्डस्य चैकस्य पनस-वृक्षस्य शाखायामाबध्य

चीरुका चीरी झिल्लिका च समा इमा" इत्यमरः । **मिश्रितम्** = संपृक्तम्, वृद्धिं गतमिति यावत्, **कवचशिञ्जितम्** = तनुत्राणध्वनिः, यस्य सः । कवचानां वीरभूषणत्वेन "भूषणानान्तु शिञ्जितमि" त्यनेन न विरोध इति ध्येयम् । **वार्षेण** = वर्षभवेन, **वारिव्रजेन** = जलनिचयेन, **विधूतः** = विगतः, **स्वेदबिन्दूनाम्** = श्रमपृषताम्, **सन्दोहः** = समूहो यस्य सः । **साधुवादेन** = प्रशंसनेन । **संवर्धितः**=सम्यग् वृद्धिं नीतः, **हेषमाणस्य**= हेषानिरतस्य, हयस्योत्साहो येन सः । **तोरणदुर्गस्य** = तन्नामख्यातदुर्गस्य, **यामिकानाम्** = प्रहरिणाम्, **पादचारैः** = भ्रमणैः, **परिमर्दितायाम्** = अतिक्षुण्णायाम् ।

परस्सहस्रपतगानाम् = असंख्यातपक्षिणाम्, **पटलस्य** = समूहस्य, **कलकलेन** = कोलाहलेन, **उन्निद्रस्य** = जाग्रतः । जागृताः शब्दं कुर्वन्तीत्युन्निद्रपदेन सशब्दत्वं लक्षितम्, तच्च सार्वकालिकशब्दवत्त्वव्यञ्जनद्वारा पक्षिणामसङ्ख्यातत्वपर्यवसायि । सुदूरं, **वितताः** = विस्तृताः, **काण्डाः** = शाखाः, **प्रकाण्डाः** = स्कन्धाः, यस्य तस्य । **पनसवृक्षस्य** = कण्टकितरोः, "कटहर" इति हिन्दी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अविश्रान्त एव दुर्गाध्यक्ष-समीपमगमत्।

तत्र तयोरेवमभूदालापः—

दुर्गाध्यक्षः—[दूरत एव] एहि, एहि, समये समायातोऽसि, मुहूर्तं नायास्यश्चेद् द्वारेषु रुद्धेषु बहिरेव समस्तां रजनीमवत्स्यः।

सादी—विघ्नास्त्वभूवन्, परं माहात्म्यमेतत् प्रभु-प्रतापस्य, यत् तदीया विघ्नैर्न व्याहन्यन्ते।

दुर्गाध्यक्षः—(तं शिरो नमयन्तं जीवेत्युक्त्वा) उपविश, उपविश।

ततो दुर्गाध्यक्षस्तु चुम्बित-यौवनामप्यत्यक्त-बालभावां तस्य मधुरामाकृतिं पश्यन्, सचकितं विचारयितुमारेभे, यत्-"कथं बाल एष प्रेषितः श्रीमता महाराष्ट्र-राजेन गुप्त-विषय-सन्धानेषु" क्षणमवस्थाय च "द्रक्ष्यामि प्रथमं किमेतेनाऽऽनीतं पत्रादिकम्"- इति निश्चित्य, "भगवन्! प्रभुणैकान्ते मामाहूय प्रदत्तमिदं पत्र-मस्ति, तत् स्वीक्रियताम्" इति कटिबन्धनान्निःसार्य ददतो हस्ता-दादाय, उत्थाय च स्तम्भावलम्बि-दीप-प्रकाशेन तूष्णीं मनस्येव पठित्वा, आकुञ्च्य, पूर्वोपविष्ट-मञ्चे उपविश्य, पुनः पौनःपुन्येना-लि-पटल-विनिन्दकांस्तस्य कुञ्चित-कच-गुच्छान्, उत्पत्स्यमान-

---

नायास्यः=नागमिष्यः। रजनीमित्यत्र "कालाध्वनो" रिति द्वितीया। **अवत्स्यः** = वासमकरिष्यः। हेतुहेतुमद्भावे लृङ्।

चुम्बितं यौवनं यया तामपि, न **त्यक्तः**=न दूरीकृतः, **बालभावः**= अर्भकत्वं, यया ताम्। **आकृतिम्**=आकारम्। **गुप्तविषयाणाम्**=रहो-विचार्याणाम्, **सन्धानेषु**=अनुसन्धानेषु, ज्ञानेषु। **अवस्थाय**, तूष्णीमिति शेषः। **द्रक्ष्यामि**, सामान्यभविष्यति। **मञ्चे**=पर्यङ्के। "शयनं मञ्चपर्यङ्कपल्यङ्काः" इत्यमरः। **अलिपटलविनिन्दकान्**=भ्रमरसमूहा-भिभावकान्। कार्ष्ण्येन भ्रमरनिचयोऽपि पराजित इति नितान्तकार्ष्ण्यं व्यङ्ग्यम्। **उत्पत्स्यमानेषु**=उदेष्यमाणेषु, **केशाङ्कुरेषु**=श्मश्रुप्ररोहेषु।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

केशाङ्कुर-स्विन्नमुत्तरोष्ठम् , अतिमसृण-कमलोदर-किशलय-सोदरौ कपोलौ उन्नतमंसम् , दीर्घौ बाहू, माधुर्य-वर्षिणी अक्षिणी, विनय-भरेणेव विनतां कन्धराम् , तेजसेव गौरमङ्गम् , दाक्षिण्येनेवाङ्कितं ललाटम् , भद्रतयेव च स्नातं शरीरं विलोकयन् , वारं वारं विचिन्तयंश्च, मशकैरप्यशङ्कनीयम् , मक्षिकाभिरप्यनीक्षणीयम् , समीरणेनाप्यनीरणीयम् , प्रकाशेनाप्यप्रकाशनीयम् , लेखन्याऽप्यलेखनीयम् , पत्रेणापि चाप्रकटनीयम् , गुप्ततमं वृत्तान्तम् , उपबर्ह-लग्न-पृष्ठः, भ्रूमध्य-स्थापिताचल-दृष्टिः, क्षणं समाधि-स्थित इव विचार-परवशोऽभूत् ।

ततश्च पुनः सादिन आननं समवलोक्य, समप्राक्षीत्—वत्स ! तत्रभवतः समीपात् कदा प्रचलितोऽसि ?

स ऊचे—भगवन् ! मार्त्तण्ड-मण्डले निम्लोचति ।

तेनोक्तम्—कथं तर्हि प्रलम्बमुत्कटं चाद्ध्वानमुल्लङ्घ्य, वात्या

स्विन्नम्=आर्द्रम् । उत्तरम्=ऊर्ध्वञ्च, तदोष्ठम् । "ओत्वोष्ठयोः समासे वे" ति वृद्धिविकल्पः । अतिमसृणकमलस्य=सुचिक्कणपद्मस्य, उदरे=मध्ये, यत् किशलयम्=पलाशम् , तस्य सोदरौ=तुल्यौ । आर्थीयमुपमा । विनताम्=नम्राम् । कन्धराम्=गलम् । स्वभावतो विनतत्वस्य विनयभरेणेवेत्युत्प्रेक्षणम् । एवमुत्तरत्रापि दाक्षिण्येन=औदार्येण, भद्रतया=शान्ततया । मशकैरपि, कर्णान्तिके स्वनद्भिरपि न शङ्कितुमर्हमिति ध्वनिः । अनीक्षणीयम्= अनवलोकनीयम् । अत्र वृत्तान्तगतं गोप्यतमत्वं मशकैरप्यशङ्कनीयमित्यादिना प्रकारान्तरेणाभिहितमिति पर्यायोक्तमलङ्कारः । उपबर्हलग्नपृष्ठः=उपधानसंपृक्तपृष्ठांशः । "उपधानं तूपबर्हः" इत्यमरः । भ्रूमध्ये स्थापिता अचला दृष्टिर्येन सः । अत एव "समाधिस्थित इवे" त्युपमानोपमेयभावः ।

निम्लोचति=अस्ताचलं गच्छति । आसन्नास्तमनसमय इति यावत् । शत्रन्तम् ।

वात्याः=वायुचक्राणि । "आँधी" इति हिन्दी । लोकोक्तिरलङ्कारः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विधूय, अल्पेनैव समयेन समायातोऽसि ?

स चाह—श्रीमन्! ईदृश एवाऽऽसीदादेशोऽत्र भवतः।

तत: परं च-"अस्मै गुप्तसन्देशाः कथनीया न वा? एष स्वस्मादप्याच्छाद्य मदुक्तं प्रभुकर्णातिथीकरिष्यति न वा? यतो लिपिः कस्यापि कर्णेजपस्य हस्तेऽपि पतेद्, इति वाग्भिरवोदीरणीयो मम सन्देशः, इति परीक्षेयैनं वाग्जालैः—"इति विविच्य, दुर्गाधीशस्तेन बहुशः समालपत्। अन्ततश्च तं सर्वथा गुप्त-सन्देश-योग्यमाकलय्य, मनस्येव हर्षमनुभवंश्चिरं प्रशशंस शिवराजं यत् "नैतेषु विषयेषु कदाऽपि सतन्द्रोऽवतिष्ठते महाराजः, स सदा योग्यमेव जनं पदेषु नियुनक्ति, नूनं बालोऽप्येषोऽबालहृदयोऽस्ति, तदस्मै कथयिष्याम्यखिलं वृत्तान्तम्, पत्रं च केषुचिद् विषयेषु समर्पयिष्यामि।' एवमालपच्च—

दुर्गाधीशः—मन्ये क्षत्रियोऽसि।

सादी – आम् श्रीमन्!

दुर्गा०—[स्मित्वा] नान्येषामपत्यान्येवं तेजस्वीनि दृढ-हृदयानि प्रभुभक्तानि च भवन्ति। [पुनः सम्मुखमवलोक्य] किं ते नाम ?

सादी—[अञ्जलिं बद्ध्वा] आर्य! मां रघुवीरसिंह इति वदन्ति जनाः।

दु०—चिरञ्जीव [क्षणं विरम्य] अस्तु, सम्प्रति दुर्गाद् बहिरेव

स्वस्मादपि, यदा स्वत एवाऽऽच्छादयति तदा किमु वक्तव्यं परस्मादिति ध्वनिः। एवञ्चाऽऽत्मवाची स्वशब्द इति तत्त्वम्। कर्णेजपस्य = सूचकस्य। "तत्पुरुषे कृति बहुलमि"ति विभक्तेरलुक्। परीक्षेय = परीक्षां कुर्याम्। तेन, "वृद्धो यूने"ति दर्शनेन सहार्थकशब्दाभावेऽपि तृतीया। तन्द्रया=आलस्येन, सहितः, सतन्द्रः।

दुःखेन गम्यत इति दुर्गलक्षणं तद्भेदादिकञ्च पुराणेषु द्रष्टव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साम्मुखीने हनूमन्मन्दिरे रात्रिमतिवाहय, श्वस्तु किञ्चिदुदञ्चति मरीचिमालिनि अत्राऽऽगत्य पत्रादिकं गृहीत्वा महाराज-निकटे यातासि। रघुवीरः—बाढम् !

इति शिरो नमयित्वा, प्रतिनिवृत्य, पनस-शाखातोऽश्वमुन्मुच्य, दुर्गाध्यक्ष-प्रेषितस्य भृत्यस्यैकस्य हस्ते वल्गादान-पुरःसरं समर्प्य, अपर-दासेरकेण व्यादिष्ट-मार्गो नव-वारिद-वारि-बिन्दु-वृन्द-सम्पर्क-प्रकटित-सिन्धुर-सन्दोह-सन्तर्पण-मधुरगन्धि रजनीकर-कर-निकर-विरोचितां भूमिमालोकयन्, मन्दं मन्दमाससाद मारुति-मन्दिरम्। तत्र चाऽऽगन्तुकानामेव निवासाय कलित-यथोचित-साधनानां प्रकोष्ठानामन्यतमे प्रविश्य, गवाक्षानुन्मुद्र्य, वाताभिमुखं नागदन्तिकासु वर्म वस्त्राणि चावलम्ब्य आसन्न-कूपाज्जलमुत्तोल्य हस्त-पादं प्रक्षाल्य, हनूमन्मूर्त्तिं दृष्ट्वा, कमपि नित्य-नियममिव निर्वाह्य,

साम्मुखीने=सम्मुखस्थे। अतिवाहय=यापय, उदञ्चति=उदयं प्राप्नुवति। मरीचिमालिनि = सूर्ये, यातासि = गन्तासि। प्रापणार्थकाद् यातेर्लुटि मध्यमपुरुषैकवचने। अपरदासेरकेण = इतरभृत्येन, व्यादिष्टमार्गः = प्रदर्शिताध्वः। नववारिदस्य = नूतनमेघस्य, वारिबिन्दूनाम् = जलकणानाम्, वृन्दस्य = समूहस्य, सम्पर्केण = संसर्गेण, प्रकटितः = प्रादुर्भूतः, सिन्धुरसन्दोहस्य = गजयूथस्य, सन्तर्पणः = तृप्तिजनकः, मधुरः = हृद्यः, गन्धो यस्यास्ताम्। रजनीकरस्य=शशिनः, कराणाम्= दीधितीनाम्, निकरेण = वृन्देन, विरोचिताम् = विशेषतः शोभिताम्। भूमेर्विशेषणद्वयमिदम्। आगन्तुकानाम् = अतिथीनाम्। कलितानि = सम्पादितानि, यथोचितम् = यथायोग्यम्, साधनानि = सामग्र्यः, येषु तेषाम्। प्रकोष्ठानाम् = कक्षाणाम्, "कमरा" पदवाच्यानाम्। गवाक्षान् = वातायनानि। "खिड़की" इति हिन्दी। उन्मुद्र्य=उद्घाट्य, "खोलकर" इति हिन्दी। नागदन्तिकासु = कीलिकासु। "खूँटी" इति हिन्दी। अवलम्ब्य = लम्बयित्वा। उत्तोल्य = उद्धृत्य। हस्तपादम्, प्राण्यङ्गत्वादेकवद्भावः। नित्यनियमम् = सन्ध्यादिकम्। निर्वाह्येति सम्बन्धः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुर्गाध्यक्ष-प्रेषितं किञ्चिदाहारादिकमुपगृह्य, ग्रीष्मसुखावहानां वातानां सुखमनुभवन्, कदाचिच्चन्द्रम्, कदाचित्तारकाः, कदाचिद् गिरि-शिखराणि, कदाचिद् दुर्ग-प्राचीरम्, कदाचित् सुदूर-पर्य्यट-द्यामिक-यातायातम्, कदाचिन्नतोन्नतभूभागान्, कदाचिच्चाभ्रङ्क-षान् हनूमन्मन्दिर-कलशान् अवलोकयन्, मन्दिरात् पश्चिमतः परि-क्रमापर-पादाहति-पिच्छिल – पाषाण-पट्टिका–परिष्कृत-वेदिकायां पर्यटन् कञ्चित् समयमतिवाहयाम्बभूव।

तावत् तेन पयः-फेनासार-च्छवि-विजित्वरया ज्योत्स्नया द्विगुणि-तोत्साहेन, धीर समीर-स्पर्श-शान्त-श्रमेण, प्रस्फुरच्चन्द्रकला-कलिका-

---

यात्रायां यथासमयं समुचितरूपेण तदकरणमिवार्थव्यञ्जथम्। **वातानाम्** = वायूनाम्। **दुर्गस्य, प्राचीरम्**=प्रान्ततो वृतिः, "प्राचीरं प्रान्ततो वृतिरि" त्यमरः। सुदूरं पर्यटतां **यामिकानाम्**=प्रहरिणाम्, यातायातम्। **अभ्रम्**= मेघम्, "अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहक" इत्यमरः, **कषन्ति** = उल्लिखन्तीत्यभ्रङ्कषास्तान्। "सर्वकूलाभ्रकरीषेषु कष" इति खच्, "खित्यनव्ययस्ये"ति मुम्। **परिक्रमापराणाम्**=प्रदक्षिणानिरतानाम्, **पादा-हतिभिः** = चरणताडनैः, **पिच्छिलाभिः**=पङ्किलाभिः, गमागमचिह्नमयी-भिरिति यावत्, **पाषाणपट्टिकाभिः** = प्रस्तरखण्डैः, **परिष्कृतायाम्** = भूषितायाम्, **वेदिकायाम्** = प्रतर्दिकायाम्। **अतिवाहयाम्बभूव**=गमयाञ्चकार।

तावत्तेन स्वरालापाः समश्रूयन्तेति सम्बन्धः। तं त्रिभिर्विशिनष्टि—**पयः-फेनानाम्** = दुग्धडिण्डीराणाम्, **आसारस्य**=धारासम्पातस्य, **छवेः** = शोभायाः, **विजित्वरया** = जयनशीलया, **द्विगुणितोत्साहेन**=प्रवर्द्धितह-र्षेण। **धीरसमीरस्य** = मन्दवातस्य, स्पर्शेन **शान्तः**=अपगतः, **श्रमः** = खेदो यस्य तेन। **प्रस्फुरन्त्या** = चाञ्चल्यमुपगच्छन्त्या, **चन्द्रकलया** = चन्द्रिकया, विकासितासु कलिकासु, शाकपार्थिवादिगणीयमध्यमपदलोपिस-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भ्रमद्-भ्रमर-झङ्कार-भर-मन्द्र-स्वर-पीयूष-शीकर-परिमार्जित-श्रवणेन समश्रूयन्त केचित् शुकीर्मूकयन्तः, हंसीर्ध्वंसयन्तः, सारिकाः सारयन्तः, कोकिलान् विकलयन्तः, वीणां च विगणयन्तः, काकलीकलमयाः स्वरालापाः। श्रवणेनैव तेनावगतं यद्—आलापा एते कस्या अपि बालिकायाः, सा च लज्जा-परवशा; यतो नोच्चैर्गायति, उच्चकुलप्रसूता; यतो नान्यासामेवमुदारा वाक्, समीप-वर्त्तिनी; यतः स्फुटः स्वरः, पूर्वस्यामुपविष्टा च; यतस्तत एव मूर्छन्ति मूर्च्छनाः।

अथ कर्णाविव गृहीत्वा आकृष्टो रघुवीरसिंहो मन्दिरं दक्षिणा प्रदक्षिणीकृत्य तयैव प्रदक्षिण-वेदिकया तत्क्षणमेव मन्दिरस्याग्निकोणे कपोत-पोतक-गूङ्कार-मधुर-कपोतपालिकाधस्तम्भारम्भनिकटे समुपतस्थे अवालोकयच्च-यत् पूर्वस्यामस्ति विशाला पुष्पवा-

---

मासः, **भ्रमताम्** = चरताम्, भ्रमराणां **झङ्कारभरेण** = गुञ्जनातिरेकेण, सञ्जातो मन्द्रस्वर एव **पीयूषम्** = अमृतम्, तस्य **शीकरैः** = कणैः, **परिमार्जिते**=शोधिते, **श्रवणे**=कर्णौ यस्य तेन। **केचित्** = कियन्तश्चित्, **स्वरालापाः**। शुकी-हंसी-सारिकादिस्वरविजेतृत्वेनातिश्रेष्ठत्वं निखिलस्वरविलक्षणत्वञ्च ध्वनितम्। **बालिकायाः**=बाल्ययौवनसन्धौ विद्यमानायाः। **लज्जापरवशा**=त्रपाधीना। अप्राप्तपूर्णयौवनत्वात्त्रपापरवशता। कन्यानां हि लज्जाधीनत्वं लक्षणकोटिप्रविष्टम्। **यतः**=यस्माद्धेतोः। **मूर्च्छना** इति पाठः, "अचो रहाभ्यामि" ति छद्वित्वे चर्त्वे च तत्साधुत्वम्। तुकस्तु न सम्भावना, रेफव्यवधानेन छस्य दीर्घात्परत्वाभावादिति ध्येयम्।

कर्णाविव गृहीत्वाऽऽकृष्ट इत्यत्र लोकोक्तिरलङ्कारः। **दक्षिणा**=दक्षिणतः, आजन्तमव्ययमिदम्। **कपोतपोतकानाम्** = पारावत - शावकानाम्, **गूङ्कारेण**=तज्जातीयशब्देन, **मधुरायाः**=मनोहरायाः, **कपोतपालिकायाः**=विटङ्कस्य, "कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकमि"त्यमरः, **अधः**=निम्नांशे, स्तम्भारम्भस्य निकटे। अधस्तम्भेत्यत्र "खर्परे शरि वा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

टिका, यस्यामतिमुक्त-लताः सौरभेण विष्णुपदमपि मदयन्ति, यूथिकाः सुगन्ध-तरङ्गैर्हरितामपि हृदयं हरन्ति, पाटलि-पटलानि अलि-पटल रसनाश्चटुलयन्ति, मालतिकाश्च मरन्द-बिन्दु-सन्दोहैर्वसुमतीं वासयन्ति। तस्यां मन्दिर-पूर्वद्वार-सम्मुखे एवास्त्येका परम-रमणीया ज्योत्स्ना-स्पर्श-प्रकटित-द्विगुणतर-चाकचक्या सोपानत्रयालङ्कृत-चतुरवरोहा हंसपक्ष-वलक्ष-च्छवि-विजित्वर-धवल-ग्राव-वेदिका। अस्यामागन्तुकानामुपवेशाय रचिताः पाषाणमया एव कतिचन मञ्चाः, तेषामन्यतमे उपविष्टा बालिकैका।

विसर्गलोपः"। **अतिमुक्तलताः** = माधवीलताः, "अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लते"त्यमरः। **सौरभेण** = सौगन्ध्येन। **विष्णुपदम्** = नभः। "वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी" इत्यमरः। **यूथिकाः** = मागध्यः। "अथ मागधी। गणिका यूथिकाऽम्बष्ठे"त्यमरः। **हरिताम्** = दिशाम्। **हृदयम्** = मध्यम्। अन्तरालप्रान्तमिति यावत्। **हरन्ति** = स्वायत्तीकुर्वन्ति। **पाटलिपटलानि** = मोघासमूहाः। "पाटलिः पाटला मोघा काचस्थाली फलेरुहा। कृष्णवृन्ता कुबेराक्षी"त्यमरः। **अलिपटल-रसनाः** = द्विरेफव्रातजिह्वाः। **चटुलयन्ति** = चञ्चलयन्ति। **मालतिकाः**= जातयः। "सुमना मालती जातिरि"त्यमरः। **मरन्द-बिन्दु-सन्दोहैः** = मकरन्दपृषद्गणैः। **वसुमतीम्** = वसुधाम्। **वासयन्ति** = सुगन्धयन्ति। **परमरमणीया** = नितान्तहृद्या। वेदिकाविशेषणमिदम्। **ज्योत्स्नायाः** = कौमुद्याः, **स्पर्शेन** = संसर्गेण, प्रकटितं द्विगुणतरं **चाकचक्यम्** = कान्तिविशेषो यया सा। **सोपानत्रयेण** = आरोहणत्रयेण, "आरोहणं स्यात् सोपानमि"त्यमरः, **अलङ्कृता** = विभूषिता, अत एव **चतुर्षु** =वेदसंख्याकस्थानेषु, **अवरोहः** = स्थितिस्थानं यस्याः सा। **हंसपक्षाणाम्** = कादम्बपतत्राणाम्, "गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमि"त्यमरः, **वलक्षायाः** = सितायाः, **छवेः** = शोभायाः, **विजित्वराणाम्** = जयनशीलानाम्, **धवलानाम्** = स्वच्छानाम्, **ग्राव्णाम्** = प्रस्तराणाम्, वेदिका। **मञ्चाः**= उच्छ्रितभूमयः, उच्छ्रायार्थकान्मञ्चेर्घञ्। "वृद्धोऽन्धः पतिरेष मञ्चकगत"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सेयं वर्णेन सुवर्णम्, कलरवेण पुंस्कोकिलान्, केशै रोलम्ब-कदम्बान्, ललाटेन कलाधर-कलाम्, लोचनाभ्यां खञ्जनान्, अधरेण बन्धुजीवम्, हासेन ज्योत्स्नां तिरस्कुर्वती, वयसा एकादशमिव वर्षं स्पृशन्ती, श्याम-कौशेय-वस्त्र-परिधाना, श्वेत-बिन्दु-सन्दोह-सङ्कुल-रक्ताम्बर-कञ्चुकिका, कण्ठे एकयष्टिकां नक्षत्रमालां बिभ्रती, सिन्दूर-चर्चा-रहित-धम्मिल्लेन परिशिष्टं पाणिपीडनमिति प्रकटयन्ती, हस्ते पाटलि-कुसुम-स्तवकमेकमादाय शनैः शनैर्भ्रामयन्ती, तमेवावलोकयन्ती च, अविदित-बहुल-तान-तारतम्यं मन्द-मन्दं मुग्ध-मुग्धं मधुर मधुरं किञ्चिद् गायतीति।

यद्यपि नैतया सरस्वती-सरूपया अज्ञात-तातोत्सङ्ग शयनातिरिक्त-सांसारिकसुखया कदाऽपि गातुं शिक्षितम्, न वा गायकानां तास्ताः

इत्यादौ प्रसिद्धम्। बालिका, इयमेव कथानायिका। "वर्णेन सुवर्णं तिरस्कुर्वती"त्येवंरूपेण सर्वत्रान्वयः। वर्णेन सुवर्णतिरस्कारोक्त्या सुवर्णरूपोपमानानादरप्रतीत्या प्रतीपालङ्कारः सहृदयजनसंवेद्यः। **रोलम्बकदम्बान्** = भ्रमरसमूहान्। **बन्धुजीवम्** = रक्तकम्, "रक्तकस्तु बन्धूको बन्धुजीवक" इत्यमरः। "दुपहरिया" इति हिन्दी। **हासेन**, हासस्य वर्णनं श्वैत्यमयमिति कविसमयख्यातिः। श्यामं **कौशेयवस्त्रम्**=पट्टवसनम्, परिधानं यस्याः सा। श्वेतबिन्दूनां **सन्दोहैः** = समूहैः, **सङ्कुलस्य** = व्याप्तस्य, **रक्ताम्बरस्य** = रक्तवस्त्रस्य, **कञ्चुकी** = चोलिका यस्याः सा। बहुव्रीहौ "शेषाद्विभाषे"ति कपि "केण" इति ह्रस्वः। **एकावलीम्** = एकयष्टिकाम्। **नक्षत्रमालाम्** = सप्तविंशतिमुक्तामयीम्। "एकावल्येकयष्टिका। सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैरि"त्यमरः। **सिन्दूरचर्चारहितेन** = कुङ्कुमसम्पर्कशून्येन, अनूढाः सीमन्ते सिन्दूरं न धारयन्तीति प्रथा। **धम्मिल्लेन** = संयतकेशसमूहेन, "धम्मिल्लः संयताः कचा" इत्यमरः। **पाणिपीडनम्** = विवाहः। **परिशिष्टम्** = अवशिष्टम्। **स्तवकम्** = गुच्छम्। अविदितं बहुलं **तानतारतम्यम्**=तानोत्कर्षापकर्षौ, यस्मिंस्तत्। क्रियाविशेषणम्, अग्रेतनानि च।

अज्ञातं तातोत्सङ्गशयनादतिरिक्तं **सांसारिकं सुखम्** = विषयानन्दो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्ण रसायन मूर्छनाः कर्णातिथीकृताः, तथापि भज्यमानमपि, त्रुट्यमानमपि, आम्रेड्यमानमपि, अदर्शित-रागविशेषमपि, आरोहावरोह-ध्रुवाभोगालङ्करादि कथा-शून्यमपि निज-कल्पना-मात्रम्, तद्देशीय ग्राम्य स्त्री-गानानुकल्पम्, सुदीर्घस्वर-रणनं गानमिदं परम-सरसं, परममधुरं, परमहारि चाऽऽसीत्।

रघुवीरसिंहस्तु स्वरालाप-श्रवणेनैव परवशो विलोक्यैनाम्-कोऽहम्? काहम्? केयम्? किमिदम्? इत्यखिलं यौगपद्येनैव विसस्मार।

यया तया। **कर्णयोः**=श्रोत्रयोः, **रसायनानि**=आनन्ददायिन्यः, 'मूर्च्छनाः। **कर्णातिथीकृताः**=श्रोत्रगोचरीकृताः। मूर्छनानां श्रोत्रगोचरत्वे स्थिते कर्णातिथीकरणरूपे भक्त्या समारोप इति समाधिर्नाम गुणः।

गानमिदं परमसरसादि-आसीदिति सम्बन्धः। गानं विशिनष्टि-**भज्यमानम्**=स्खलत्। **त्रुट्यमानम्**=विछिन्नप्रायम्, पूर्वापरसम्बन्धशून्यमिति यावत्। **आम्रेड्यमानम्**=पुनः पुनरुच्चार्यमाणम्। यद्यपि गाने गुणताऽऽम्रेड्यमानतायास्तथाप्यनवसरे स्थितत्वे दोषत्वमेवेति वेदितव्यम्। न **दर्शितः**=न प्रकटीकृतः, **रागविशेषः**=ललिताद्यनेकभेदः, यस्मिंस्तत्। **आरोहः**=स-रि-ग-म-प-ध-नीनामुच्चैस्त्वम्, **अवरोहः** = तन्नीचैस्त्वम्। **ध्रुवः**=स्थिरपदम्, **आभोगः** = रागविस्तारः, **अलङ्कारः**=रसादिः, तत्कथाशून्यमपि। तद्देशीयानां **ग्राम्यस्त्रीणाम्**=हालिकदाराणाम्, **गानस्य**=गीतेः, **अनुकल्पम्** = तुल्यम्। सुष्ठु **दीर्घाणाम्** = ताराणाम्, स्वराणां **रणनम्**=ध्वनिः, यस्मिंस्तत्। **परमहारि**=अत्यन्ताकर्षकम्।

अखिलम् = समस्तम्। **यौगपद्येन** = एककालम्।

"विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारः कोऽप्यन्तर्जडयति च तापञ्च तनुते॥"

इति प्राचीनपद्यं तद्दशावधारणायानुचिन्तनीयम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अहो ! आश्चर्यम् , य एष फणि फणा-फूत्कारेष्वपि सक्रोध-हर्य्यक्ष-जृम्भारम्भेष्वपि भल्ल-तल्लजाग्र-परिस्पर्धि-खर-भल्ल-धावनेष्वपि घन-घनाघन-घर्षण-विघट्टित-गैरिक-व्रात-जल-प्रपात-गिरि-गह्वरोत्फालेष्वपि तरलतर-तरङ्ग-तोयावर्त्त-शताकुल-तरङ्गि-णी तीव्रतर-वेगेष्वपि गण्डक-मण्डल-घोणा-घर्षण-घोर-घर्घराघोष-घोरतर-प्रान्तरेष्वपि च धैर्यं नात्याक्षीत् , कार्यजातं न व्यस्मार्षीत् , आत्मानं च नन्यगकर्षीत् ; तस्याधुना स्विद्यन्त्यङ्गानि, एजते गात्र-

अहो आश्चर्यम् ,"ओदि"त प्रगृह्यत्व प्रकृतिभावश्च । फणिफणाफूत्कारेषु=सर्पस्फटा-"फूँ"रवेषु । सक्रोधस्य=कुपितस्य, हर्य्यक्षस्य = केशरिणः, "हर्य्यक्षः केशरी हरिरि"त्यमरः, जृम्भारम्भेषु = मुखव्यादानोपक्रमणेषु । भल्लतल्लजानाम् = प्रशस्तभल्लानाम् , "मतल्लिका मचर्चिका प्रकाण्ड-मुद्धतल्लजौ । प्रशस्तवाचकान्यमूनी"त्यमरः । अग्रस्य परिस्पर्धिनः = प्रतिद्वन्द्विनः, खराः = कठोराः, नखराः = नखाः येषां ते च ते भल्लाः= ऋक्षाः, "भल्लो भल्लूकशस्त्रयोरि"ति कोशः, तेषां धावनेषु = मारणार्थं त्वरितगतिषु । घनानाम्=सान्द्राणाम् , घनाघनानाम् = वर्षनिरतवारिदा-नाम् , "शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघन" इत्यमरः, घर्षणेन = घट्टनेन, विघट्टितेषु = विदलितेषु, गैरिकव्रातेषु = गैरिकमिलितप्रस्तर-खण्डेषु, जलप्रपाताः=आसाराः, येषु तादृशानि यानि गिरिगह्वराणि तेषाम् । उत्फालेषु = उत्कूर्दनेषु । तरलतराः = अतिचञ्चलाः, तरङ्गाः=लहरयः, येषु तादृशानां तोयानाम् = वारीणाम् , आवर्त्तशतैः=असंख्यभ्रमरिकाभिः, आकुलानाम्=क्षुभितानाम् , तरङ्गिणीनाम् = नदीनाम् , तीव्रतरेषु = अतितीव्रेषु, वेगेषु = ओघेषु । गण्डकमण्डलस्य = खड्गिसमूहस्य, घोणानाम् = नासानाम् , "घोणा नासा च नासिके"त्यमरः, घर्षणेन, घोरः = भयावहः, यो घर्घराघोषः = घर्घररवः, तेन घोरतराः=अति-कठोराः, प्रान्तराः = दूरशून्याध्वानः, तेषु । अनुप्रासोऽत्र गद्यसमूहे । न अत्याक्षीत् = न त्यक्तवान् । न व्यस्मार्षीत् = न विस्मृतवान् । न न्यगकार्षीत्=न व्यक्कारमकरोत् , न नीचैरमन्यतेति यावत् । स्विद्यन्ति =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यष्टिः, विमनायते हृदयम्, अञ्चन्ति रोमाणि, क्षुभ्यति च मनः। तत् कथमिदम्? किमिदम्? कुत इदम्? अहह! सत्यम्! वीर-बालोऽप्येष प्राप्यावसरम् आहतो मदन-मृगयुना।

तावदकस्माद् "रघुवीर! रघुवीर! त्वं शिव-वीरस्य चरोऽसि, गूढाभिसन्धिषु प्रेष्यसे, अल्पं तव वेतनम्, साधारणी तवावस्था, खड्ग-धारावलेहनमिव कष्टतरं तव कार्यम्, कैशोरं वयः, अव-द्दर्शि हृदयम्, सर्वत्र जागरूको राजदण्डः, अवितर्कणीया च भाविनी घटना, तन्मा स्म त्वं मुखचन्द्रावलोकनैरधर-सीधु-

स्वेदवन्ति भवन्ति। एजते = कम्पते। विमनायते = वैक्लव्यमधिगच्छति। अञ्चति = उद्गतानि भवन्ति। क्षुभ्यति=क्षोभमनुभवति। मदन एव मृगयुः=व्याधस्तेन। रूपकम्।

वीररसप्रधानेऽस्मिन् काव्ये तदङ्गतया विप्रलम्भशृङ्गारवर्णनमिदम्। सौवर्णीरघुवीरसिंहावालम्बनविभवौ, रघुवीरधैर्यध्वंससमुद्भूताः स्वेदगात्रकम्पना-दयोऽनुभावाः, निर्वेदादयश्चाग्रे वाच्या व्यभिचारिण इति विभावनीयम्।

तावदकस्मादन्तःकरणेन स्वयमेव प्रबोधितः पुनस्तामैवैक्षिष्टेति सम्बन्धः। "शिववीरस्य चरोऽसी"त्यनेनोच्चजनसंपर्किणस्ते न युक्तमिदमिति व्यञ्जितम्। तथा च प्राक्तनं पद्यम्—"न गणितं यदि जन्म पयोनिधौ, हरिशिरस्थितिभूरपि विस्मृता"। गूढाभिसन्धिषु=गुप्तकृत्येषु। अल्पम्=सस्त्रीकनिर्वाहायोग्यम्। नाद्यत्व इव तदानीं दरिद्रा अलब्धभृतयश्चाद्याह्य कामपि ललनां स्वीयं तस्याश्च जीवनं व्यर्थयन्ति स्मेति विशद्यते। साधारणी तवावस्था, लोकोक्तिरियम्। अवस्था= दशा। वयोऽर्थकत्वे तु—"कैशोरं वय" इत्यस्य वैयर्थ्यापात इति ध्येयम्। खड्गधाराया अवलेहनम्=रसनयाऽऽस्वादनम्,

"राजसेवा मनुष्याणामसिधारावलेहनम्।
पञ्चाननपरिष्वङ्गो व्यालीवदनचुम्बनम्॥"

इत्युक्तेः। जागरूकः=अनिद्रितः। सर्वत्र लब्धप्रसर इति यावत्। इयमपि लोकोक्तिः। मास्म मुखचन्द्रावलोकनादिभिरात्मानं विक्रीणीष्वेति सम्बन्धः। अधरस्थितस्य सीधुनः=ऐक्षवमद्यस्य, तृषाभिः=तृष्णाभिः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तृषाभिः, कोमलाङ्गाऽऽलिलिङ्गिषाभिः, मधुरालाप-शुश्रूषाभिश्चाऽऽत्मानं विक्रीणीष्व"-इत्यन्तःकरणेन स्वयमेव प्रबोधितो नेत्रे प्रमृज्य, स्तम्भावष्टम्भं परिहाय, लोचनयोरुपरि स्फुरतः कुञ्चित-कचानपसार्य, शीतलं निःश्वस्य च, आत्मनो दशां स्मरन्नेव पुनस्तामेव कौमारात्परं वयश्चुचुम्बिषन्तीं कुसुम-कुड्मल घूर्णन-व्याजेन यूनां मनो घूर्णयन्तीं सौन्दर्य-सारावतार-स्वरूपामैक्षिष्ट ।

अथ सा तु "सौवर्णि ! सौवर्णि ! तातस्त्वामाकारयति"-इति कस्यापि वटोरिव वाचमाकर्ण्य, "आम् ! एषा आगच्छामि"-इति मधुरमुदीर्य, उत्थाय, वेदिकातोऽवतीर्य, वाटिकायामेव दक्षिणतः सुधा-धवलमेकं गृहं प्राविशत् ।

रघुवीरसिंहस्य समीपत एव गतेति गमन-समये सचकितं सगति-स्तम्भं परिवृत्त-ग्रीवं "कोयम्" इत्येनं क्षणमवलोकयामास । परतश्च "स्यात् कोऽपि" इति समुपेक्ष्य गृहं प्रविष्टेत्यपरोऽपि जातो वशीकार-प्रयोग-प्रचारः ।

कोमलाङ्गालिलिङ्गिषाभिः = मृदुतन्वाश्लेषवाञ्छाभिः, **मधुरालाप-शुश्रूषाभिः**=हृद्यशब्दश्रवणमनोरथैः । **प्रमृज्य**=प्रोञ्छ्य । **स्तम्भावष्टम्भम्** =स्थगितताम् । सौवर्णीदर्शनोत्थां जडतामिति यावत् । **शीतलं निःश्वस्य,** लोकोक्तिः । "ठण्डी साँस लेकर" इति लोके, स्वदशास्मरणखेदसमुत्थमिदम् । **कौमारात्परं वयः**=यौवनम् । "कौमारं यौवनं जरे" त्यवस्थात्रितयाभिप्रायम् । **चुचुम्बिषन्तीम्** = चुम्बितुमिच्छन्तीम् । स्प्रष्टुमभिलषन्तीमिति यावत् । **कुसुमकुड्मलघूर्णनव्याजेन** = सुमकलिकापरिचालनकपटेन । **घूर्णयन्तीम्**=परिचालयन्तीम् । **सौन्दर्यसारस्य**=सुन्दरतातत्त्वस्य, **अवतारस्वरूपाम्**=देहधारिणीम् । पिण्डीभूतसौन्दर्यामिति यावत् । **आगच्छामि,** "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" । **सुधाधवलम्**=चूर्णकसितम् । **चकितेन**=विस्मयेन सह वर्त्तते यस्यां क्रियायान्तत् । **सगतिस्तम्भम्**= सगमनावरोधम्, **परिवृत्तग्रीवम्**=परिवर्तितकन्धरम् । क्रियाविशेषणानि । **वशीकारप्रयोगप्रचारः**=स्वायत्तीकरणविधानप्रसारः । रघुवीरविषयकमिदम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रघुवीरश्च ततः प्रतिनिवृत्य, पुनः स्वाधिकृत-कोण-कोष्ठमेवाऽऽयातः ।

तत्र च गवाक्ष-जाल-प्रसारितैः राजत मार्जनी-निभैः कलानिधि-कर-निकरैः समूह्य संशोधित इवान्धकारे, पयःपयोधि-फेनैरिवाऽऽस्तृते शयनीय-पीठे उपविश्य, कदाचिदध इव मुखं विदधत्, कदाचित् कपोलं करे कलयन्, कदाचिज्जालान्तरेण तारकमण्डलमवलोकयन्, कदाचित्किमिति मृषा - चिन्तनैरित्यात्मनैवाऽऽत्मानं सान्त्वयन्, कदाचिच्च "निद्रे! कुत इव विद्रुताऽसि ?" इत्यशान्ति बिभ्रत्, पार्श्वतः पार्श्वं परिवर्त्तमानो होरामेकामयापयत् ।

ततश्च "अहह! शिववीर-कार्येष्वसम्पादितमेकमवशिष्यते" इति किञ्चित् संस्मृत्येव, कशयेव ताडितः सपद्युत्थाय "मन्दिर-पुरोहितः क ?" इति कांश्चिदापृच्छ्य, केनचिन्निर्दिष्टमार्गस्तस्यामेव

स्वाधिकृतकोणकोष्ठम्=निर्दिष्टस्वावाससदनम् ।

गवाक्षजालप्रसारितैः = वातायनरन्ध्रव्याप्तैः । रजतस्येयं **राजती** = रौप्यमयी, **मार्जनी** = बहुकरी, "झाड़ू" इति हिन्दी, तत्तुल्यैः । **कलानिधिकरनिकरैः**=चन्द्रकिरणसमूहैः, **समूह्य**=सञ्चित्य । "इकट्टा कर" इति भाषायाम् । **संशोधिते** = दूरीकृते । "नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वाऽस्त्रियाम्" इत्यमरः । **पयःपयोधिफेनैः**=क्षीरवारिधिडिण्डीरैः । **आस्तृते**= विस्तीर्णे, **शयनीयपीठे** = पल्यङ्के । **विदधत्**=कुर्वाणः । "नाभ्यस्ताच्छतुरि"ति नुम्निषेधः । **जालान्तरेण** = वातायनरन्ध्रेण । **तारकमण्डलम्** = भव्रजम् । **सान्त्वयन्** = समादधत् । **विद्रुतासि**=पलायितासि । **पार्श्वतः पार्श्वं परिवर्त्तमानः**, खेदस्वापे लोके "करवट बदलते हुए" इति समभिधीयते । लोकोक्तिः । **होराम्** = घटिकाम् । **अयापयत्** = अत्यवाहयत् । **कशया** = अश्वताडन्या, "चाबुक" इति भाषा । **सपदि** = सहसा **निर्दिष्टमार्गः**=प्रदर्शितपथः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाटिकायां तदेव बालिकया प्रविष्टचरं गृहं प्रविवेश।

तत्र चैकस्मिन् प्रकाण्ड-कोष्ठे निरैक्षिष्ट यद्—एकस्यामारकूट-दीपिकायां प्रदीप एको ज्वलति, कुश-काशासनान्यनेकानि आस्तृतानि, आरक्त वेष्टनेषु बहुशः पुस्तकानि पीठिका अधिष्ठापितानि, नाग-दन्तिकासु धौत-वस्त्राणि पट्टाम्बराणि च लम्बन्ते, एकस्मिन् शरावे मसीपात्रम्, लेखनी, छुरिका, गैरिकम्, उपनेत्रं चाऽऽयोजित-मस्ति। पात्रान्तरे च खादिरं चूर्णम्, आर्द्र-वस्त्र-वेष्टितानि नागवल्ली-दलानि, पूगानि, शङ्कुला, देव-कुसुमानि, एलाः, जाति-पत्राणि, कर्पूरं च विन्यस्तमस्ति। तन्मध्यत एव च महोपबर्हमेकं पृष्ठत आश्रित्य पादौ प्रसार्य उपविष्ट एको वृद्धः, सम्मुखस्थश्च छात्र एकः पादौ संवाहयति, अपरश्च किञ्चित् तालीपत्र-पुस्तकं दीप-समीपे पठति। वृद्धश्च किञ्चिन्निद्रा-मन्थरश्छात्र-प्रश्नानुसारेण मध्ये मध्ये

प्रकाण्डकोष्ठे=विशाले कोष्ठे। "बड़े कमरे में" इति हिन्दी। आर-कूटदीपिकायाम्=धातुविशेषदीपिकायाम्। "रीतिः स्त्रियामारकूट" इत्यमरः, दीपिका=दीपस्थापनार्थं निर्मितं वस्तु। "दीयट" इति हिन्दी। आरक्त-वेष्टनेषु=ईषद्रक्तबन्धनवस्त्रेषु। "खारुओं का बेठन" इति हिन्दी। पीठिका अधिष्ठापितानि = उपवेशितानि, "अधिशीङ्स्थासां कर्मे"ति कर्मत्वम्। शरावे=विस्तृत-पात्रे। "तस्तरी" इति हिन्दी। गैरिकम्, लिखितस्या-शुद्धस्य दूरीकरणार्थम्। पात्रान्तरे = तथाविधे। नागवल्लीदलानि = ताम्बूलवल्लीपत्राणि। "ताम्बूलवल्ली ताम्बूली नागवल्ली"त्यमरः। पूगानि = क्रमुकानि। शङ्कुला=पूगकर्त्री, "सरौता" इति हिन्दी। देवकुसुमानि = लवङ्गानि। एलाः = पृथ्वीकाः, "पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुले" त्यमरः। जातिपत्राणि=मालतीपत्राणि। कर्पूरम्=घनसारः। महोपब-र्हम्=महदुपधानम्। "मसनन्द" इति हिन्दी। संवाहनं करोति संवाह-यति = मर्दयति। "संवाहनं मर्दनं स्यादि"त्यमरः। तालीपत्रपुस्तकम् = ताडपत्रपुस्तिकाम्। तदानीं नाद्यत्व इव कर्गजाधिक्यमासीत्। निद्राम-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आलस्यमुन्मुच्य, किमप्यर्द्ध-शब्दैरुत्तरयति—इति ।

अथैनं पाद-संवाहन-परश्छात्रोऽवलोक्य को भवानित्यपृच्छत् । एष च "श्रीमतां समर-विजयिनां महाराष्ट्र-राजानां भृत्योऽस्मि"-इति मन्दमभ्यधात् । तदवधार्य वृद्धोऽपि नेत्रे विस्फार्य निद्रामन्थरेण स्वरेण "आस्यतामास्यताम्" इति प्रणमन्तमुवाच । सोऽपि प्रणम्य, समुपविश्य, दत्त-निजपरिचयः, कुशलादि-वार्त्ता आलप्य, क्षणानन्तरं तदादेशानुसारेण करौ सम्पुटीकृत्य न्यवेदयत्—

"भगवन् ! प्रणम्य भवन्तं तत्रभवान् महाराष्ट्र-राजः कथयति यत् साम्प्रतं शास्तिखान-द्वारा पुण्यनगरमपि हस्तितवता दिल्लीश्वरेण सह योद्धुमुपक्रान्तमस्ति । परमल्पीयसी अस्मत्सेना, असहयोगिनः पार्श्वस्थ पृथिवी-पतयः, अङ्ग वङ्ग-कलिङ्गेष्वपि समुद्धूत-ध्वजाः परिपन्थिनः, शैशवादेव यवनवराकैर्महाप्रवृद्धं मम वैरम्, सन्धेश्च कथामात्रमपि न सम्बोभवीति, यद्यप्यल्पेऽपि मामका युद्ध-विद्यासु कुशलाः सन्ति; तथाऽपि किं भावीति मध्ये मध्ये संशेते हृदयम्, भवांस्तु

न्थरः = निद्रयाऽलसः, निद्रोद्भूतालस्यवलितः । अर्धविशिथिलशब्दैः = स्वल्पस्रस्तैः पदैः कियदक्षरविच्छिन्नैः ।

एनम् = रघुवीरसिंहम् । "निरैद्दिष्ट" क्रियाकर्तृत्वेनोपस्थितस्यावलोकनक्रियाकर्मत्वेन पुनरुपस्थित्याऽन्वादेशतेति द्रष्टव्यम् । एष च मन्दमभ्यधादिति सम्बन्धः । अभ्यधात् = अकथयत् । करौ सम्पुटीकृत्य = हस्तौ संयोज्य । प्राञ्जलिर्भूत्वेति यावत् । नम्रतासूचकमिदम् ।

हस्तितवता=स्वायत्तीकृतवता । "हथियाना" इति हिन्दी, पार्श्वस्थपृथिवीपतयः = निकटस्थभूमिपालाः, असहयोगिनः = साहाय्याकारणः, समुद्धूतध्वजाः=समुड्डीनपताकाः । तेष्वाधिपत्यं लब्धमिति भावः । ध्वजोद्धूननं हि विजयोपलक्षणम् । परिपन्थिनः = शत्रवः । सम्बोभवीति = अतिशयेन वारं वारं वा भवति । यङ्लुगन्तम् । तदच्छान्दसत्वमभिहितं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसिद्धोऽस्मद्देशे दैवज्ञः, तद् विचार्य कथ्यतां किं भावि" इति—

तदवगत्य पादावाकुञ्च्य, "विजयतां शिवराजः" इत्यभिधाय, ताम्बूल-वीटिकां रचयितुं छात्रमेकमिङ्गितेनाऽऽदिश्य, पृष्ठस्थद्वाराभिमुखं ग्रीवां परिवर्त्य, "वत्से ! सौवर्णि ! वत्से सौवर्णि !" इत्याकार्य, "इयमस्मि तात !" इत्यागतां च तां "वत्से ! तासां यूथिकामालिकानामेकां मालां प्रसाद-मोदकं चैकमानय"-इत्यभिधाय, वाढमित्युक्त्वा तथा विहितवत्यां च तस्याम्, रघुवीराभिमुखं "गृहाण, भुक्त्वेदं प्रसाद-मधुरान्नं निद्रामनुभव, यादृशं च स्वप्नमवलोकयितासि, तथा प्रातरेव मां कथयितासि, व्येति रजनी, तद् गच्छ, शेष्व" इत्युदीर्य समागतां सौवर्णीमेव मोदकमर्पयितुं मालां च कण्ठे निक्षेप्तुमिङ्गितवान् ।

सा चावलोक्य तमेव पूर्वावलोकितं युवानम्, व्रीडा-भर-मन्थराऽपि तताज्ञया बलादिव प्रेरिता ग्रीवां नमयन्ती, आत्मनाऽऽत्मन्येव निविशमाना, स्वपादाग्रमेवाऽऽलोकयन्ती, मोदक-भाजन-सभाजितं

प्राक् । **संशेते**=संशयमापद्यते । **दैवज्ञः**=ज्यौतिषिकः । "इगुपधज्ञाप्रीकिरः कः" । "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरि" त्यमरः ।

आकार्य=आहूय । **यूथिकामालिकानाम्** = मागधीस्रजाम्, **प्रसादमोदकम्** = भगवदर्पितमिष्टान्नम् । यद्यपि "प्रसादस्तु प्रसन्नते" त्यमरेण प्रसन्नताभिधायकत्वं, तथाऽपि लोकप्रसिद्धया भगवदर्पितत्वार्थकत्वमेवेदृशेषु स्थलेषु । व्यवहारो हि सर्वतो बलीयान् पदार्थनिर्णायक इति ध्येयम् । **मधुरान्नम्**=मोदकम् । **व्येति** = याति । **रजनी** = निशीथिनी । **शेष्व** = स्वपिहि । **उदीर्य** = उक्त्वा । **निक्षेप्तुम्**=निधातुम् । **इङ्गितवान्** = चतुरादिचेष्टया बोधितवान् ।

व्रीडाभरमन्थरा=लज्जाधिक्याधिगतमान्द्या । **तताज्ञया बलादिव प्रेरिता**, तथा चोक्तम्महाकविना कालिदासेन "आज्ञा गुरूणां ह्यविचारणीये" ति । **निविशमाना**, "नेर्विशः" इत्यात्मनेपदत्वे शानच् । **मोदकभाजनेन**=

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सव्येतर-करं तदग्रे प्रासारयत् । स चाऽऽत्मनो भावं कष्टेन संवृण्वं-स्तद्धस्तादुदतूतुलत् । पुनश्च सा अञ्चलकोणं कटि-कच्छ-प्रान्ते आयोज्य, हस्ताभ्यां मालिकां विस्तार्य नत-कन्धरस्य रघुवीरस्य ग्रीवायां चिक्षेप, ईषत्कम्पित-गात्रयष्टिश्च शनैर्यथागतं निववृते ।

सैवेयं गौर-श्याम-सिंहयोरनुजा सौवर्णी; या शैशव एव यवन-तनयेनापहृता; यस्याश्च वास्तविकं नाम कोशलेति, स चायं देव-शर्म्मा ब्राह्मणः, यो गौरसिंहस्य कुल-पुरोहितः कोशलायाश्च रक्षकः।

ततः प्रणम्य, देवशर्म्मच्छात्रदत्तां वीटिकामादाय प्रतिनिवृत्य, रघुवीरोऽपि तथैव सुप्तः । को जानाति कोशलारघुवीरयोः काभि-र्भावनाभिरद्यतनी रजनी व्यत्येतीति !!

अथोषस्येवोत्थाय नित्यकृत्यानि निर्वर्त्य, यावद्देवशर्म्मणः समीपमुपतिष्ठासते ; तावद्दौर्गिक-दूतेनाऽऽकारितो दुर्गाध्यक्ष-

---

मिष्टान्नभाण्डेन, **सभाजितम्**=पूजितम् । सहितमिति वाच्योऽर्थः । **सव्येतरकरम्**=दक्षिणम् हस्तम् । **आत्मनो भावम्**, रतितामापन्नम् । **संवृण्वन्**=समाच्छादयन्, **उदतूतुलत्**=उत्थापयामास । **अञ्चलकोणम्**=वस्त्रदशाम् । **कटिकच्छप्रान्ते**=कटिकच्छ-भागे, **आयोज्य**=निवेश्य । **विस्तार्य**=प्रसार्य । **ईषत्**=अल्पम्, **कम्पिता**=वेपमाना, **गात्रयष्टिः**=शरीरं, यस्याः सा । सात्त्विकभावोदयप्रदर्शनमिदम् । **यथाऽऽगतम्**, आगतम्, आगतिः तदनतिक्रम्य यथागतम् । क्रियाविशेषणम् । यथा समागता तथैव निवृत्तेति यावत् ।

सैवेयमित्यादि-रक्षक—इत्यन्तं कविवाक्यं सौवर्णीपरिचयदानपरम् । **अनुजा**=अवरजा, **शैशवे**=बाल्ये ।

को जानाति, **कः**=ब्रह्मा, स एव जानाति, नान्यः कश्चिदसर्वज्ञ इति तत्त्वम् । काकुर्वा । तथात्वे न कोऽपि जानातीत्यर्थः । आत्मनैव विज्ञातव्य-त्वेन नान्यो ज्ञातेति सूचनमेवोदनः । **भावनाभिः**=विचारैः ।

उषसि=प्रातः । **उपतिष्ठासते**=उपस्थातुमिच्छति । **दौर्गिक**-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मासाद्य, तद्दत्तं पत्रादिकं वाचनिक-सन्देशं चाऽऽदाय, पुण्यनगर-मधिवसतः शास्तिखानस्य प्रकृत-वृत्तान्तं तत्प्रश्नानुसारं व्याहृत्य, निवृत्य, देवशर्म्माणं प्रणम्य, सङ्क्षिप्य स्वप्न–वृत्तान्तमकथयत्, यद्–"यथा मया प्रभुणा च खड्गः समुत्तोलितः, शास्तिखानश्च दृष्ट्वैवैतत्पलायितः" इति।

स चाङ्गुलिपर्वसु किमपि गणयित्वेव प्रोवाच-यद् "यवनैः सह विजयः, आर्यैश्च पराजयः।"

पुनश्च तं प्रणम्य, जिगमिषन्तमुवाच, यत्—

"तावद् बहिरेवोद्याने पर्य्यट, यावद् हनूमत्प्रसाद-सिन्दूरं प्रेषयामि, यत्कृततिलको दुर्द्धर्षो भवति शत्रूणाम्" इति।

स च तथेत्युक्त्वा वहिरागत्य पर्य्यटन् पूर्वेद्युः सौवर्ण्या सनाथितां वेदिकां समायातः, स्मृतवांश्च पूर्वदिन-वृत्तान्तम्, अवालोकयच्च सौवर्ण्यध्युषित-चरं पाषाण-मञ्चम्। तावन्निपुणं निरीक्ष्य दृष्टवान्–यदेका एकयष्टिका मौक्तिक-माला तत्र पतिताऽस्तीति, ताञ्चोत्थाप्य तस्या एवेयमिति निश्चित्य, तस्यै समर्पयामीति विचार्य, इतस्ततश्चक्षुर्निचिक्षेप।

अथ व्यलोकयद्–यद् वाटिकायामेव कोशलाऽपि कदलीदल-पुटकमेकं वामकरे संस्थाप्य, दक्षिण-कर–पल्लवेन कुसुमपतङ्गानुद्-

---

द्रुतेन = दुर्गाध्यक्षभृत्येन। वाचनिकसंदेशम् = वाचिकम्, "सन्देशवाग् वाचिकं स्यादि"त्यमरः। अङ्गुलिपर्वसु = करजावयवेषु, पर्व = "पोर" इति हिन्दी।

सनाथिताम् = अधिष्ठिताम्। सौवर्ण्या, अध्युषितचरम् = पूर्वमुपविष्टम्। पाषाणमञ्चम् = प्रास्तरवेदिकाम्। एकयष्टिका = एकावली, मालाविशेषः, "एकावल्येकयष्टिके"त्यमरः। निचिक्षेप = निदधे।

कुसुमपतङ्गान् = पुष्पभ्रमरिकाः। "तितली" इति हिन्दी। निरुद्धग-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धूय कुसुमान्यवचिनोति।

ततश्च क्षणं विचार-भारैर्निरुद्ध-गतिरपि शङ्कातङ्कमपास्य, मालां हस्ते आदाय शनैस्तदभिमुखमेव प्रतस्थे। सा च तस्मिन्नतिसमीपमायाते पादाहतिमाकर्ण्य अवालुलोकत्। तस्याश्चातिचकितायामिव स्तब्धायामिव च रघुवीरोऽवादीत्-

'भगवति! भवत्या इयं मालिका तत्र पतिता, मया लब्धेति प्रत्यर्पयितुमायातोऽस्मि-इति, अनुमन्यसे चेदेनां यथास्थानं निवेशयामि"

सा च व्रीडया कुलाङ्गनाङ्गीकृत-महाव्रतेन च स्तब्धवाग् न किञ्चन प्रावोचत्। रघुवीरश्च वाचंयमतामप्यङ्गीकारभङ्गीमङ्गीकृत्य, तदन्तिकमागत्य, सौवर्णीचित्रं मानस-भित्तिकायामालिख्य नक्षत्रमालां तत्कण्ठे प्राक्षिपत्, पवित्रतमानि स्फुटतम-यौवनोद्भेद-लक्ष्म-रहितानि च तदङ्गानि नास्प्राक्षीत्।

ततस्तस्यां मौनेनैवैकतः प्रयातायाम्, स्वयं पुनर्मन्दिरद्वारमागत्य देवशर्म्मणोऽन्यतमच्छात्रेणाऽऽनीतं सिन्दूरमादाय पुनरश्वमारुह्य,

---

तिः=अवरुद्धगमनः। शङ्काऽतङ्कम्=सन्देहं भयञ्च। प्रत्यर्पयितुम् = प्रतिदातुम्। त्वया ह्यो मह्यमर्पिता माला, मया चाद्य तुभ्यमर्प्यत इति विचार्य प्रत्यर्पणाभिधानम्। अनुमन्यसे=स्वीकरोषि। कुलाङ्गनाभिः=सदन्वयजस्त्रीभिः, अङ्गीकृतेन = स्वीकृतेन, महाव्रतेन = ब्रह्मचर्यरूपेण। गुह्यभाषणस्यापि ब्रह्मचर्यविघातकतेति मौन[illegible] वाचं [illegible]तीति तद्भावो, वाचंयमता= तूष्णीम्भवनम्। अङ्गीकारभङ्गीम् = [illegible]ङ्गीकारप्रकारम्। "मौनं स्वीकारलक्षण" मित्युक्तत्वात्। [illegible] सप्तविंशतिमौक्तिकमयीं पूर्वोक्तामेकावलीम्। स्फुट[illegible] [illegible]नितान्तप्रकटस्य, यौवनस्य = तारुण्यस्य, उद्भेदस्य = आविर्भावस्य, लक्ष्मभिः [illegible] रहितानि =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मारुत-नन्दनं संस्मृत्य तोरणदुर्गात् सिंहदुर्गं प्रतस्थे ।

इति चतुर्थो निश्वासः ।

इति प्रथमो विरामः

शून्यानि, **अस्प्राक्षीत्**=स्पृष्टवान् । **मारुतनन्दनम्**=वायुसूनुम् ।

प्राप्त-शास्त्र-त्रयाचार्य-पदवीकेन धीमता ।
भगवत्या गर्भजेन विद् भागवत-सूनुना ॥
विद्वत्त्रिपाठि शिष्येण रामजीशर्मणा मया ।
शिवदत्तकृपादत्तन्यायशास्त्रावभासिना ॥
पाण्डेयशास्त्रीत्यपराभिधेयेन सदध्वरा ।
शिवराजस्य विजये वैजयन्ती विकाशिता ॥

इति श्रीशिवराजविजयवैजयन्त्यां चतुर्थनिश्वासविवरणम् ।

आदिमविरामविवरणं समाप्तम् ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8387

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कृत के छात्रों के लिये परम उपयोगी

गुप्ताशुद्धि प्रदर्शनम्

श्री अम्बिकादत्त व्यासजी का रचा गुप्ताशुद्ध श्लोक और वाक्य [illegible] कविकृत कर्तृगुप्त, कर्मगुप्त, करणगुप्त, सम्प्रदानगुप्त, अपादानगुप्त, स[illegible]गुप्त, अधिकरणगुप्त, सम्बोधनगुप्त, सन्धिगुप्त, समासगुप्त, लिङ्गगुप्त, गुप्त[illegible]पद, क्रियागुप्त और कूट इस पुस्तक के विषय हैं।

ऐसी पुस्तक आज तक दूसरी नहीं छपी। विद्यार्थियों एवं विद्वानों को अवश्य देखना चाहिए। विस्तृत 'दर्पण' व्याख्या सहित। विलायती कागज सुन्दर छपाई। मूल्य—आठ आना

सामवतम्

श्री अम्बिकादत्त व्यासजी का रचा यह नाटक सब दृष्टियों से उच्चकोटि का है। इसमें व्यासजी की विलक्षण कल्पना, अनुपम कवित्व सरल और मुहावरेदार संस्कृत पर असाधारण अधिकार तथा सरसता निखर पड़ी है। शिवराज विजय के टीकाकार पं० रामजी पाण्डेय की विस्तृत टीका के साथ प्रकाशित। मूल्य—दो रुपया आठ आना

शुक्लयजुर्वेदीय मंत्रसंहिता

जो लोग वेद-स्वाध्याय की प्रक्रिया को सरलता से जानने के लिये उत्सुक हैं, जो लोग समस्त 'शुक्लयजुर्वेद-संहिता' न पढ़कर केवल कर्म-काण्डोपयोगी आवश्यक मंत्रों को कण्ठस्थ कर अल्प समय में ही कर्मकाण्ड-प्रक्रिया में पूर्ण निपुणता प्राप्त करना चाहते हैं उनके लिये 'मंत्रसंहिता' उपयोगी सहायक है।

इस पुस्तक में ५२३ मंत्र हैं। प्रारम्भ में ६६ पेज की विशद महत्वपूर्ण भूमिका लिखी गई है जिसमें वैदिक साहित्य का पूरा-पूरा परिचय दिया गया है जिसका साधारण ज्ञान वैदिकों को तथा व्याकरणादि शास्त्र परिशीलन कर्ताओं को होना विशेष आवश्यक है। सर्वसाधारण की जानकारी के लिये विशेषतः वेद के परीक्षार्थियों के लिए सोदाहरण जटाद्यष्ट विकृतिलक्षण भी दे दिया गया है। मंत्रों, स्वरों और द्वित्वादि की शुद्धता की ओर विशेष ध्यान दिया गया है। विलायती कागज, सुन्दर बम्बइया मोटा टाइप। ऐसी 'मंत्रसंहिता' आज तक दूसरी नहीं छपी। मूल्य—तीन रुपया

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi